ॐ

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला – षोडश पुष्प

# वास्तुशास्त्रविमर्श

सन्दर्भित एवं मूल्याङ्कित शोधपत्रिका

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
( केन्द्रीयविश्वविद्यालयः )
नवदेहली-110016

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला–षोडश पुष्प

# वास्तुशास्त्रविमर्श

सन्दर्भित एवं मूल्याङ्कित शोधपत्रिका
(विश्वविद्यालय अनुदान आयोग के केयर लिस्ट में सम्मिलित)

प्रधान सम्पादक
**प्रो. मुरलीमनोहर पाठक**
कुलपति

सम्पादक
**प्रो. देवीप्रसाद त्रिपाठी**
आचार्य एवं अध्यक्ष

वास्तुशास्त्र विभाग
**श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय**
(केन्द्रीय विश्वविद्यालय)
नइ दिल्ली–110016

प्रकाशक-

**वास्तुशास्त्र विभाग**

श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय

(केन्द्रीय विश्वविद्यालय)

कुतुब सांस्थानिक क्षेत्र, नई दिल्ली-110016

**ISSN :- 0976-4321**

© प्रकाशक

संस्करण - 2023

मुद्रण वर्ष - 2024

मूल्य- ₹ 200/-

प्रकाशक की लिखित पूर्वानुमति के बिना इस ग्रन्थ के किसी भी अंश का अनुवाद या किसी भी रूप में उपयोग करना सर्वथा वर्जित है। शोधलेखों में लेखकों के स्वयं के विचार हैं। शोधलेख में किसी भी प्रकार का विवाद होने पर शोधलेखक स्वयं उत्तरदायी होगा।

मुद्रकः

**गणेश प्रिंटिग प्रेस**

दिल्ली-110016

फोन :9811663391/93

# पुरोवाक्

वेद विश्व की प्राचीनतम उपलब्ध ज्ञानराशि है।भारतीय ज्ञान परम्परा में वेदों को ही समस्त विद्याओं का मूल माना जाता है । वेदों में अध्यात्म के साथ-साथ विविध भौतिक विद्याओं के बीज भी निहित हैं । कालान्तर में बीज रूप में निहित विद्या विविध शास्त्रों के रूप में दृष्टिगोचर हुई । ये सभी शास्त्र और विद्याएं वैदिक पृष्ठभूमि पर ही पुष्पित और पल्लिवित हुई हैं ।जिनमें से आयुर्वेद- ज्योतिष- अर्थ- विमान- वास्तु- वनस्पति- खगोल- धर्म- मीमांसा- राजनीति- चित्र- साङ्ख्य-सङ्गीत- काव्य- तर्क- नाट्य- काम आदि शास्त्र तथा मापन-शब्द-वृक्षायुर्वेद- योग- आभूषण- सैन्य- मुद्राविनिमय-भाषाविज्ञान आदि प्रमुख वैज्ञानिक विद्याएं हैं, इन सभी का आधार वैदिक पृष्ठभूमि ही है। भारतीय ज्ञान परम्परा के इन समस्त शास्त्रों में से वास्तुशास्त्र का एक अन्यतम स्थान है क्योंकि इसका सम्बन्ध निवास से जुड़ा है, जो किसी भी प्राणी की मूलभूत आवश्यकता है । मानव रोटी, कपड़ा और मकान जैसी मूलभूत आवश्यकताओं के लिए आरम्भ से ही संघर्षवान् रहा है। इन तीनों की पूर्ति प्रकृति पर ही आश्रित है । शनैः शनैः विकास क्रम में मानव ने विस्तृत चिन्तन के पश्चात् निवास हेतु भवन निर्माण की एक अनुशासित प्रविधि का निर्माण किया । यहीं भवन-निर्माण के सिद्धान्त वास्तुशास्त्र के रूप में प्रख्यापित हुए । यह शास्त्र मूल रूप में अथर्ववेद के उपवेद स्थापत्यवेद के रूप में उद्भूत हुआ।[1]

ज्योतिष के संहितास्कन्ध तथा कल्प के शुल्वसूत्रों से भी वास्तुशास्त्र का गहरा सम्बन्ध है।ज्योतिष तथा कल्प वेदाङ्ग के अन्तर्गत वास्तुशास्त्र का समायोजन दिखाई देता है। वस्तुतः शुल्ब शब्द का अर्थ ही है रज्जु- जिसका प्रयोग यज्ञवेदी के मापनादि में किया जाता था । इन यज्ञवेदियों के निर्माण में वास्तुशास्त्र के जिन मापनादि सिद्धान्तों का प्रयोग किया गया,वही भव्य मन्दिरों के निर्माण में भी सहायक हुए। वास्तुशास्त्र भारतीय ज्ञान परम्परा में विकसित एक ऐसा शास्त्र है , जिसने स्थापत्य, शिल्प एवं चित्र शास्त्र के सिद्धान्तों को विकसित कर सम्पूर्ण मानव मात्र को उपकृत किया है।

वास्तुशास्त्र के प्रवर्त्तक आचार्यों से आरम्भ हुई इस आचार्य परम्परा को कालान्तर में अनेक आचार्यों ने अपनी साधना और श्रम से ओर सुदृढ किया। वास्तुशास्त्र के प्रवर्त्तक आचार्यों की संख्या के विषय में मतैक्यता नहीं दिखाई देती। मत्स्यपुराण में आचार्यों की संख्या 18 कही गई है।[2] जबकि अग्निपुराण[3] में २५, बृहत्संहिता[4] में 07, मानसार[5] में 32, हिन्दू साइन्स ऑफ आर्किटेक्चर[6] में 11 तथा विश्वकर्मवास्तुशास्त्र[7] में 15 वास्तुविदों (आचार्यों)

1. ऋग्यजुः सामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः । ---------- क्रमात्पूर्वादिभिर्मुखैः ॥ श्रीमद्भागवत.- 03/12/38-39
2. भृगुरत्रिर्वशिष्ठश्च ---------- तथा शुक्र बृहस्पतिः॥ मत्स्यपुराण,252/-4
3. अग्निपुराण, 39/2-5
4. बृहत्संहिता , अध्याय 53 और 57
5. मानसार, 68/ 5-9
6. वास्तुशास्त्र, भाग 1, हिन्दू साइन्स ऑफ आर्किटेक्चर, पृष्ठ 64
7. विश्वकर्मावास्तुशास्त्र, 18/ 1-3

का उल्लेख प्राप्त होता है । वास्तुशास्त्र के प्रमुख ग्रन्थों में दस ऐसे प्रमुख आचार्य है, जिनके द्वारा विरचित ग्रन्थ वास्तुशास्त्र के सर्वमान्य ग्रन्थ माने जाते है। तद्यथा[1] -अगस्त्य(अगस्त्य सकलाधिकार, अगस्त्य प्रोक्त सर्वाधिकार), कश्यप (काश्यपशिल्प), नारद (नारदसंहिता,नारदशिल्प),नग्नजित् (चित्रलक्षण), पिशुन(वास्तुविद्या), पराशर (वास्तुशास्त्र), विश्वकर्मा (विश्वकर्मशिल्प, विश्वकर्मपद्धति, विश्वकर्मप्रकाश, विश्वकर्मवास्तुशास्त्र, विश्वकर्मपुराण, विश्वकर्मसंहिता), सनत्कुमार (सनत्कुमार-वास्तु), सिद्धार्थ (सिद्धार्थपृच्छा, सिद्धार्थसंहिता), मय (मयमतम्, मयशिल्पशतिका, मयशिल्पशास्त्र-विधान, मयवास्तु, मयशिल्प) आदि ।

वास्तुशास्त्र के ये विविध आचार्य न केवल वास्तुशास्त्र में अपितु अन्य शास्त्रों के भी निष्णात विद्वान थे। इनके अनेक अन्य शास्त्रीय ग्रंथ भी प्राप्त होते हैं । इनमें से अधिकांश ग्रन्थ पूर्वमध्यकालीन अथवा इससे पूर्ववर्ती माने जाते हैं।[2] आज जब राष्ट्रिय शिक्षा नीति 2020 में भारतीय ज्ञान परम्परा तथा उसमें निहित विविध शास्त्रों के अध्ययन-अध्यापन तथा वर्तमान परिप्रेक्ष्य में उनके उपयोग पर अत्यधिक बल दिया गया है । सम्प्रति आवश्यक है कि वास्तुशास्त्र जैसे लोकोपयोगी शास्त्र के विविध पक्षों पर अनुसंधान कर समाज के समक्ष विषयों को उपस्थापित किया जाए। इससे इस शास्त्र में निहित निर्माण से सम्बन्धित विविध सिद्धान्त न केवल समाज के समक्ष आ सकेंगे अपितु प्रयोगात्मक दृष्टि से भी यह शास्त्र वर्तमान परिप्रेक्ष्य में भव्यता और दिव्यता पाकर उपकारक सिद्ध हो सकेगा। श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नई दिल्ली के वास्तुशास्त्र विभाग द्वारा वास्तुशास्त्र के मानक ग्रन्थों का अध्ययन- अध्यापन अत्यन्त मनोयोग से किया जा रहा है। इसी क्रम में यह विभाग शिक्षण एवं उच्च स्तरीय शोध सम्बन्धी गतिविधियों को करने में निरन्तर संलग्न है। इसी सातत्य में विभाग द्वारा वास्तुशास्त्रविमर्श नामक शोधपत्रिका का प्रकाशन विगत कई वर्षों से होता आ रहा है, जिनमें विद्वानों के गवेषणात्मक शोध आलेखों का प्रकाशन किया जाता है । एतदर्थ वास्तुशास्त्र के विभागाध्यक्ष प्रो.देवीप्रसाद त्रिपाठी एवं इस कार्य में लगे सभी आचार्यों को साधुवाद प्रदान करता हूं। सम्प्रति वास्तुशास्त्र विमर्श के इस षोडश पुष्प को विद्वज्जनों के करकमलों में समर्पित करते हुए मैं अत्यन्त हर्षित हो रहा हूँ । शमिति।

मार्गशीर्ष शुक्ल पूर्णिमा, वि.सं. 2080
दिनांक 26 दिसम्बर 2023 ई.

**प्रो. मुरली मनोहर पाठक**
कुलपति

1. Contribution to a bibliography of Indian art and aesthetics ( haridas ), page 54-73 , उद्धृत (रूपमण्डन भूमिका पृष्ठ ३-४ से )
2. स्वतन्त्रकलाशास्त्र, भाग १, पृ. ६०४

# सम्पादकीय

**माता भूमि पुत्रोऽहं प्रथिव्याः** ( अथर्ववेद भूमिसूक्त 12) भूमि मेरी माता है और मैं पृथिवी का पुत्र हूँ। भूमि के प्रादुर्भाव के सन्दर्भ में भारतीय दर्शन कहते हैं कि **तमः प्रधान विक्षेपशक्तिमदज्ञानोपहितचेतन्यादाकाश आकाशद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते** (वेदान्त सार 2.57) अर्थात् तम प्रधान विक्षेप शक्ति मद ज्ञानोपहित चैतन्य से आकाश, आकाश से वायु, वायु से अग्नि, अग्नि से जल, जल से पृथ्वी उत्पन्न हुई और प्रलयावस्था में पृथ्वी जल में, जल अग्नि में, अग्नि वायु में और वायु आकाश में लय होते जाएँगे । पृथिवी के उद्भव के पश्चात् पृथिवी पर रहने के लिए पौराणिक अवधारणा के अनुसार राजा पृथु ने सर्व प्रथम पृथिवी को समतल करके सुव्यवस्थित आवास की परिकल्पना सृष्टि कर्ता ब्रह्मा के समक्ष प्रस्तुत की। इस प्रस्तुतिकरण में राजा पृथु ने कहा कि हे भगवन, आपके कथनानुसार मैंने पृथिवी को ग्राम नगर आदि के निर्माण हेतु समतल कर दिया है अब आप मुझे आगे कार्य करने के लिए आदेश करें।

इसके अनन्तर ब्रह्मा जी ने निर्माणादि कार्य को पूर्ण करने की दृष्टि से अपने पूर्व मुख विश्वभू से विश्वकर्मा की, दक्षिणमुख विश्वविद् से मय की, पश्चिम मुख विश्वस्रष्टा से मनु की तथा उत्तर मुख विश्वस्थ से त्वष्टा को उपस्थापित किया । इसके पश्चात् ब्रह्मा जी ने अपने मानस पुत्रों को आदेश दिया कि आप लोग पृथ्वी पर जाकर राजा पृथु की अभिलाषा के अनुसार नगर, ग्राम एवं पुरों की पृथक पृथक रचना करें । विश्वकर्मा ने जगत्स्रष्टा ब्राह्मा को कहां कि मैं पृथ्वी पर जाकर अपनी बुद्धि से सुर, असुर, उरम एवं नागों के साथ ही पृथु और मनुष्यों के निवास के लिए सुन्दर पुर, नगर एवं ग्रामादि का निर्माण करूँगा ।

इस उद्देश्य की पूर्ति में विश्वकर्मा ने स्थपति की, मय ने सूत्रग्राही की, मनु ने तक्षक की तथा त्वष्टा ने बार्द्धकी को उत्पन्न किया अर्थात् इन लोगों ने अपने एक एक सहायक स्थपति, सुत्रग्राही, तक्षक एवं बार्धकी को क्रमशः नियुक्त किया जिससे कार्य सुगम हो और सभी प्रमुख कार्यों के विशेषज्ञ मिल जांय । जैसे पाषाण विशेषज्ञ, काष्ठविशेषज्ञ, धातु विशेषज्ञ, निर्माण विशेषज्ञ आदि। इन सभी के संयुक्त प्रयास से ही कोई निर्माण कार्य पूर्ण हो सकता है।

सृष्टि पञ्चभूतात्मक है ठीक इसी प्रकार मनुष्य का शरीर भी पाँच तत्त्वों (पृथ्वी, जल, तेज, वायु, आकाश) का ही सम्मिश्रण है। पृथ्वी पर किया जाने वाला कोई भी कार्य पाँच तत्त्वों पर ही आधारित होता है, पृथ्वी पर सूर्य की रश्मियों का प्रभाव, पृथ्वी का चुम्बकीय क्षेत्र, हवाओं की दिशा व उसका प्रभाव आदि कुछ ऐसे तथ्य हैं जिनका वास्तु शास्त्र की दृष्टि से विचार आवश्यक है। प्रातःकालीन सूर्य रश्मियाँ स्वास्थ्य के लिए सर्वाधिक महत्वपूर्ण होती हैं । चुम्बकीय क्षेत्र का परिज्ञान होने पर ही हमारे आचार्यों ने उत्तरदिशा की ओर सिर करके सोने के लिए निषिद्ध कहा क्योंकि चुम्बकीय क्षेत्र हमारे शरीर को सर्वाधिक प्रभावित करता है। वस्तुतः वास्तुपुरुष पृथ्वी की चुम्बकीय शक्ति और विभिन्न बलधाराओं का उठता स्वरूप है जिसे सन्तुलित करने में ग्रहों, नक्षत्रों, वायु, जल, ताप आदि प्राकृतिक शक्तियों ने महत्त्वपूर्ण भूमिका निभाई परन्तु यह चेतना का स्वरूप है जो बुद्धि से नहीं भावना से देखा

जाता है। पृथ्वी सतह की चेतना को हमारे पूर्वजों ने चैतन्य वास्तु पुरुष के रूप में देखा, समझा, पूजा और तदनुकूल भवन, नगर आदि रचनायें की ।

भौतिकविद् इस विश्व को अविलगित ऊर्जा प्रतिकृतियों का गतिशील जाल (Dynamic web of inseparable energy patterns) मानते हैं । इस समग्र पृथ्वी पर वास्तुपुरुष का एक रूप और प्रत्येक व्यष्टि रूप वास्तु में वास्तु पुरुष का एक अन्य रूप, इस प्रकार के बृहद् से बृहद् एवं सूक्ष्म से सूक्ष्म वास्तु रूपों के वर्णन से यह द्योतित होता है कि जैसे हमारा सम्पूर्ण शरीर एक सजीव इकाई है परन्तु उसे बनाने वाली सूक्ष्म कोशिकायें भी अपने में एक चैतन्य इकाईयां हैं। उनकी प्रतिक्रियायें समग्र शरीर की प्रतिक्रिया होती है। यही एकात्मता का भाव वास्तु में भी प्रधान है। सूर्य, चन्द्र, ग्रह, नक्षत्र, आदि सभी के ऊर्जा प्रभाव के कारण वास्तुरचना अनुकूल और प्रतिकूल परिणाम देती है इसीलिए वास्तुशास्त्र ने जीवन में इन सभी बलधाराओं और ऊर्जा प्रभावों को देवताओं के भिन्न-भिन्न नामों और रूपों से देखा, समझा और पूजा है ।

भारतीय चिन्तन धारा में ब्रह्माण्डोत्पत्ति के अंतर्गत जहाँ ग्रह, नक्षत्र, तारे, आकाशगंगाएँ, उल्काएँ, धूमकेतु, देव, दैत्य, मानव, आदि समस्त जीव एवं भूर्भुवादि चतुर्दश लोक समन्वित भाव से होते हैं इसे ब्रह्माण्ड या विकल्प से सृष्टि कहा गया है। ब्रह्माण्ड (सृष्टि) का उद्भव वास्तु की आदि घटना है जिसे शिव एवं अन्धकासुर के संग्राम के रूप में पुराणों में वर्णन मिलता है । आदिकाल से ही मनुष्यों के पास विश्वोत्पत्ति के रहस्य को जानने की मुख्यतः दो प्रविधियाँ उपलब्ध थीं। जिसमें पहली अध्यात्म विज्ञान तथा दूसरी भौतिक विज्ञान । आध्यात्मिक विज्ञान में योग एवं दिव्य दृष्टि के द्वारा समस्त ज्ञान प्राप्त होता था। समग्र ज्ञान के लिए आध्यात्मिक विधि सर्वाधिक उपयुक्त एवं समीचीन है क्योंकि आधि-भौतिकविधि (फिजिकल टेक्नोलाजी) के द्वारा तो केवल पंचज्ञानेन्द्रिय गम्य ज्ञान ही प्राप्त हो सकता है। इसके इतर विषयों का ज्ञान इस प्रविधि के द्वारा सम्भव नहीं है। यह ध्रुव सत्य है क्योंकि इस प्रविधि का अधिकतर ज्ञान परीक्षण शालाओं में मिलता है जहाँ परीक्षणशालाओं (प्रयोगशालाओं) की सीमा समाप्त हो जाती है वहीं से प्रारम्भ होती है अध्यात्म विज्ञान की सीमा । इसलिए यह अध्यात्मक विज्ञान सामान्य के लिए अगम्य हो जाता है। अध्यात्म विज्ञान ने **"यत पिण्डे तद ब्रह्माण्डे"** के सिद्धान्त के द्वारा ही इस जगत के रहस्य को समझा और समझाने का भी प्रयत्न किया।

वैदिक साहित्य की भाषा परोक्ष, प्रतीकात्मक एवं संकेतात्मक हैं। अलंकारों एवं रूपकों से परिपूर्ण है। सामान्य भाव में इन मन्त्रों के अर्थ एवं भाव समझ में नहीं आ पाते हैं क्योंकि वेदों के अपने प्रतीक (सिम्बल) हैं। वेद की परिकल्पनाओं के प्रतिपादन में उन प्रतीकों का महत्त्वपूर्ण योगदान है। वेद के भाव एवं अर्थ को समझने के लिए उसके प्रतीकों (सिम्बलों) को समझना आवश्यक है अन्यथा हम वेद-वर्णित परिकल्पना को नहीं समझ सकते हैं।

वेदों में निहित ज्ञान ही किसी न किसी रूप में आज भी समाज में परम्पराओं के रूप में दिखाई देता है। वेदों से ही शास्त्रों का उदय हुआ, वास्तुशास्त्र भी इन्हीं में से एक है जो कि अथर्ववेद के उपवेद स्थापत्य वेद के रूप में परिगणित है । वास्तोष्पति को हमारे वैदिक ऋषियों ने वास्तुपुरुष को घर की चेतना तथा आध्यात्मिक स्वरूप का प्रतिरूप मानकर उसकी उपासना पर जोर दिया है । वास्तुशास्त्र प्राकृतिक प्रभावों का अध्ययन कर जीवन को

सुविधा पूर्ण. सुखमय एवं सुरक्षित बना कर समाज कल्याण की उदात्त भावना को प्रदर्शित करता है । वास्तुशास्त्र में वर्णित वास्तुपुरुष व 45 देवता विविध प्रकार की प्राकृतिक शक्तियों के ही प्रतीक हैं जो कि वास्तु को एक चैतन्य स्वरूप प्रदान करते हैं ।

वास्तुशास्त्र के स्वतन्त्र ग्रन्थों के अनुसार सामुद्रिक शास्त्र, गणित शास्त्र, ज्योतिष शास्त्र, छन्द शास्त्र, भूमिगत जल ज्ञान हेतु सिरा ज्ञान, शिल्पशास्त्र, यन्त्रकर्म तथा सभी प्रकार की विधियों का समावेश वास्तुशास्त्र में हो जाता है, जिनका ज्ञान स्थपति को होना चाहिए । यथा –

**सामुद्रं गणितं चैव ज्योतिषं छन्द एव च ।**
**सिराज्ञानं तथा शिल्पं यन्त्रकर्मविधिस्तथा ॥**
**एतान्यङ्गानि जानीयाद् वास्तुशास्त्रस्य बुद्धिमान् ॥**

समरांगणसूत्रधार, 44/03-04,

भारतीय स्थापत्य विशुद्ध रूप में आर्यों एवं अनार्यों दोनों की देन है। आर्य अलंकृति विहीन सीधी सादी रचनाओं के तथा अनार्य अलंकृति से ओत प्रोत विशालकाय लक्षण एवं चित्रणादि से सुशोभित कला के प्रेमी थे। वस्तुतः भारतीय चिन्तन परम्परा की दृष्टि से स्थापत्य का मात्र भूमण्डल ही नही अपितु सम्पूर्ण विश्व का निर्माण ही एक प्रतिपाद्य विषय है। इस विश्व की कोई भी निर्मिति एक वास्तु है। वास्तु का सम्बन्ध वस्तु एवं वस्तुओं से है। वस्तुओं को वास्तु में परिणत करने के लिए ही स्थपति (विश्वकर्मा) की आवश्यकता हुई ।

राजा पृथु का गोदोहन वृतान्त सर्वविदित है। गो यहाँ पृथिवी की संज्ञा है। दोहन से राजा पृथु ने भूमि को ग्राम, पुर, नगर निवेश के उचित बनाया। यह मात्र कथा नहीं है अपितु प्राचीन भूगर्भ विज्ञान (Geology) एवं भूगोल (Geography) का वास्तविक वृत्तान्त है। पृथिवी गोल है आदि में यह उष्ण थी । यथा **आग्नेयी पृथिवी, आग्नेयोऽयं लोकः, अग्निगर्भा पृथिवी** है। पौराणिक आख्यानों के अनुसार इसे संवर्तक एवं आवर्तक आदि मेघों ने घनघोर वर्षा कर शीतल किया और तभी पृथ्वी पर वनस्पतियों, जन्तुओं, और मानवों का क्रमशः विकास हुआ।

यह मात्र आधुनिक ज्ञान की उपज नहीं है। अपितु हमारे प्राचीन ऋषि एवं आचार्य इस प्रकार के तथ्यों से पूर्ण परिचित थे। ऋग्वेद में सूर्य की स्तुति में जिन विशेषणों का प्रयोग किया गया है वह सब सूर्य रश्मियों की ही व्याख्या है। आज के परिप्रेक्ष में ये कहें कि सौर ऊर्जा का सर्वाधिक उपयोग करने की बात इससे पूर्व हमारे प्राचीन आचार्य स्वीकार कर चुके हैं। प्राचीन वैदिक साहित्य में सूर्य को **सप्तहरित, सप्ताश्व व सप्तरश्मि** कहा गया है । आज के विज्ञान ने भी सूर्य की सात रश्मियों की ही सत्ता स्वीकार की है। हरित शब्द 'हृ' धातु से निष्पन्न होता है। यास्क ने अपने निघण्टु में हरित का अर्थ आदान प्रदान करने वाला कहा है। सूर्य रश्मियाँ जैसे आदान करती हैं वैसे ही प्रदान भी करती हैं। ऋग्वेद में पर्जन्य, वरुणादि तथा आगे चलकर वास्तुपद विन्यास में जिन देवों की प्रतिष्ठा हुई वे वस्तुतः देदीप्यमान् सूर्य देव की रश्मियों के ही नाम हैं और इनके वर्ण, गुणधर्म की दिग् देश काल के अनुरूप व्याख्या है।

वास्तुशास्त्र के ग्रन्थों में सृष्टि, भूगोल एवं सौरमण्डल का वर्णन विस्तृत रूप में उपलब्ध होता है । कुछ लोग

इसे नहीं समझ पाते हैं कि वास्तु के ग्रन्थों में इसे क्यों दिया गया? तथा इसकी क्या संगति है? भारतीय वास्तु का क्षेत्र बहुत व्यापक है। भारतीय मनीषियों ने वास्तु के आरम्भ में की जाने वाली वास्तुशास्त्र के पिण्डसाधन, आयादि विचार, पञ्चाङ्ग विचार एवं लग्न विचारादि प्रक्रिया को अनिवार्य माना, क्या ये विचारणीय विषय नहीं हैं ? अष्टाङ्ग वास्तु में ज्योतिष का मुख्य स्थान है। भवन निर्माण केवल एकाङ्गी कला एवं कृत्य नहीं है अपितु समन्वित एवं सर्वव्यापक प्रक्रिया है। इस उद्देश्य से उत्तरोत्तर वास्तुशास्त्र पर अनेकों स्वतन्त्र ग्रन्थ प्रकाशित हुए। इन सभी ग्रन्थों में हर तरह के वास्तु की चर्चा ही नहीं अपितु वास्तु के उद्देश्यों एवं आवश्यकता पर विशेष रूप से प्रकाश डाला गया।

अतः वर्तमान परिप्रेक्ष्य में वास्तुशास्त्र की नित्य उपयोगिता को ध्यान रखते हुए वास्तुशास्त्र विभाग इस शास्त्र के सैद्धान्तिक एवं प्रायोगिक पक्षों पर पठन पाठन एवं शोध में सतत क्रियाशील है। इसी दृष्टिकोण से विगत कई वर्षों से वास्तुशास्त्र विभाग विद्वान अध्येताओं व शोधच्छात्रों के शोधपूर्ण निबन्धों से सुसज्जित वास्तुशास्त्रविमर्श नामक पत्रिका का प्रकाशन करता आ रहा है । इस वास्तुशास्त्रविमर्श के षोडश पुष्प के प्रकाशन के शुभावसर पर मैं सर्वप्रथम विश्वविद्यालय के संस्कृत एवं संस्कृति समुपासक यशस्वी कुलपति प्रो.मुरलीमनोहर पाठक जी के प्रति सादर कृतज्ञता ज्ञापित करता हूँ, जिनके संरक्षकत्व में यह पुष्प सुधी पाठकों के करकमलों में समर्पित हो रहा है । इसी क्रम में शोध एवं प्रकाशन समिति के सभी सदस्यों को हार्दिक धन्यवाद ज्ञापित करता हूँ, जिनके सहयोग व परामर्श से वास्तुशास्त्रविमर्श का यह षोडश पुष्प प्रकाशित हो सका। टंकण एवं मुद्रणकार्य में संलग्न सभी सहयोगी सुहृज्जनों के प्रति भी हार्दिक आभार प्रकट करता हूँ । आशा है कि अवश्य ही यह षोडश पुष्प अध्येताओं, जिज्ञासुओं एवं शोधछात्रों के लिए उपयोगी सिद्ध होगा । शमिति ।

**प्रो. देवीप्रसाद त्रिपाठी**
अध्यक्ष,
वास्तुशास्त्र विभाग

# शोध एवं प्रकाशन समिति

| | | |
|---|---|---|
| 1. | प्रो. देवीप्रसाद त्रिपाठी, वास्तुशास्त्र विभागाध्यक्ष | अध्यक्ष |
| 2. | प्रो. अशोक थपलियाल | सदस्य |
| 3. | डॉ. देशबन्धु | सदस्य |
| 4. | डॉ. प्रवेश व्यास | सदस्य |
| 5. | डॉ. योगेन्द्र कुमार शर्मा | सदस्य |
| 6. | डॉ. दीपक वशिष्ठ | सदस्य |
| 7. | डॉ. नवीन पाण्डेय | सदस्य |

# शोध लेख मूल्यांकन समिति

1. **प्रो. देवीप्रसाद त्रिपाठी** — **अध्यक्ष**
   पीठप्रमुख-वेदवेदाङ्ग एवं वास्तुशास्त्र विभागाध्यक्ष
   श्रीला.ब.शा.रा.सं.वि.वि, नई दिल्ली
2. **डॉ. दिनेश प्रसाद सकलानी** — **सदस्य**
   निदेशक, राष्ट्रीय शैक्षिक अनुसन्धान और प्रशिक्षण परिषद्, नई दिल्ली
3. **डॉ. गोपाल प्रसाद शर्मा** — **सदस्य**
   आचार्य, वेदविभाग, श्रीला.ब.शा.रा.सं.वि.वि, नई दिल्ली
4. **डॉ. विष्णुपद महापात्रा** — **सदस्य**
   आचार्य, न्यायदर्शन विभाग, श्रीला.ब.शा.रा.सं.वि.वि नई दिल्ली
5. **प्रो. अशोक थपलियाल** — **सदस्य**
   आचार्य, वास्तुशास्त्रविभाग, श्रीला.ब.शा.रा.सं.वि.वि, नई दिल्ली
6. **डॉ. देशबन्धु** — **सदस्य**
   सहायकाचार्य, वास्तुशास्त्र विभाग, श्रीला.ब.शा.रा.सं.वि.वि, नई दिल्ली
7. **डॉ. प्रवेश व्यास** — **सदस्य**
   सहायकाचार्य, वास्तुशास्त्र विभाग, श्रीला.ब.शा.रा.सं.वि.वि, नई दिल्ली

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| 1. | वास्तुशास्त्रीयग्रन्थानुसारं वृक्षविषयकसमीक्षणम् | **डॉ. छबिलालन्यौपानेः**<br>सहायक-प्राचार्यः (दर्शनम्)<br>नागार्जुन-उमेश-संस्कृतमहाविद्यालयः<br>(का.सिं.द.सं.विश्वविद्यालयस्याङ्गीभूतः)<br>तरौनीग्रामः, दरभङ्गाजनपदः<br>बिहारराज्यम् – 847233 | 01 |
| 2. | वास्तुविद्या-मनुष्यालयचन्द्रिकादृशा द्वारविन्यासक्रमे दोषाः निवारणोपायाश्च | **डॉ. गणेशकृष्णभट्टः**<br>सहायकाचार्यः (अतिथिः)<br>ज्योतिषविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः,<br>गुरुवयूर परिसरः, त्रिशूरः, केरल प्रदेशः | 13 |
| 3. | ग्रामस्य मुख्यद्वारम् | **डॉ. अश्वनीकुमारः**<br>सहायकाचार्यः (अतिथिः)<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आ.प्र.) | 17 |
| 4. | लङ्कादेशस्य स्थानपरिकल्पनायां भेदः वर्तमानस्थितिश्च | **अंशुलकुमारदुबे**<br>प्राध्यापकः ज्योतिषशास्त्रम्<br>रा.वरि. उपा.सं.विद्यालय,<br>बौंली (सवाईमाधोपुरम्), राजस्थानम् | 21 |
| 5. | वासगृहे आन्तरिकप्रकोष्ठविन्याससम्बद्धाः वास्तुदोषाः, तेषां निवारणोपायाश्च | **गिरीशभट्टःबि,** शोधच्छात्रः,<br>**निदेशकः - प्रो. ए. श्रीपादभट्टः,**<br>आचार्यः, राष्ट्रियसंस्कृतविश्वविद्यालयः,<br>तिरुपतिः, आ.प्र. | 26 |
| 6. | भारतीयमन्दिराणां पर्यावरणेन सह सम्बन्धः | **मेघा-शर्मा,** शोधच्छात्रा,<br>**निदेशक - प्रो. बिहारीलालशर्मा**<br>ज्योतिष विभागः,<br>श्री ला.ब.शा.रा.स.वि. वि., नई दिल्ली | 32 |

| | | | |
|---|---|---|---|
| 7. | श्रीमद्रामायणदिशा नगरवास्तुविचारः | **ए. श्रीनिवासशर्मा,** शोधच्छात्रः,<br>**निर्देशकः- प्रो. ए.श्रीपादभट्टः,**<br>ज्यौतिष-वास्तुविभागः<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः | 39 |
| 8. | वाल्मीकिरामायणानुसारं गृहकक्षाणां समीक्षा | **श्रीमती ज्योतिशर्मा,** शोधच्छात्रा,<br>**निदेशकः - प्रो. अशोकथपलियालः,**<br>आचार्यः, वास्तुशास्त्रविभागः<br>श्री ला.ब.शा.रा.स.वि. वि., नवदेहली | 45 |
| 9. | आमेरदुर्गस्थशिलादेवीमन्दिरस्य स्थापत्यकला | **प्रियाकौशिकः,** शोधच्छात्रा<br>**निदेशक- डॉ. योगेन्द्रकुमारशर्मा,**<br>सहायकाचार्यः वास्तुशास्त्रविभागः<br>श्री ला.बा.शा.रा.सं.वि.वि., नई दिल्ली | 50 |
| 10. | द्वार-मर्मस्थानयोः सम्बद्धाः वास्तुदोषाः,<br>तेषां निवारणोपायाश्च | **अनिलकुमारदेसायिः,** शोधच्छात्रः,<br>**निर्देशकः- डॉ. कृष्णकुमारभार्गवः,**<br>ज्योतिष-वास्तुविभागः,<br>राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः | 63 |
| 11. | राहुमुखविचार का दार्शनिक एवं<br>वैज्ञानिक विमर्श | **प्रो. वासुदेव शर्मा**<br>पूर्व निदेशक,<br>केन्द्रीय संस्कृत विश्वविद्यालय,<br>श्री रणवीर परिसर, जम्मू | 70 |
| 12. | वास्तु और पर्यावरण | **प्रो. अमित कुमार शुक्ल**<br>ज्योतिष विभागाध्यक्ष,<br>सम्पूर्णानन्द संस्कृत विश्वविद्यालय,<br>वाराणसी | 73 |
| 13. | अन्तरिक्ष नाड़ी का अंशानुक्रम विभाग | **विद्यावाचस्पति प्रो. सुन्दरनारायणझा**<br>आचार्य वेदविभाग,<br>श्री ला.ब.शा.रा.सं.विश्वविद्यालय,<br>नवदेहली-16 | 81 |

| | | | |
|---|---|---|---|
| 14. | मन्दिर निर्माण के आधारभूत सिद्धान्त | **डॉ. सुभाष पाण्डेय**<br>सहाचार्य, ज्योतिष विभाग,<br>काशी हिन्दू विश्वविद्यालय, वाराणसी | 100 |
| 15. | श्रीमहाकालज्योतिर्लिङ्ग का सामाजिक, सांस्कृतिक एवं वास्तुशास्त्रीय दृष्टि से अध्ययन | **डॉ. देशबन्धु**<br>सहायकाचार्य एवं निदेशक,<br>**डॉ. मन्जुला मौर्या-** शोध सहायिका<br>**डॉ. जगदीश कुमार-** शोध सहायक<br>बृहच्छोध परियोजना,<br>वास्तुशास्त्र विभाग,<br>श्री ला.ब.शा.रा.सं.वि.वि., नई दिल्ली | 106 |
| 16. | महाभारतीय वास्तुसन्दर्भविमर्श | **डॉ. शुभम् शर्मा**<br>ज्योतिर्विज्ञान विभाग<br>महर्षि पाणिनि संस्कृत एवं<br>वैदिक विश्वविद्यालय, उज्जैन | 125 |
| 17. | गृहवास्तु के शास्त्रीय पक्ष | **डॉ. ब्रह्मानन्द मिश्रा**<br>सहायकाचार्य,<br>समन्वयक ज्योतिषशास्त्र विद्याशाखा<br>केन्द्रीय संस्कृत विश्वविद्यालय,<br>श्रीरघुनाथ कीर्ति परिसर,<br>देवप्रयाग, उत्तराखण्ड | 133 |
| 18. | वेध विचार | **डॉ. निगम पाण्डेय**<br>सहायक प्राचार्य, ज्योतिष<br>धर्म समाज संस्कृत महाविद्यालय, मुजफ्फरपुर | 142 |
| 19. | वास्तुशास्त्रीय नगरयोजना में अन्तरापण | **नवीन कुमार झा**<br>उप-प्राध्यापक<br>नेपाल संस्कृत विश्वविद्यालय वाल्मीकि विद्यापीठ<br>प्रदर्शनीमार्ग काठमान्डौं नेपाल | 150 |
| 20. | मयमत के परिप्रेक्ष्य में भूमि-चयन एवं परीक्षण | **डॉ. रीता गुप्ता**<br>सहायकाचार्या, संस्कृत विभाग<br>इन्दिरा गाँधी मुक्त विश्वविद्यालय, नई दिल्ली | 157 |

| | | | |
|---|---|---|---|
| 21. | वैदिक साहित्य में वास्तु विमर्श | **डॉ. कान्ता धनखड़**<br>सहायक- आचार्या, संस्कृत विभाग,<br>मुक्त शिक्षा विद्यालय, दिल्ली विश्वविद्यालय, दिल्ली<br>**डॉ. उमाशंकर**<br>सह-आचार्य, संस्कृत-विभाग,<br>दिल्ली विश्वविद्यालय, दिल्ली | 162 |
| 22. | भास के नाटकों में वास्तु तत्त्व | **डॉ. राजश्री दाश**<br>सहायक- आचार्या, साहित्य विभाग<br>श्रीजगन्नाथ संस्कृत विश्वविद्यालय, श्रीविहार, पुरी | 166 |
| 23. | गृहनिर्माण हेतु खात परीक्षण | **डॉ. रतनकुमार पाण्डेय**<br>सहायकाचार्य, ज्योतिष विभाग<br>के.सं.वि.वि, श्रीरणवीरपरिसर,जम्मू | 175 |
| 24. | Harmony of Modern Science and Ancient Wisdom: Dr. Tony Nader's Contributions to Indian Traditional Knowledge | **Dr. Rajesh Naithani**<br>Himalayiya University, Dehradun<br>**Prof. Devi Prasad Tripathi**<br>SLBSN Sanskrit University, New Delhi | 181 |

# वास्तुशास्त्रीयग्रन्थानुसारं वृक्षविषयकसमीक्षणम्

– डॉ. छबिलालन्यौपानेः

निवासाय उपयुक्तस्थानस्य चयने सहयोगो वास्तुशास्त्रस्योद्देश्यमस्ति। 'वास्तु'शब्दोऽयं निवासार्थकाद् 'वस्'धातोः 'तुण्'प्रत्यये कृते सति निष्पन्नो भवति। अथवा यस्मिन् शास्त्रे भूमेः, निवासाय भूमिचयनादीनां च नियमानां प्रतिपादनमस्ति तच्छास्त्रमेव वास्तुशास्त्रमित्युच्यते। वास्तुशब्दान्तर्गतं गृहम्, पुरम्, दुर्गम्, प्रासादः, भवनम्, क्षेत्रम्, नगरञ्चादि अनेकाः रचनाः समागच्छन्ति। विश्वस्य प्राचीनतमे ज्ञाने तथा च भारतीयाध्यात्मिकद-र्शनचिन्तनपरम्परामूलस्रोतसि वेदे भारतीयजीवनदर्शनस्य उत्कर्षं तथा सांस्कृतिकविकासस्य मणिमञ्जूषा विद्यते। वेदस्य जाज्वल्यमानकिरणप्रभावाद् भारतं जगद्गुरुः आसीत्, अस्ति च। वेदे मानवीयकार्यक्षेत्रे व्यवहृतस्य कलायाः, वास्तुविद्यायाः, स्थापत्यनिर्माणस्य च विधिरपि समुचितरूपेण विवेचितः। सुखमय-आरोग्यमय-जीवनयापनस्य शैली व्यवस्था च तत्र विशदरूपेण वर्णिता अस्ति। प्राचीनकाले वास्तुशास्त्रमिदं स्थापत्यवेदमिति नाम्ना प्रसिद्धमासीत्। तत्र निवासाय गृहनिर्माणम्, जीवनार्थम् आयुर्विज्ञानम्, मनोरञ्जनार्थं संगीत-नृत्यशास्त्रं तथा सामाजिकसंगणनार्थं तत्सम्बन्धितानामुपवेदानामपि कल्पना दरीदृश्यते। चत्वारो वेदाः सन्ति। तेषु अथर्ववेदस्य उपवेदः स्थापत्यवेदो वर्तते। अस्य स्थापत्यवेदस्याभिप्रायो निवासयोग्या स्थापनैव। वस्तुतः भारतीयवास्तुविद्यायाः उद्गमः संसारस्य प्राचीनतमग्रन्थाद् ऋग्वेदाद् भवति। तत्र वास्तोष्पतेः प्रार्थनायाम्–

**वास्तोंष्पते प्रतिं जानीह्यस्मान्त्स्वांवेशो अंनमीवो भंवा नः।**
**यत्त्वेमंहे प्रति तन्नों जुषस्व शं नों भव द्विपदे शं चतुंष्पदे॥**[1]

इति एको मन्त्रो मिलति। मन्त्रार्थश्च – हे वास्तोष्पते! त्वम् अस्मान् जानीहि। गृहं नो नीरोगं कारय। यद्धनं वयं त्वत् कामयामहे तन्नो यच्छ। द्विपदां चतुष्पदां च न कल्याणकृद् भव। **भावार्थश्च – ये मनुष्यास्सर्वतोद्वारं पुष्कलावकाशं गृहं निर्माय तत्र वसन्ति रोगरहिता भूत्वा स्वेभ्यश्चान्येभ्यश्च सुखं प्रयच्छन्ति ते सर्वेषां मङ्गलप्रदा भवन्ति।** एतदतिरिच्य अस्य वास्तुशास्त्रस्य पूर्णः तथा समुचितो विस्तारः अथर्ववेदेऽपि दृश्यते। तत्र गृहनिर्माणस्य सिद्धान्ताः विधयश्चापि विस्तृतरूपेण विवेचिताः सन्ति।

यथा शरीरावयवेषु चक्षोः स्थानं सर्वोत्कृष्टं भवति, तथैव षट्सु वेदाङ्गेषु ज्यौतिषशास्त्रस्य महत्त्वमपि वर्तते। कस्यापि मानवस्य शरीरं चेत् सर्वावयवयुक्तं किन्तु नेत्ररहितं तदा सः स्वजीवनस्य पूर्णानन्दं न प्राप्नोति। तथैव शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दसां मर्मज्ञः विद्वान् यदि ज्यौतिषशास्त्रस्य अध्ययनं न करोति तर्हि सोऽपि नेत्रविहीनः प्राणीव सर्वेषु वैदिककार्येषु सर्वदा अयोग्यः सिद्ध्यति। भास्कराचार्यैरुक्तम् –

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**

---

1. ऋग्वेदः ७.५४.१

**संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः॥**[1]

यथा - वेदपुरुषस्याङ्गरूपेण ज्यौतिषशास्त्रं स्वीक्रियते। तथैव ज्यौतिषशास्त्रस्याङ्गरूपेण स्कन्धरूपेण वा वास्तुशास्त्रं स्वीक्रियते। ज्यौतिषशास्त्रं यथा जनानां भूत-भविष्य-वर्तमानविषयाणां फलनिर्धारणे सहयोगं करोति, तथैव वास्तुशास्त्रमपि लोकानां सुखशान्त्यारोग्याभयनिवासाय भूमेः शुभाशुभत्वनिरूपणे आवासीयवास्तुनिर्माणे व्यवसायकार्यक्षेत्रस्य विधेर्निर्धारणे धार्मिककार्यक्षेत्रस्य (वापी-कूप-तडाग-वाटिका-देवमन्दिर-मठ-आश्रमादीनाम्) च निर्माणे प्रयतते। अनेन वास्तुशास्त्रमाध्यमेन धर्मार्थकामाः यशश्च सिद्ध्यति। वास्तुशास्त्रीयग्रन्थेषु वास्तुशास्त्रसम्बद्धाः विविधाः विषयाः विवेचिताः सन्ति। तेषु ग्रन्थेषु विवेचितानां वृक्षविषयकविचाराणां समीक्षणं शोधपत्रेऽस्मिन् प्रस्तूयते।

तथा च **दिक्षु च वृक्षान् समादधेत्**[2] इत्युक्तरीत्या गृहस्य परिसरे सर्वासु दिक्षु वृक्षाः समारोपणीयाः। "कस्यां दिशि को वृक्षः समारोपणीयः" इति विषये वास्तुशास्त्रे यत्र तत्र प्रमाणानि प्राप्यन्ते। प्राधान्येन वृक्षाश्चतुर्विधा भवन्ति। अन्तस्साराः, बहिस्साराः, उभयतस्साराः, निस्साराश्चेति। तत्र पनसप्रभृतयो वृक्षाः अन्तस्साराः, ताल-नालिकेरप्रभृतयो बहिस्साराः, चिञ्चादयो वृक्षाः उभयतस्साराः, सप्तच्छदप्रभृतयः उभयतोऽपि निस्सारा भवन्ति। इत्थं चतुर्विधेषु वृक्षेषु अन्तस्सारवृक्षाः आरामस्य मध्यभागे अथवा गृहं परितः आदौ योज्याः। ततः परं बहिस्साराः तदुत्तरमुभयतस्सारा अन्ते च उभयतो निस्साराश्च वृक्षा योजनीयाः। विस्तरेण वक्तव्यं चेत् – प्राच्यां दिशि पनसः श्रेष्ठः, क्रमुको याम्ये, पश्चिमे नालिकेरः, उत्तरस्यां भूतवृक्षो नागवृक्षश्च विद्यते चेद्धन्यो भवति। एवमेव केसरवृक्षः प्राच्याम्, तिन्त्रिणी अवाच्याम्, तालवृक्षश्च प्रतीच्यां श्रेष्ठो भवति। तथैव अन्तस्सारादयः तत्तत्स्थानेषु श्रेष्ठा भवन्ति।[3]

**दिग्वशाच्छुभाशुभवृक्षविचारः** – वास्तुभूमेः शुभाशुभफलस्य विचारो वृक्षस्याधारेणापि निरूपणं भवति। यथा – पूर्वस्यां दिशि अश्वत्थवृक्षाः, दक्षिणस्यां दिशि उदुम्बरवृक्षाः, पश्चिमस्यां दिशि वटवृक्षाः, उत्तरस्यां दिशि पलाशवृक्षाश्च क्रमशः श्रेष्ठफलप्रदायकाः भवन्ति परन्तु यदि वृक्षाणां स्थितिः विपरीतदिशि क्रमतो भवेत्तर्हि एते वृक्षाः न शुभफलं प्रयच्छन्ति। यथा – पूर्वदिशि वटवृक्षाः, दक्षिणदिशि पलाशवृक्षाः, पश्चिमदिशि अश्वत्थवृक्षाः, उत्तरदिशि उदुम्बरवृक्षाश्च वर्ज्याः सन्तीति। वास्तुभूमौ चतसृषु दिक्षु वृक्षवशाच्छुभाशुभफलविचारसमये ध्यातव्यं यदि पूर्वस्यां दिशि वटवृक्षो भवेत्तदा तत्र अग्निकारणाद् भयमुत्पद्यते। एवं यदि दक्षिणदिशि पलाशवृक्षाः भवेयुस्तर्हि प्रमादकारकं स्यात्। यदि पश्चिमदिशि अश्वत्थवृक्षाः स्युस्तर्हि शस्त्राद् भयं भवति। एवं यदि उत्तरदिशि उदुम्बरवृक्षाः स्युस्तदा उदरसम्बन्धिरोगात् पीडा भवेदिति।[4]

**वास्तुप्रदीपानुसारं तावत्** – क्षीरिणो वृक्षाः – वटाश्वत्थरक्तपुष्पाः, कण्टकिनः, शाल्मली(सेमल),

---

1. सिद्धान्तशिरोमणिः ग्रहगणिताध्यायः - ११
2. वास्तुविद्या ५.१५
3. पनसः प्राच्यां श्रेष्ठः क्रमुको याम्येऽथ पश्चिमे केरः। सोमे चूतो धन्यो नागस्तत्रैव केसरः प्राच्याम्॥
   तिन्त्रिण्युदिता याम्ये छत्री श्रेष्ठोऽथ पश्चिमे कथितः। अन्तःसारा वृक्षा यदि सन्ति ह्यन्तरेव सन्तु च ते॥ वास्तुविद्या ५.१६-१७
4. अश्वत्थः पूर्वतो धन्यो दक्षिणस्यामुदुम्बरः। न्यग्रोधः पश्चिमे श्रेष्ठः प्लक्षोऽप्युत्तरतः शुभः॥
   न्यग्रोधः पूर्वतो वर्ज्यो दक्षिणे प्लक्ष एव च। अश्वत्थः पश्चिमे भागे ह्युत्तरे चाप्युदुम्बरः॥
   अश्वत्थोऽग्निभयं कुर्यात् प्लक्षः कुर्यात् प्रमादकम्। न्यग्रोधः शस्त्रसम्पातं कुक्षिरोगमुदुम्बरः॥ वास्तुविद्या २.३३-३५

प्लक्षः, उदुम्बरः च अग्निकोणे अशुभा भवन्ति, पीडां मृत्युं च प्रयोजयन्ति। पुन्नागः, फलिनो वृक्षाः, निम्बः, दाडिमः, अशोकः, जाती, नागकेसरः, जपा, केसरः जयन्ती, चन्दनः, वचा, अपराजिता, मधूकः, बिल्वः, आम्रः, भृङ्गः, नागरः, नारिकेलः चैते वृक्षाः सर्वदिक्षु शुभाः भवन्ति।[1]

**गृहे ग्राह्याग्राह्यकाष्ठविचारः** – गृहे काष्ठस्य प्रयोगेण द्वारनिर्माणं गवाक्षानां निर्माणं शयनासनादीनां च निर्माणं भवति। अतः काष्ठं तु सुदृढं शुभदं च स्यादित्यर्थं काष्ठचयनाय वृक्षाणां शुभाशुभत्वं विचार्यते। यतः सर्वेषां वृक्षाणां काष्ठं तेषां गुणधर्मितानुसारेण ग्राह्यं न भवति। अपि च जीर्णकाष्ठान्यपि सुदृढानि न भवन्ति। अतो गृहे प्रयोगाय कीदृशानि काष्ठानि ग्राह्यानि? कानि च निषिद्धकाष्ठानि? इति विषयेऽत्र विचार्यते।

**नूतनगृहे निषिद्धकाष्ठानि** – अन्यस्य गृहे प्रयुक्तकाष्ठमथवा पुरातनगृहे प्रयुक्तकाष्ठं नूतनगृहे न प्रयोक्तव्यम्, यदि प्रयोगं करोति तदा गृहकर्त्ता तत्र न निवसेत्। यदि तत्र निवासं करोति तदा सः शीघ्रमृत्युं प्राप्नोति। वास्तुसौख्ये प्रतिपादितं यत्– नवीनगृहनिर्माणाय अप्रयुक्तेष्टका-लोष्ठ-पाषाण-मृत्तिका-लौह-तृण-वृक्षपत्र-काष्ठादिकं प्रयोक्तव्यमिति कथितमस्ति। सन्दर्भेऽस्मिन् यथा -

**नूतने नूतनं काष्ठं जीर्णे जीर्णं प्रशस्यते ।**
**जीर्णे च नूतनं श्रेष्ठं नो जीर्णं नूतने शुभम् ॥**[2]

**वास्तुशास्त्रे ग्राह्यकाष्ठानि** – गृहे प्रयुज्यकाष्ठानां विषये कथितमस्ति यत् श्रीपर्णी(कायफल), रोहिणी(कुटकीवृक्ष), शाकः(सागौन), सर्जः(शालवृक्षः) पतङ्गः(चन्दनवृक्षजातीयतरुविशेषः), लोध्रः(रक्तपुष्पैः श्वेतपुष्पैर्वा युक्तो वृक्षः), शालः(सखुआ), तालः, अर्जुनः, शिंशपः(शीशम) च एते वृक्षाः सरलाः अर्थात् अवक्राः शुभाः अर्थात् एतेषां वृक्षाणामवक्रकाष्ठानि गृहे ग्राह्यानि। इतोऽपि चन्दनम्, अशोकः, बदरीवृक्षः, मधूकः(महुआ) कदम्बश्चेति, एतेऽपि शुभवृक्षाः सन्ति किन्तु शमी, निम्बवृक्षः(नीम), विल्ववृक्षश्च, एतेषां प्रयोगः गृहे न करणीयः। गृहे द्वार-कपाट-गवाक्षादीनां निर्माणाय समं काष्ठं प्रयोक्तव्यम्, तथा च अलिन्दे (बरामदा,कारिडोर) विषमं काष्ठं प्रयोक्तव्यम्।[3]

---

1. क्षीरवृक्षा वटाश्वत्थरक्तपुष्पद्रुमास्तथा। सकण्टका शाल्मली च प्लक्षोदुम्बरसंज्ञकौ॥
अग्निकोणे सदा दुष्टा मृत्युपीडाप्रदायकाः। पुन्नागफलिनी निम्बदाडिमाशोकजातिकाः॥
नागकेशर-संपुष्पं जपाकुसुमकेसरे। जयन्ती चन्दनं प्रोक्तं वचा चैवापराजिता ॥
मधुविल्वाम्रभृङ्गाश्च नागरं ककुपादिकाः। यत्र तत्र स्थिताश्चैते नारिकेलादयः शुभाः ॥
बृहद्वास्तुमाला १७-२०, पृ०सं० १२६-१२७
2. अन्यवेश्मस्थितं दारु नैवान्यस्मिन्नियोजयेत्। न तत्र निवसेत्कर्त्ता वसन्नपि न जीवति ॥
इष्टिका-लोष्ठ-पाषाण-मृत्तिका- चूर्णमायसम्। तृणं पत्रं बुधैः प्रोक्तं दारु नव्यं गृहाय वै ॥
नूतने नूतनं काष्ठं जीर्णे जीर्णं प्रशस्यते। जीर्णे च नूतनं श्रेष्ठं नो जीर्णं नूतने शुभम् ॥ वास्तुसौख्यम् ११७-११९
3. श्रीपर्णी रोहिणी शाकः सर्जश्च सरलाः शुभाः। पतङ्गलोध्रशालाख्यास्तालार्जुनकशिंशपाः॥
चन्दनाशोकबदरी मधूकाश्च कदम्बकाः। प्रशस्ताश्च शमी निम्बो विल्ववर्ज्यं गृहान्तिके॥
गृहे दारुगुणैर्युक्ते गृहकर्मणि युज्यते। गृहे काष्ठं समं समं श्रेष्ठमलिन्दे विषमं शुभम्॥ बृहद्वास्तुमाला १३०-१३२, पृ०सं० ३१

**नारदमते त्याज्यकाष्ठानि** – गृहनिर्माणे प्लक्षः (पाकड), उदुम्बरः(गूलर), चूतः(आम्रवृक्षः), निम्बः(नीम), स्नुहिः (सेहुड), विभीतकः (बहेडा), दग्धाः वृक्षाः (अग्निज्वलितवृक्षाः), कण्टकिनः वृक्षाः (कण्टकयुक्ताः तरवः), वटवृक्षः (बरगद), अश्वत्थः(पीपल), कपित्थः (कैथ), अगस्तः, शिग्रुः(सहिजन), तालः (ताडवृक्ष), तिन्तिडिकावृक्षः (इमली) च इमे वृक्षाः निन्दिताः सन्ति। अर्थादेतेषां वृक्षाणां काष्ठं गृहे न प्रयोक्तव्यमन्यथा अशुभफलं भविष्यति। उपर्युक्तनिन्दितवृक्षान् विहायान्ये प्रशस्तवृक्षाः गृहनिर्माणे प्रयोक्तव्याः भवन्ति।[1]

**वराहमिहिरमतानुसारेण त्याज्यकाष्ठानि** – ग्राह्याऽग्राह्यकाष्ठानां सन्दर्भे वराहमिहिरमतमस्ति यत् – श्मशाने, मार्गे, देवालये, वल्मीकस्थाने, उद्याने, तपस्विनामाश्रमस्थाने, चैत्यस्थाने अर्थात् बौद्धमन्दिरे जैनमन्दिरे वा, नदीसंगमस्थले समुत्पन्नानां वृक्षाणां काष्ठानि गृहनिर्माणे निषिद्धानि। एवमेव कुम्भजलेन सिञ्चितवृक्षाः, लतादिभिराच्छादिताः वृक्षाः, विद्युता वायुना च निहताः वृक्षाः, स्वयमेव निपतिताः, गजेन पातिताः, शुष्काः वृक्षाः, अग्निना दग्धवृक्षाः, मधु-मक्षिका-गृहयुक्तवृक्षाश्चैतादृशानां वृक्षाणां काष्ठान्यपि वर्जितानि भवन्ति। ततः केषां वृक्षाणां काष्ठानि प्रयोगे विधेयानि ? तदा कथ्यते यत् – येषां वृक्षाणां पत्राणि स्निग्धानि भवन्ति, अपि च फलपुष्पयुक्ताः वृक्षाः गृहे प्रयोक्तव्याः। देवदारुवृक्षाः, चन्दनवृक्षाः, मधूकवृक्षाश्च ब्राह्मणानां कृते शुभाः भवन्ति। क्षत्रियाणां कृते अरिष्टाः(रीठा,नीम), अश्वत्थवृक्षाः, खदिराः, बिल्ववृक्षाश्च वृद्धिकराः उन्नतिदायकाः भवन्ति। वैश्यानां कृते खदिरवृक्षाः, सिन्दुकवृक्षाः(सिन्धुवार), स्यन्दनाश्च(तिनिश) शुभफलदाः भवन्ति। शूद्राणां कृते तिन्दुकाः(तेन्दु), केसरवृक्षाः, अर्जुनवृक्षाश्च शुभफलदाः भवन्ति। अथवा ये उपरि कथिताः प्रशस्तवृक्षाः सन्ति ते सर्वेभ्यः प्रशस्ताः सन्ति। तथा ये अप्रशस्ताः कथितास्ते सर्वेभ्यः अप्रशस्ताः त्याज्याः सन्ति।[2]

**वृक्षच्छेदनादिविचारः** – गृहे काष्ठस्य बहु उपयोगः भवति। काष्ठस्य पूर्तिः वृक्षैर्भवति। अतो वृक्षाणां छेदनन्तु आवश्यकं भवति। वृक्षाणां छेदनं शुभमुहूर्त्ते भवेत् तदैव काष्ठस्य शुभता स्यात्। अतो वृक्षच्छेदनमुहूर्त्तस्यावश्यकता भवति। वृक्षे तु खगादीनां दृश्याऽदृश्यभूतानामावासो भवति। अतस्तेषां प्रीत्यर्थमावासपरित्यागनिवेदनाय च बलिप्रदानपूर्वकं प्रार्थना भारतीयसंस्कृतेर्महानताऽस्ति। अत्र वृक्षच्छेदनमुहूर्त्तपूर्वकं वृक्षप्रार्थनाविधिं चापि प्रस्तूयते।

**वृक्षच्छेदनमुहूर्त्ताः** – यस्मिन् दिने कृष्णपक्षस्य चतुर्दश्यां तिथौ चन्द्रो रेवतीनक्षत्रे रोहिणीनक्षत्रे वा स्यादपि च लग्ने गुरुर्भवेत् तदा गृहनिर्माणाय वृक्षच्छेदनं कर्त्तव्यम्। वृक्षच्छेदनसमये लग्ने शुक्रो भवेत्तथा च गुरुः स्थिरराशौ केन्द्रेषु भवेत्तदा तृणकाष्ठादिभिर्गृहाच्छादनेन गृहेऽग्निभयं न भवति।[3]

---

1. प्लक्षोदुम्बरचूताख्या निम्बस्नुहिविभीतकाः। दग्धाः कण्टकिनो वृक्षा वटाश्वत्थकपित्थकाः॥
   अगस्तशिग्रुतालाख्यास्तिन्तिडीकाश्च निन्दिताः। अन्ये च गृहनिर्माणे योजनीयाः समाः द्रुमाः॥ बृहद्वास्तुमाला १३३-१३४, पृ०सं० ३१
2 पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः। चैत्यसरित्संगमसंभवाश्च घटतोयसिक्ताश्च ॥
   कुब्जानुजातवल्लीनिपीडिता वज्रमारुतोपहताः। श्वपतितहस्तिनिपीडितशुष्काग्निप्लुष्टमधुनिलयाः ॥
   तरवो वर्जयितव्याः शुभदाः स्युः स्निग्धपत्रकुसुमफलाः। अभिमतवृक्षं गत्वा कुर्यात्पूजां सबलिपुष्पाम् ॥
   सुरदारुचन्दनशमीमधूकतरवः शुभा द्विजातीनाम्। क्षत्रस्यारिष्टाश्वत्थखदिरविल्वा विवृद्धिकराः ॥
   वैश्यानां जीवकखदिरसिन्धुकस्यन्दनाश्च शुभफलदाः। तिन्दुककेसरसर्जार्जुनाम्रशालाश्च शूद्राणाम् ॥ बृहत्संहिता ५८.२-६
   सर्वेषां वा शस्ताः सर्वे वृक्षाश्च निन्दिता ये न॥ बृहद्वास्तुमाला १३९, पृ०सं० ३२
3. कृष्णपक्षे चतुर्दश्यां रेवतीरोहिणीयुते। यदा तदा गुरौ लग्ने गृहार्थं तु हरेद्द्रुमान् ॥
   शुक्रे लग्ने गुरौ केन्द्रेष्वगेराशौ गृहोपरि। तृणादिभिः समाच्छाद्यो न चैवाग्निभयं भवेत् ॥ बृहद्वास्तुमाला १४०-१४१, पृ.सं. ३२-३३

**वृक्षच्छेदने भूतादिप्रार्थना** – वृक्षच्छेदनात् पूर्वदिवसे वृक्षसमक्षं गत्वा खगादीनां भूतानां प्रार्थना कार्या यत्– ये ये प्राणिनः अस्य वृक्षस्योपरि निवसन्ति ते मया विधिवद्दत्तं बलिं गृहीत्वा अन्यत्र गच्छेयुः। ते मां क्षमां कुर्वन्तु। तेभ्यो मम नमस्कारः।[1]

**वास्तुराजवल्लभानुसारेण गृहसमीपे ग्राह्यवृक्षाः** – सदुग्धकण्टका वृक्षाः सफला अपि गृहसमीपं न स्थापनीया। चम्पक (चम्पा)-पाटल (गुलाब)- कदली (केला)- जाती-केतकी (केवड़ा) प्रभृतयो वृक्षाः शुभाः भवन्ति। प्रहरानन्तरं कस्यचिद् वृक्षस्य छाया गृहोपरि पतति चेत् तत् शुभाय न भवति। ब्रह्ममन्दिरात् पृष्ठतः, विष्णुसूर्यशिवमन्दिरणामग्रे, जैनालयस्य पृष्ठे, देवीमन्दिरं परितश्च गृहं न निर्मातव्यम्।[2] सदुग्धाः वृक्षाः धनहानिकराः, सकण्टकाः वृक्षाः शत्रुभयदाः, सफलाः वृक्षाः सन्ताननाशकाः भवन्ति। सुवर्णाभपुष्पशालिनो वृक्षाः अपि अशुभाः भवन्ति। अत एतादृशाः वृक्षाः गृहस्य समीपे न भवेयुः।[3] इत्थं गृहसमीपे ये वृक्षा अशुभाः भवन्ति तेषु निषिद्धवृक्षेषु यदि कश्चन वृक्षो भूतावासो भवति चेत् स न छेत्तव्यः। बिल्व-शमी-केसराशोक-पुन्नाग-चम्पकवृक्षा अपि न छेत्तव्याः। द्राक्षालताकुञ्जं चन्दनद्रुमं पिप्पलीं दाडिमीं च गृहस्य निकटे रोपयेत्। गृहेणोत्तरतः कपित्थः, पूर्वस्मिन् वटः, दक्षिणतः पाटलः, पश्चिमतः अश्वत्थश्च शुभाय भवति।[4]

**बृहत्संहितानुसारेण गृहसमीपे वृक्षविचारः** – गृहस्य दक्षिणे प्लक्षः(पाकड), पश्चिमे वटः, उत्तरे उदुम्बरः(गूलर), पूर्वस्मिन् अश्वत्थश्च अशुभो भवति। गृहस्य उत्तरे प्लक्षः, पूर्वस्मिन् वटः, दक्षिणे उदुम्बरः, पश्चिमे अश्वत्थश्च शुभो भवति।[5] कण्टकिभिर्वृक्षैरासन्नैः शत्रुभयं भवति। क्षीरिभिः धननाशः, फलिभिः सन्ताननाशश्च भवति। एतेषां काष्ठानां प्रयोगो भवति चेदपि गृहेऽअशुभो भवति। कण्टकिषु वृक्षेषु पुन्नागः, अशोकः, निम्बः, केसरः(मौलसिरी), पनसः, शमी(रूमी), शालः(काल) चैते वृक्षा अशुभाः न भवन्ति।[6]

**वाटिकारोपणमाहात्म्यम्** – यदि गृहात् पूर्वपश्चिमोत्तरदक्षिणदिक्षु ईशानकोणे वा वाटिका निर्मीयते चेत् गायत्रीपुरश्चरणस्य फलं लभ्यते। वृक्षारोपणादपि अधिकं फलं लतारोपणेन भवति।[7] वाटिकायां दक्षिणनैर्ऋत्ययोर्मध्ये

---

1. यानीह भूतानि वसन्ति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम्। अन्यत्र वासं परिकल्पयन्तु क्षमन्तु तान्यद्य नमोऽस्तु तेभ्यः॥ बृहत्संहिता ५८.११
2. वृक्षा दुग्ध-सकण्टकाश्च फलिनस्ताज्या गृहाद् दूरतः शस्ते चम्पकपाटले च कदली जाती तथा केतकी। यामादूर्ध्वमशेषवृक्षजनिता छाया न शस्ता गृहे पार्श्वे कस्य हरे रवीशपुरतो जैनानु चण्ड्याः क्वचित्॥ बृहद्वास्तुमाला ९, पृ०सं० १२५
3. सदुग्धवृक्षा द्रविणस्य नाशं कुर्वन्ति ते कण्टकिनोऽरिभीतम्। प्रजाविनाशं फलिनः समीपे गृहस्य वर्ज्याः कलधौतपुष्पाः ॥ वास्तुराजवल्लभः १.२९
4. दुष्टो भूतनिषेवितोऽपि विटपी नोच्छिद्यते शक्तितः तद्वद्बिल्वशमी त्वशोकवकुलौ पुन्नागसच्चम्पकौ। द्राक्षा पुष्पकमण्डपं च तिलकान् कृष्णां वपेद्दाडिमीं सौम्यादेः शुभदः कपित्थकवटावौदुम्बराश्वत्थकौ ॥ वास्तुराजवल्लभः १.३०
5. याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते। उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः॥ बृहत्संहिता ५२.८३
6. आसन्नाः कण्टकिनो रिपुभयदाः क्षिरिणोऽर्थनाशाय। फलिनः प्रजाक्षयकरा दारुण्यपि वर्जयेदेषाम् ॥ छिन्द्याद् यदि न तरूँस्तान् तदन्तरे पूजितान् वपेदन्यान्। पुन्नागाशोकारिष्टवकुलपनसान् शमीशालौ ॥ बृहत्संहिता ५२.८४-८५
7. वाटिका वा तडागो वा कूपो वा यदि निर्मितः। गृहात्पूर्वे कुबेर्यां च वारुणे शम्भुकोणके ॥ सदा सवित्री भविता सदा दानं प्रयच्छति। सदा यज्ञं स पूज्येत यो रोपयति पादपम् ॥ बृहद्वास्तुमाला १५-१६, पृ०सं० १२७

जम्बुकदम्बौ, ईशानपूर्वयोर्मध्ये पनसः, उद्यानात् पूर्वदिशि वेतसः, उत्तरे शमी, पश्चिमे खदिरः, दक्षिणे केसरः च रोपणार्हाः शुभाश्च भवन्ति। प्रथमम् उद्यानम् आम्राणां, द्वितीयम् अश्वत्थानाम्, तृतीयं वटानाम्, चतुर्थं प्लक्षाणाम्, पञ्चमं निम्बानाम्, षष्ठं जम्बूनाम्, सप्तमं चिञ्चानां भवेत्। **सर्वेष्वेषु आम्रवनं श्रेष्ठम्। अग्निहोत्रमकुर्वता अपुत्रेण च आम्रवनं निर्मातव्यं येन सः पुत्रिणां स्वर्गमाप्नुयात् ।** अतः उत्तमान् वृक्षान् रोपयित्वा सर्वजनीनं कार्यं करणीयम्।[1]

**वास्तुराजवल्लभे राजवाटिकाप्रकारः** – राजप्रासादाद् दक्षिणदिशि वामतो वा तद्रञ्जनाय शतहस्तमितं तद्द्विगुणितं तत्त्रिगुणितं वा तटाकं निर्मीय तस्य मध्ये प्रपातमण्डलः तोययन्त्राणि च स्थापनीयानि।[2]

**राजजलयन्त्रपरिसरे रोपणीयाः वृक्षाः** – जलयन्त्रं कर्तुं प्रथमतः क्षेत्रं सप्तधा विभज्य मध्ये भागत्रयं परितो भद्रं । मध्ये च चतुर्विंशतिभागेषु जलवापिका कर्त्तव्या। कोणेषु कारयेत् चित्रण्युत्कीर्य अलङ्कुर्यात। एतादृशं जलयन्त्रं राज्ञः विनोदाय भवति। एतस्य जलयन्त्रस्य समीपे विद्यमाने उद्याने चम्पा, कुन्दः, जातिः (चमेली), सुमनोवल्ली (बेला), निर्मालिका, केतकी, श्वेतपाटला(सफेद गुलाब), नारिकेलः, करणी (कनेर), वसन्तलतिका, रक्तपुष्पम्, जम्बीरः (जम्बीरी नींबू), बदरी, पूगः (सुपारी), मधूकः (महुआ), आम्रः, वेला, कदली, चन्दनः, वटः, पिप्पलः, हरितकी, आमलकी, चिञ्चा (इमली), अशोकः, कदम्बः, निम्बः (नीम), खर्जूरः, दाडिमः, कर्पूरः, अगुरुः (अगर), किंशुकः, हयरिपुः (सफेद कनेर), पुन्नागकः (जायफल), निम्बुकी (नींबू), नागलता (नागबेल), तिन्दुकी (बिजौरा नींबू), लाङ्गली (कलिहारी) चैते वृक्षाः रोपणीयाः। वाटिकायां जलविहाराय निर्मिते मण्डपे द्राक्षा (दाख)-एला (इलायची)-शतपत्रा (शतावरी)-बकुल (मौलसिरी)-धत्तूर-कङ्कोल-शाल-ताल-तमाल-अगस्त्य-मन्दार-चम्पक-पारिजातादि-वृक्षाः रोपणीयाः।[3]

---

1. याम्यनैर्ऋत्ययोर्मध्ये तथा जम्बुकदम्बकौ। पनसश्च तथाम्रश्च प्रशस्तौ शम्भुपूर्वयोः ॥
वाटिकायाः बहिः पूर्वे रोपयेद्वंशवृक्षकम्। उत्तरे च शमी बाह्ये पश्चिमे खदिरो बहिः ॥
दक्षिणे वकुलो बाह्येऽरिष्टनाशाय केवलम्। आम्राणां वाटिका चैव द्वितीयाश्वत्थवाटिका ॥
तृतीया वटवृक्षाणां चतुर्थी प्लक्षवाटिका। पञ्चमी निम्बवृक्षाणां षष्ठी जम्बुकवाटिका ॥
चिञ्चिणीवृक्षसंभूता सप्तमी परिकीर्तिता। एतासां वाटिकानाञ्च प्रशस्ता चाम्रवाटिका ॥
फलदा पुण्यदा चैव पापं संहरते ध्रुवम्। यत्करोति घनच्छायः पादपः पथि रोपितः ॥
न तत्करोत्यग्निहोत्रं न पुत्रा योषितोद्भवाः। अतः सर्वगुणोपेतान् वृक्षानारोपयेत् सुधीः॥ बृहद्वास्तुमाला २६-३२, पृ०सं० १२९
2. वामे भागे दक्षिणे वा नृपाणां त्रेधा कार्या वाटिका क्रीडनार्थम्।
एकद्वित्रिदण्डसंख्या शतं स्यान्मध्ये धारामण्डपं तोययन्त्रैः॥ बृहद्वास्तुमाला ३४, पृ०सं० १३०
3. क्षेत्रं सप्तविभागभाजितमतो भद्रं च भागत्रयं तन्मध्ये जलवापिका जिनपदैरेकांशतो वेदिका ।
स्तम्भैर्द्वादशभिश्च मध्यरचितः कोणेषु रूपान्वितः। कर्तव्यो जलयन्त्र एव विधिवद्भोगाय पृथ्वीभुजाम् ॥
तस्यां चम्पककुन्दजातिसुमनोवल्ली च निर्मालिका। जातीहेमसमानकेतकिरपि श्वेता तथा पाटला ।
नारङ्गः करणी वसन्तलतिका चारक्तपुष्पादिकम्। जम्बीरो बदरी च पूगमधूपा जम्बू च चूतद्रुमाः ॥
मालूरः कदली च चन्दनवटावश्वत्थपथ्याशिवाः। चिञ्चाशोककदम्बनिम्बतरवः खर्जूरिका दाडिमा ॥
कर्पूरागुरुकिंशुका हयरिपुः पुन्नागको निम्बुकी। प्रोक्ता नागलता च बीजनिभृता स्यात्तिन्दुकी लाङ्गली ॥
बृहद्वास्तुमाला ३५-४१, पृ०सं० १३१-१३२

**वृक्षारोपणमन्त्रः –**

**ॐ वसुधेति च सीतेति पुण्यदेति धरेति च। नमस्ते शुभगे देवि द्रुमोऽयं वर्द्धतामिति॥**

मन्त्रेणानेन वृक्षारोपणं कुर्यात्।

**वृक्षारोपणविचारः** – कस्यापि कार्यस्य यदि शुभारम्भः शुभसमये भवति तदा कार्यं सम्यक्तया सम्पूर्णतां गच्छति। तस्मिन्नेव क्रमे यदि वृक्षाणां रोपणं शुभमुहूर्त्ते, शुभदिने च क्रियते तदा वृक्षो बृहद् तथा उत्तमफलदायको भवति। अनन्तरं यदि वृक्षस्य समयानुसारेण सेचनं भवति, रुग्णकाले रुग्णस्य चिकित्सा भवति तदापि सम्यक्फलानि प्राप्यन्ते। एतदर्थं वास्तुशास्त्रे विद्वद्भिः सर्वं सौकर्येण लिखितं वर्तते।

**दिग्विभागेन वृक्षारोपणप्रकारः** – ऐशानकोणे आमलकी, नैर्ऋत्ये चिञ्चा(इमली), आग्नेये दाडिमः, वायव्ये च बिल्वो रोपणीयः। उत्तरे प्लक्षः, पूर्वस्मिन् वटः, दक्षिणे उदुम्बरः, पश्चिमे च विभिन्नाः वृक्षाः रोपणीयाः।[1]

**वृक्षारोपणात् स्वर्गप्राप्तिप्रकारः** – एकं पिप्पलम्, निम्बम्, वटम्, दश पिचुमन्दान्(इमली), कपित्थम्, विल्वम्, आमलकीतिस्रः, पञ्च आम्रान् च रोपयन् बहुपुण्यभाक् नरकं न पश्यति।[2] वराहमिहरो वृक्षारोपणस्य फलं निरूपयति – यो राजमार्गमन्यं मार्गं वा अभितः सुन्दरान् मनोहारिणो वृक्षान् रोपयति सः चतुर्षु युगेषु सुखं भुञ्जानः अन्तकाले स्वर्गं गच्छति।[3]

**बृहत्संहितायां वृक्षारोपणप्रयोजनम्** – कस्यापि कार्यस्य पृष्ठे तस्य कारणं भवति। वृक्षारोपणस्य प्रयोजनविषयेऽपि उक्तम्। जलाशयवापीकूपानां प्रान्ते यदि छायाकराः वृक्षाः न स्युस्तदा ते प्रान्तस्थला शोभायमानाः न भवन्ति। अतः प्राप्तस्थलानामुपरि वृक्षारोपणं वाटिकानां स्थापना कर्तव्या।[4] वृक्षाणां कृते मृदुभूमिः लाभकारी भवति। तत्र वृक्षारोपणेन उत्तमवृक्षाः फलयुक्ताः भवति।

**मृदुभूमेः प्राशस्त्यम्** – अत्र मृदुभूमेः महत्त्वविषयेऽपि प्रतिपादितमस्ति। सर्वेषां वृक्षाणां मृदुभूमिरुत्तमा भवति। तस्यां भूमौ सर्वप्रथमं तत्र तिलान् वपेत्। अनन्तरं यदा तिलपादपाः पुष्पिताः भवन्ति तदा तान् तत्रैव मृद्नीयात्। एतत् कार्यं तस्यां भूमौ प्रथमं भवति। एतत् कार्यं भूमौ उर्वरकतां वर्धनार्थं क्रियते।[5]

---

1. ईशाने रोपयेद्धात्रीं नैर्ऋत्ये चिञ्चिणीद्रुमान्। आग्नेय्यां दाडिमं चैव वायव्ये विल्ववृक्षकम्॥
   प्लक्षोत्तरे पूर्ववटं प्रशस्तं ह्युदुम्बरं दक्षिणभागके च। अश्वत्थवृक्षं दिशि वारुणस्यां मध्ये तथाम्रान्विविधप्रकारान्॥
   बृहद्वास्तुमाला २४-२५, पृ०सं० १२८-१२९
2. अश्वत्थं च कदम्बं च कदलीबीजपूरकम्। गृहे यस्य प्ररोहन्ति स गृही न प्ररोहति॥
   सर्वत्र पनसः शस्तो दक्षिणे सकलाः खलाः। वृक्षा नारोपयेदेवं स सदा सुखभाग्भवेत्॥ बृहद्वास्तुमाला २१-२२, पृ०सं० १२८
   अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश चिञ्चिणीकान्। कपित्थविल्वामलकत्रयञ्च पञ्चाम्रवापी नरकं न पश्येत्॥
   भविष्यपुराणम् ४.१२८.११
3. यो वाटिकां राजपथः समीपे स्विष्टां तथा कूपसमन्विताञ्च। स्वर्गे च वासं लभते मनुष्यश्चतुर्युगं सर्वसुखैरुपेतः॥
   बृहद्वास्तुमाला ३३, पृ०सं० १३०
4. प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः। यस्मादतो जलप्रान्तेष्वारामान् विनिवेशयेत्॥ बृहत्संहिता ५४.१
5. मृद्वी भूः सर्ववृक्षाणां हिता तस्यां तिलान् वपेत्। पुष्पितांस्तांश्च मृद्नीयात् कर्मैतत्प्रथमं भुवः॥ बृहत्संहिता ५४.२

**प्रथमरोपणीयवृक्षाः** – केचन वृक्षाः शुभाः भवन्ति। तेषां प्रथमतया रोपणेन शुभफलं भवति। माङ्गलिकानां वृक्षाणां प्रथमतया रोपणेन मङ्गलं भवति, अतः निम्बवृक्षः, अशोकः, पुन्नागः, शिरीषः, प्रियंगुः एते वृक्षाः गृहेषु अथवा गृहाद् बहिः पूर्वदिशि वाटिकायां रोपणीयाः। यतो हि एते माङ्गलिकाः सन्ति।[1]

**काण्डरोप्यवृक्षविधानम्** – केचन वृक्षाः काण्डरोप्याः भवन्ति। अर्थाद् वृक्षस्य एकां लघुशाखां स्वीकृत्य रोपणेन सा शाखाऽपि वृक्षो भवति। काण्डरोप्याः वृक्षाः सन्ति – पनसः (कटहल), कदली, जम्बूः, लकचः, दाडिमः, द्राक्षा, पालिवता, बीजपूरः, अतिमुक्तः इत्यादयः। एतेषां शाखां स्वीकृत्य तां गोमयेन लिप्त्वा रोपणेन वृक्षो भवति। अथवा अन्यवृक्षान् साक्षात् पादपान् स्वीकृत्य रोपणेन वृक्षाः भवन्ति।[2]

**कालानुसारिवृक्षाऽऽरोपणनियमाः** – वृक्षाणां रोपणं कालानुसारेण भवति। केचन वृक्षाः शिशिरर्तौ (माघफाल्गुनमासयोः), केचन हेमन्तर्तौ (मार्गशीर्षपौषमासयोः) तथा केचन वर्षर्तौ (श्रावणभाद्रपदमासयोः) रोपणीयाः भवन्ति। येषां वृक्षाणां शाखाः प्रशाखाः अङ्कुरिताः न भवन्ति, येषां शाखाप्रशाखाः न भवन्ति, ये च कालक्रमानुसारेण रोपणीयाः लतादयः, तेषां रोपणं शिशिरर्तौ कर्तव्यम्। ये वृक्षाः शाखायुक्ताः भवन्ति तेषां रोपणं शीतर्तौ करणीयम्। तथा च येषां वृक्षाणां शाखा बहुदीर्घाः सुदृढाः च भवन्ति, ते वृक्षाः वर्षाकाले रोपणीयाः स्युः। येन वृक्षाणां वर्धनं सुष्ठु भवति।[3]

**उत्खातप्रतिरोपणविधानम्** – केषाञ्चिद् वृक्षाणां रोपणमुत्खातप्रतिरोपणविधिना भवति। अस्मिन् विधौ पादपस्य एकस्मात् स्थानात् उत्खननं कृत्वाऽन्यत्र रोपणं भवति। एकस्थानादन्यस्थानं प्रति नीत्वा पादपस्य रोपणमुत्खातप्रतिरोपणविधिरुच्यते। सर्वप्रथमं पादपं स्वीकृत्य घृत-उशीर-तिल-मधु-विडंग-इत्यादीनां वस्तुचूर्णेन तं पादपं मूलात् शाखापर्यन्तं लेपनीयम्। अनन्तरमन्यत्र नीत्वा तस्य रोपणं करणीयम्।[4]

**वृक्षारोपणविधिः** – वृक्षारोपणस्यापि एकः विधिरस्ति। तथा यदि रोपणं क्रियते चेद् वृक्षः सुदीर्घः सुफलदः भवति। वृक्षारोपणार्थं स्नानादिकं कृत्वा पवित्रं भवितव्यम्। अनन्तरे वृक्षस्य स्नानगन्धाक्षतैः पूजा करणीया, अनन्तरं रोपणीयम्। एवं विधौ वृक्षस्य पूर्वपत्राणि नष्टानि न भवन्ति तानि एव वर्धयन्ति।[5]

**रोपितवृक्षाणां सेचनविधिः** – शास्त्रे वृक्षसेचनस्यापि नियमः प्रतिपादितः। यदि तेन नियमेन सेचनं क्रियते चेत् वृक्षः शुष्कतां न याति। ग्रीष्मर्तौ वृक्षाः सायं प्रातः एकस्मिन् दिने द्विवारं जलेन सेक्तव्याः, शीतकाले एकदिनानन्तरम् अर्थात् एकस्मिन् दिने एकवारमेव, तथा वर्षासु जलावशेषे अर्थात् जलाभावे एव जलं दातव्यम्। अनेन प्रकारेण कालानुसारेण सेचनं कर्तव्यम्।[6]

---

1. अरिष्टाऽशोकपुन्नागशिरीषाः सप्रियङ्गवः। मङ्गल्याः पूर्वमारामे रोपणीया गृहेषु वा ॥ बृहत्संहिता ५४.३
2. पनसाशोककदलीजम्बूलकुचदाडिमाः। द्राक्षापालीवताश्चैव बीजपूरातिमुक्तकाः ॥
   एते द्रुमाः काण्डरोप्या गोमयेन प्रलेपिताः। मूलोच्छेदेऽथवा स्कन्धे रोपणीयाः परं ततः ॥ बृहत्संहिता ५४.४-५
3. अजातशाखान् शिशिरे जातशाखान् हिमागमे। वर्षागमे च सुस्कन्धान् यथा दिक्स्थान् प्ररोपयेत् ॥ बृहत्संहिता ५४.६
4. घृतोशीरतिलक्षौद्रविडङ्गक्षीरगोमयैः। आमूलस्कन्धलिप्तानां सङ्क्रामणविरोपणम् ॥ बृहत्संहिता ५४.७
5. शुचिर्भूत्वा तरोः पूजां कृत्वा स्नानानुलेपनैः। रोपयेद् रोपितश्चैव पत्रैस्तैरेव जायते॥ बृहत्संहिता ५४.८
6. सायं प्रातश्च घर्मर्तौ शीतकाले दिनान्तरे। वर्षासु च भुवः शोषे सेक्तव्या रोपिता द्रुमाः॥ बृहत्संहिता ५४.१

**अनूपदेशराजवृक्षसेचनविधिः** – केचन वृक्षाः ईदृशाः भवन्ति येषां सेचनस्यावश्यकता न भवति। यतो हि ते जलबहुलप्रदेशीयाः वृक्षाः भवन्ति। जलबहुलप्रदेशस्य षोडश संख्याकाः वृक्षाः सन्ति येषां सेचनस्यावश्यकता न भवति। तेषां नामानि इमानि सन्ति – जम्बूवृक्षः(जामुन), वेतसवृक्षः(बैंत), वानीस(बैंत की विशेष प्रजाति), कदम्ब-उदुम्बर-अर्जुन-बीजपूरक-मृद्वीका-लकुचा-दाडिम-वञ्जुल-नक्तमाल-तिलक(चन्दन)-पनस(कटहल)-तिमिर-आम्रतक इत्यादयः।[1]

**वृक्षाणां मध्यान्तरविचारः, तत्फलं च** - वृक्षाणां मुक्तवर्धनेन तेषां मध्ये मध्यान्तरमावश्यकं भवति। द्वयोर्वृक्षयोर्मध्ये विंशतिसंख्यात्मकहस्तात्मकमन्तरं भवति चेत्तत् सर्वश्रेष्ठमन्तरं भवति। षोडशसंख्यात्मकमन्तरं भवति चेत्तद् मध्यममन्तरं भवति। द्वादशसंख्यात्मकमन्तरं भवति चेत्तद् अधममन्तरं भवति। वृक्षाणामन्तरकरणेन ते सम्यक् फलं यच्छन्ति। यदि वृक्षाणां मध्ये यथोचितम् अन्तरं न भवति तदा ते परस्परं स्पर्शं करिष्यन्ति। उभयोर्वृक्षयोः शाखानां मूलानां च परस्परं संस्पर्शेन उत्तमफलं न भवति। अतः अन्तरमावश्यकमस्ति।[2]

**वृक्षाणां रोगज्ञानप्रकारः** - वृक्षाः रुग्णाः अपि भवन्ति, यदि शैत्याधिकं भवति घर्माधिकं भवति वा अथवा वातेन नष्टाः रुग्णाः वा भवन्ति। यदि एतेषां चिकित्सा समयेन न क्रियते तदा एते फलं समयेन न ददति तथा फलानां गुणवत्ता न्यूना भवति। सर्वप्रथमं वृक्षाणां रोगज्ञानमपेक्षितम्। वृक्षाः प्रकृतिकोपात् शैत्याधिके वायुघर्माधिके रुग्णाः भवन्ति। तेषां पत्राणि पीतवर्णानि भवन्ति। वृक्षेषु किसलयादीनां वृद्धिः अवरुद्धः भवति। शाखाः शुष्यन्ति। प्रभावितस्थानाद् रसस्रावो भवति।[3]

**वृक्षाणां चिकित्साप्रयोगविधिः** – रुग्णानां वृक्षाणां चिकित्साऽनिवार्या भवति अन्यथा वृक्षः स्वयमेव नष्टो भवति। सर्वप्रथमं रुग्णवृक्षस्य प्रभावितं क्षेत्रं रुग्णावस्थानं वा शस्त्रेण कर्तितव्यम्। अनन्तरं पीडितस्थानस्योपरि विडङ्गघृतपङ्कान् सम्मील्य तत्र लेपनं कर्तव्यमपि च क्षीरयुक्तदुग्धेन पुनः सेचनं करणीयम्।[4]

**फलनाशचिकित्साविधिः** – रुग्णाः वृक्षाः स्वफलानि शीघ्रं पातयन्ति। अतः फलानां चिकित्साऽपि आवश्यकी। यदि फलपक्वात् पूर्वमेव वृक्षस्य फलं रुग्णं भूत्वा पतति तर्हि तस्य चिकित्सा क्वाथनिर्मीय कर्तव्या। कुलत्थ(कुलथी)-माष-मुद्ग(उडदमूंग)-तिल-यवान् सम्मील्य क्वाथनिर्माणं भवति। क्वाथः शीतलीभूत्वा दुग्धं सम्मील्य वृक्षस्य मूले तत् सेक्तव्यम्। अनेन फलपुष्पवृद्धिर्भवति।[5]

**प्रयोगानन्तरविधिः** – फलनाशे एका अन्याऽपि चिकित्साविधिः वर्तते। अविकः (भेड इति हिन्द्याम्), अजश्च (बकरा इति हिन्द्याम्), अनयोः विष्ठाचूर्णयोः एकैकम् आढकम् (एकाढकम् 256 मुष्टिका, आहत्य 512), पुनः

---

1. जम्बूवेतसवानीरकदम्बोदुम्बरार्जुनाः। बीजपूरकमृद्वीकालकुचाश्च सदाडिमाः॥
   वञ्जुलो नक्तमालश्च तिलकः पनसस्तथा। तिमिरोऽम्रातकश्चेति षोडशानूपजाः स्मृताः॥ बृहत्संहिता ५४.१०-११
2. उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्। स्थानात्स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम्॥
   अभ्यासजातास्तरवः संस्पृशन्तः परस्परम्। मिश्रैर्मूलैश्च न फलं सम्यग्यच्छन्ति पीडिताः॥ बृहत्संहिता ५४.१२-१३
3. शीतवातातपै रोगो जायते पाण्डुपत्रता। अवृद्धिश्च प्रबालानां शाखाशोषो रसस्रुतिः॥ बृहत्संहिता ५४.१४
4. चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम्। विडङ्गघृपङ्काक्तान् सेचयेत्क्षीरवारिणा॥ बृहत्संहिता ५४.१५
5. फलनाशे कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः। शृतशीतपयःसेकः फलपुष्पसमृद्धये॥ बृहत्संहिता ५४.१६

एकाढकं तिलम् (256 मुष्टिका तिलानि), एकः प्रस्थः यवचूर्णः (64 मुष्टिकातुल्यम्), एकद्रोणजलम्, गोमांसतुला (5 किलोपरिमितम् प्रायः), एतान् सर्वान् सम्मील्य सप्तरात्रिपर्यन्तं स्थाप्य अनन्तरं सेक-कार्यं कर्तव्यम्। अनेन वल्मीगुल्मलतानां तथा च फलपुष्पाणां च वृद्धिः भवति।[1]

**बीजारोपणविचारः** - वृक्षाणां बीजवपनस्यापि एकः विधिः वर्तते। येन सुदृढवृक्षस्य प्रादुर्भावः भवति। बीजवपनं वृक्षस्य मूलं वर्तते। आधारः सुदृढो भवेत्। सर्वप्रथमं बीजं घृतेन लेपिते हस्ते स्वीकृत्य घर्षणं कर्तव्यम्। अनन्तरं दुग्धे तक्रं स्थापितव्यम्। दश दिनानन्तरं तं बीजं दुग्धात् निस्सार्य गोमयेन (गोबर) पुनः मर्दनीयम्। ततः सूकरमृगयोः मांसेन धूपं दातव्यम्। पुनः सूकरमृगयोः मांसेन तं बीजं परिष्कृतभूमौ रोपयेत्। पश्चात् दुग्धजलेन सेचनं कर्तव्यम्। अनेन फलपुष्पयुक्तं शुभवृक्षं भवति।[2]

**तिन्तिडीबीजरोपणम्** – तिन्तिडिवृक्षः कथं सुफलदं भवेत् तदर्थं लिख्यते। तिन्तिडी(इमली)वृक्षस्यापि सुदृढशाखा भवितुं शक्नोति। तदर्थं व्रीहि-माष-तिलान् चूर्णं कृत्वा सक्तुभिः(सत्तू) दुर्गन्धयुक्तमांसेन सम्मील्य हरिद्रया धूपं दातव्यम्। पुनः रोपणीयम्, तेन शाखाः भवन्ति।[3]

**कपित्थबीजरोपणम्** – कपित्थ (कैथ) वृक्षस्य बीजरोपणार्थं तावत् कपित्थवृक्षस्य शाखाभ्यः, १.आस्फोत (विष्णुक्रान्ता=आक/मन्दार), २.धात्री (आमलकः), ३.धब (वृक्षविशेषः), ४.वासिकानाम् (वसा इति वृक्षविशेषः), तथा ५.पलाशिनी(ढाकइति हिन्द्याम्), ६.वेतसः (बैंत), ७.सूर्यवल्ली (सूर्यमुखी), ८.श्यामवर्णीया माधवी इति एषां वृक्षाणां समूहः अष्टमूली इति नाम्ना ज्ञायते। एतेषाम् अष्टमूलीसंज्ञकवृक्षाणां दुग्धं स्वीकृत्य उष्णं कर्तव्यम्। पुनः शीतलीकर्तव्यम्। तस्मिन् कपित्थस्य बीजानि निक्षिप्य 100 तालीवादनं कुर्यात्। पुनः निस्सार्य सूर्यकिरणैः शुष्कं कुर्यात्। अनेन प्रकारेण मासपर्यन्तं कुर्यात्। पुनः एकहस्तात्मकं खातं विस्तारदैर्घ्ये (एकहस्तः दैर्घ्यम्, एकहस्तः विस्तारः) करणीयम्। तथा हस्तद्वयं गभीरं करणीयम्। अस्मिन् जलेन युक्तं दुग्धं पातितव्यम्। जलावशेषे तस्मिन् गर्ते अग्निः प्रज्वालयेत्। अग्निशमने घृत-मधु-भस्मेति एतेभ्यः लेपनं कुर्यात्। पुनः तं गर्तं मृत्तिकया माषतिलयवैः प्रपूरणीयम्। पुनः मीन-मांसमिश्रितजलेन सिक्त्वा घनत्वं यावत् ताडयेत्। ततः समुपागतं चतुरङ्गुलात्मकं गभीरम्, रोपणीयबीजञ्च मीनमांसजलेन सिञ्चेत् तदा बीजाङ्कुरणं शीघ्रं प्ररोहति। शुभकिसलयादि आश्चर्यरूपेण मण्डपमाच्छादयति, मण्डपस्य निर्माणं भवतीति भावः।[4]

---

1. अविकाजशकृच्चूर्णस्याढके द्वे तिलाढकम्। सक्तुप्रस्थो जलद्रोणो गोमांसतुलया सह॥
   सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः। वल्मीगुल्मलतानां च फलपुष्पाय सर्वदा॥ बृहत्संहिता ५४.१७-१८
2. वासराणि दश दुग्धभावितं बीजमाज्ययुतहस्तयोजितम्। गोमयेन बहुशो विरुक्षितं क्रोडमार्गपिशितैश्च धूपितम्॥
   मांससूकरवसासमन्वितं रोपितं च परिकर्मितावनौ। क्षीरसंयुतजलावसेचितं जायते कुसुमयुक्तमेव तत्॥ बृहत्संहिता ५४.१९-२०
3. तिन्तिडीत्यपि करोति वल्लरीं व्रीहिमाषतिलचूर्णसक्तुभिः। पूतिमांससहितैश्च सेचिता धूपिता च सततं हरिद्रया॥ बृहत्संहिता ५४.२१
4. कपित्थवल्लीकरणाय मूलान्यास्फोतधात्रीधववासिकानाम्। पलाशिनी वेतससूर्यबल्ली श्यामातिमुक्तैः सहिताष्टमूली॥
   क्षीरे शृते चाप्यनया सुशीते ताला शतं स्थाप्य कपित्थबीजम्। दिने दिने शोषितमर्कपादैर्मासं विधिस्त्वेष ततोऽधिरोप्यम्॥
   हस्तायतं तद्द्विगुणं गभीरं खात्वा वटं प्रोक्तजलावपूर्णम्। शुष्कं प्रदग्धं मधुसर्पिषा तत्प्रलेपयेद्भस्मसमन्वितेन॥
   चूर्णीकृतैर्माषतिलैर्यवैश्च प्रपूरयेद्वृत्तिकयान्तरस्थैः। मत्स्यामिषाम्भस्सहितं च हन्याद् यावद्घनत्वं समुपागतं तत्॥
   उप्तं बीजं चतुरङ्गुलाधो मत्स्याम्भसा मांसजलैश्च सिक्तम्। वल्ली भवत्याशु शुभप्रवाला विस्मापनी मण्डपमावृणोति॥
   बृहत्संहिता ५४.२२-२६

**श्लेष्मातकबीजरोपणम्** – श्लेष्मातस्य(लिसोडा इति हिन्द्याम्) वृक्षस्य बीजरोपणाय बीजानामावरणं दूरीं कृत्वा, तानि अंकोलफलस्य चिक्कणभागैः, छायायां सप्तवारं धर्षणीयानि। पुनः महिषस्य गोमये बीजं घर्षणीयम्। पुनः गोमयस्य शुष्कखण्डैः पालनीयम्। पुनः करकाजलं मृत्तिकां च सम्मिल्य रोपयेत्। अनेन उप्तबीजानि उत्तमफलं ददति।[1]

**सामान्यवृक्षारोपणप्रकारः** – सामान्यरूपेण बीजानां रोपणं तावदपेक्षितं चेद् रोप्यबीजम् अंकोलसम्भूफल (पिशता) इति फलस्य पिष्ट्या रसेन वा १०० वारं भावितव्यम्। अथवा पिश्ता इति फलस्य तैलेन १०० वारं भावितव्यम्। पुनः तं बीजं श्लेष्मातकफलस्य (लिसूडा) पिष्ट्यां तैले वा भावना दातव्या। अनन्तरं बीजं रोपितव्यम्। अनेन वृक्षे बहुलानि फलानि भवन्तीति।[2]

**वृक्षारोपणनक्षत्राणि** – वृक्षाणां रोपणार्थं वास्तुशास्त्रज्ञैः शुभनक्षत्राणि उक्तानि सन्ति। तथा च वृक्षारोपणार्थं ध्रुवनक्षत्राणि (उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणीनक्षत्राणि), मृदुनक्षत्राणि (मृगशीर्ष-रेवती-चित्रा-अनुराधानक्षत्राणि), मूल-विशाखा-पुष्य-श्रवण-अश्विनी-हस्त-नक्षत्राणि च शुभानि भवन्ति। शुभफलप्राप्त्यर्थं एषु नक्षत्रेषु एव वृक्षारोपणं कर्तव्यम्।[3]

**वृक्षारोपणमुहूर्त्तः** – हस्त-पुष्याश्विन्युत्तरफाल्गुन्युत्तराषाढोत्तरा-भाद्रपदा-रोहिणी-विशाखा-मृगशिरोमूल-शतभिषङ्नक्षत्रेषु शुक्रे गुरौ च केन्द्रगे शुभस्थानस्थे चन्द्रमसि जलचरराशिस्थे लग्नस्थे वा, चतुर्थस्थानके शुभग्रहाणां दृष्टौ योगे वा शुभे वासरे शुभलग्ने लतागुल्मवृक्षादीन् मन्त्रोच्चारपूर्वकं रोपयेत्। बृहस्पतिमते तु सोमवासरे मूलनक्षत्रे धनुर्लग्ने च वृक्षारोपणं कर्तव्यम्। गुरुवारे रेवत्यां धनुषि मीने वा लग्ने वृक्षारोपणं शुभाय भवति। शक्तियामलानुसारं वृक्षचक्रे सूर्यनक्षत्राद् दिननक्षत्रपर्यन्तं गणनां कृत्वा फलकथनं वर्णितं वर्तते।[4] प्रकारान्तेरणापि वृक्षारोपणफलं शास्त्रे वर्णितं वर्तते। तथा च सूर्यनक्षत्रात् चन्द्रनक्षत्रपर्यन्तं गणनां कृत्वा तिथिवारसंख्यां योजयित्वा नवभिर्भाजने शिष्टाङ्कानुसारं वृक्षारोपणफलं वक्तव्यम्। १-३-५ शेषे वृक्षः समृद्धः भवति। २-४ शेषे वृक्षारोपणं निष्फलं भवति। ६-८ शेषे लाभः, ७-९ शेषे मृत्युर्भवति।[5]

---

1. श्लेष्मातकस्य बीजानि निष्कुलीकृत्य भावयेत्प्राज्ञः। अङ्कोलविज्जलाद्भिश्छायायां सप्तकृत्वैवम्॥
   माहिषगोमयघृष्टान्यस्य करीषे च तानि निक्षिप्य। करकाजलमृद्योगे न्युप्तान्यह्ना फलकराणि॥ बृहत्संहिता ५४.२९-३०
2. शतशोऽङ्कोलसम्भूतफलकल्केन भावितम्। एतत्तैलेन वा बीजं श्लेष्मातकफलेन वा।
   वापितं करकोन्मिश्रमृदि तत्क्षणजन्मकम्। फलभारान्विता शाखा भवतीति किमद्भुतम्॥ बृहत्संहिता ५४.२७-२८
3. ध्रुवमृदुमूलविशाखा गुरुभं श्रवणस्तथाश्विनी हस्तः। उक्तानि दिव्यदृग्भिः पादपसंरोपणे भानि॥ बृहत्संहिता ५४.३१
4. लतागुल्मवृक्षरोपो हस्तपुष्याश्विनीध्रुवैः। विशाखा-मृग-मूलाह्न-वारुणैश्च प्रशस्यते॥
   गुरौ केन्द्रे शुभे शुक्रे विधौ वारिणि वोदये। शुभयुक्तेक्षे वन्धौ सद्वारे वा शुभोदये॥
   सोमवारयुते मूले चापलग्ने मतान् द्रुमान्। स्थापयेज्जीवलग्ने च रेवत्यां गुरुवासरे॥
   सूर्यभाद्दिनभं यावद् वृक्षचक्रं विधीयते। त्रयं मूले भवेद्रोगस्त्वचि त्रीणि धनागमः॥
   वेदश्शाखासु नाशः स्यात् पत्रे युग्मं दरिद्रता। शीर्षे त्रीणि शुभं प्रोक्तं पूर्व एकन्तु मृत्युदम्॥
   सुतनाशं पञ्च याम्ये पश्चिमे द्वे धनप्रदे। स्याद् वेद उत्तरे लाभ इत्युक्तं शक्तियामले॥ बृहद्वास्तुमाला ४२-४७, पृ०सं० १३२-१३३
5. तिथिवारसमायुक्तं सूर्यफादिन्दुभं युतम्। नवभिस्तु हरेद्भागं शेषाङ्के रोपणं फलम्॥
   एके शरे त्रिफलितं निष्फलं वेदपक्षयोः। वसौ षष्ठे भवेल्लाभो सप्तमे नवमे मृतिः॥ बृहद्वास्तुमाला ४८-४९, पृ०सं० १३३

एवम्प्रकारेण वास्तुशास्त्रीयग्रन्थेषु वृक्षविषयकसम्बद्धाः विविधाः विचाराः वर्णिताः सन्ति। यदि वयं वास्तुशास्त्रोक्तविधिना वृक्षारोपणं कुर्मश्चेदवश्यमेव पुरुषार्थचतुष्टयं प्राप्नुमः। विश्वस्य एका भयावहा समस्या अस्ति प्रदूषणम्। प्रदूषणनिवारणाय वृक्षारोपणमत्यावश्यकमस्ति। अत्याधुनिकजीवनशैल्यां प्रदूषणं प्राणिनां पुरतः अभिशापरूपेण समायातम्। नदीनां वारि मलिनं सञ्जातम्। शनैः शनैः धरा निर्वना जायमाना अस्ति। यन्त्रेभ्यो निःसृतेन वायुना वातावरणं विषाक्तं रुजाकारकं च भवति। वृक्षाभावात् प्रदूषणकारणाच्च बहूनां पशुपक्षिणां जीवनमेव सङ्कटापन्नं दृश्यते। वनस्पतीनाम् अभावदशायां न केवलं वन्यप्राणिनाम् अपि तु अस्माकमेव समेषामेव जीवनं स्थातुं नैव शक्यते। पादपाः अस्मभ्यं न केवलं शुद्धवायुमेव यच्छन्ति अपितु ते अस्माकं कृते जीवने उपयोगाय पत्राणि पुष्पाणि फलानि काष्ठानि औषधीः छायां च वितरन्ति। वृक्षाः सृष्टेराधाराः सन्ति। वृक्षाः जनानां शरीरस्वास्थ्याय अपि सन्ति। अस्माद् हेतोः पर्यावरणसंरक्षणार्थमस्माकं प्रत्येकनागरिकाणां कर्तव्यमस्ति यद् वयं वृक्षारोपणं तेषां संरक्षणार्थं च प्रयत्नं कुर्याम। तत्र वास्तुशास्त्रोक्तविधिना यदि वृक्षारोपणं तत्संरक्षणं च विधीयते चेद् न केवलं भौतिकलाभोऽपि तु आध्यात्मिक-आधिदैविक-आधिभौतिकेतिदुःखत्रयाणां समूलं विनाशो भविष्यति। वृक्षाः समाजस्य कृते किं करोतीति विषये सुभाषितेषु एवं वर्णितं वर्तते।

**धत्ते भरं कुसुमपत्रफलावलीनां मर्म्मव्यथां स्पृशति शीतभवां रुजञ्च।**
**यो देहमर्पयति चान्यसुखस्य हेतोस्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥**[1]
**पुष्पपत्रफलच्छाया मूलवल्कलदारुभिः ।**
**धन्या महीरुहाः येषां विमुखा यान्तिनार्थिनः ॥**
**दशकूपसमा वापी दशवापीसमो ह्रदः ।**
**दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥**
**तारयेद् वृक्षरोपी तु तस्माद् वृक्षान् प्ररोपयेत् ।**
**तस्य पुत्रा भवन्त्येव पादपा नात्र संशयः ॥**

॥ इति शम् ॥

❁ ❁ ❁

1. भामिनीविलासः, प्रास्ताविकविलासः - ९४

# वास्तुविद्या-मनुष्यालयचन्द्रिकादृशाद्वारविन्यासक्रमे दोषाः निवारणोपायाश्च

**– डॉ. गणेशकृष्णभट्टः**

अस्माकं पूर्वजाः ऋषिमुनयः आश्रयार्थम् आवासार्थञ्च गृहादीनाम् आवश्यकतां तथा अनिवार्यताञ्च विशेषरूपेण ज्ञात्वा काञ्चन सिद्धान्तान् प्रतिपादितवन्तः। ते च सिद्धान्ताः कालान्तरे वास्तुशास्त्रत्वेन निरूपिताः। तैरुक्ताः नानाविधसिद्धान्ताः वास्तुशास्त्रेऽन्तर्भाविताश्च। वास्तुशास्त्रमित्येतज्ज्योतिषशास्त्रैवान्तर्भूतं भवति। तत्रापि त्रिषु स्कन्धेषु अन्यतमे संहितास्कन्धे वास्तुविषयः विस्तररूपेण निरूपितो वर्तते।

वास्तुशास्त्रे गृहनिर्माणोपयोगिभुवः चयनादारभ्य गृहनिर्माणपर्यन्तं विविधा आयामाः, नियमाः, सिद्धान्ताः, निर्देशाश्च समावेशिताः। आदौ तावत् शास्त्रस्यास्य जन्म वेदकाले यज्ञभूमिचयनार्थं तथा वेदीनिर्माणार्थं चाभवदित्युच्यते। कालान्तरे सर्वजनोपयोगिरूपेण लोकाय परिचितम्। परन्त्वेतदपि ज्ञातव्यमेव यत् यज्ञादीनां पूर्वमपि मानवानामावासस्य आश्रयस्य च कल्पना जातैवासीत्। पुनश्च मानवः वासभूमिनिश्चयार्थं चिन्तनमकरोत्।

तत्रादौ द्वारादिस्थाननिर्णयः प्रकटीक्रियते। पूर्वोक्तेषु चतुष्षष्टिपद-एकाशीतिपद-शतपदवास्तुकोष्ठेषु द्वारादीनां निवेशनक्रमं निरूपयति वास्तुविद्याकारः–

**अथ द्वे प्राङ्मुखे द्वारे कुर्यात् द्वे दक्षिणामुखे।**
**द्वारे प्रत्यङ्मुखे द्वे च द्वे च कुर्यादुदङ्मुखे**[1] इति।

अर्थात् गृहनिवेशनसमये वास्तुकोष्ठे पूर्वस्यां दिशि द्वारद्वयम्, एवं दक्षिण-पश्चिमोत्तरदिशास्वपि द्वे द्वे द्वारे भवेताम्। पुनः विप्रादिवर्णेषु विशेषः वर्तते एव। तत्रादौ विप्रस्य द्वारस्थापनमुच्यते–

**माहेन्द्रे प्राङ्मुखं द्वारं प्रशस्तं शिष्टजातिषु ।**
**अपरं तु तथा द्वारं जयन्ते प्राह निश्चयात् ॥**[2]

तन्नाम महेन्द्रपदे द्वारनिर्माणं शिष्टजातीनां कृते शुभं भवति। एतद्विहाय ब्राह्मणानां कृते जयन्तपदे द्वारनिश्चयः कर्तुं शक्यते। एवं क्षत्रियाणां निवासार्थं गृहक्षतपदे द्वारं निर्मातव्यम्। तथा वैश्यानां निवासार्थं गन्धर्वपदे द्वारस्थानम् अभीष्टत्वेन स्वीकार्यम्। एवं शूद्राणां द्वारस्थापनस्थानं तु पुष्पदन्तपदे प्रोक्तम्। एवं सुग्रीवपदे, आपः पदे तथा भल्लाटपदे च सर्ववर्णीयानां द्वारं शुभदायकम् इत्युक्तम्। एवमेव तत्तद्देवतास्थानेषु स्थापितानां द्वाराणां फलं वास्तुविद्यायां पञ्चदशश्लोकैः निरूपितम्। तेषु श्लोकेषु प्रोक्तानि फलानि मया अत्र निरूप्यन्ते। तत्र आदित्यपदे द्वारं स्थापिते सति पुत्रनाशो भवति। सत्यपदे स्थापितद्वारेण मैत्रीभङ्गो भवति। भृगुपदेन गृहपतिः पृथक् सम्भवति। एवम्

1. वा. वि. 4/1
2. वा. वि. 4/2

अन्तरिक्षपदे कृते सति गृहपतिः विनाशमार्गमुपैति। अग्निपदे द्वारं स्थापिते सति यजमानस्य मृत्युः वाच्यम्। तथैव पूष्णपदे शोषणम्, दारुणकष्टम्, नाशः च जायते। वितथपदे गृहपतेः मरणम्, गृहक्षतपदे सम्पदः अभिवृद्धिः, यमद्वारेण मरणतुल्यं कष्टम्, मरणं सर्वनाशो वा वाच्यम्। एवं यदि गन्धर्वपदे द्वारं स्थापितं चेत् सर्वविधकर्मसु वृद्धिः सञ्जायते। भृङ्गराजपदे पशुधनस्य हानिः तथा सस्यादिनाशः, निर्ऋतिपदे मरणम्, तथा दौवारिकपदे लयश्च प्रोक्तम्। परं सुग्रीवपदस्थितेन द्वारेण सर्वसम्पत् लाभः, पुष्पदन्तद्वारेण च सर्वगुणानां प्राप्तिः भवति। वरुणपदे द्वारस्थापनेन मित्रेषु वैरम्, चोरेभ्यः भयं च जायते। असुरपदस्थाने नित्यं कष्टानुभूतिः, शोषपदे शुष्यते परन्तु न विनश्यति इति च कथितम्। रोगपदे स्थितेन द्वारेण गृहपतिः पाण्डुरोगी सञ्जायते। वातस्थाने तावत् गृहपतये वातेन जन्यमानाः व्याधयः जायन्ते। नागपदे सति तस्मिन् गृहे ये वासं कुर्वन्ति तेभ्यः शीघ्रमेव नागभयं भवेत्। तथा मुख्यपदे द्वारस्थापनेन शीघ्रमेव विप्रस्य प्राप्तिः एवं भल्लाटपदे गृहवासिभ्यः विशिष्टफलानां प्राप्तिः जायते। सोमस्थाने द्वारस्थापनेन व्यक्तिः सदैव याज्ञिकः धार्मिकश्च सम्भवति। अर्गलपदस्थितेन द्वारेण यजमानः जलेन म्रियते। अदितिपदे उदररोगः, दितिपदे तावत् सपत्नीककुलस्य विनाशश्च प्रोक्तः। रुद्रस्थाने यदि द्वारस्थापनं कृतं तर्हि गृहं वह्निना दह्यते। एवं पर्जन्ये धननाशः, जयन्ते च सर्वत्र जयमाप्नोति। ततश्च यदा माहेन्द्रपदे द्वारस्थापनं क्रियते तदा माहात्म्यं प्राप्नोति गृहकर्ता इत्थं पदेषु द्वारस्थापनस्य फलं विस्तरेण निगदितं ग्रन्थकारेण, शास्त्रकारैश्च।

अधुना बहिर्द्वारनिवेशनस्थाने कथयति ग्रन्थकारः –

**यत्रोन्नतं ततो द्वारं यत्र निम्नं ततो गृहम् ।**
**गृहे चाप्यष्टमे राशौ तत्र द्वारं न कारयेत् ॥**[1] इति।

अर्थाद्यत्र औन्नत्यं वर्तते तत्र द्वारम्, तथा यत्र निम्नं विद्यते तत्र गृहस्य विन्यासः कार्यः। तथैव गृहकर्ता यजमानः यः वर्तते तस्य जन्मराशितः गणना कार्या। एवं गणनया यदा अष्टमराशिरायाति, तस्मिन् स्थाने कदापि द्वारविन्यासः न कार्यः इत्युक्तम्। ततः – **गृहक्षते च माहेन्द्रे ब्राह्मणानां प्रकीर्तितम्**[2] इति सार्धश्लोकेनैकेन विप्रस्य प्रतिनियतम् अपरं द्वारस्थापनं प्रोक्तं ग्रन्थकारेण। अर्थादत्र ब्राह्मणानां कृते निर्मीयमाणगृहे गृहक्षतपदे अथवा माहेन्द्रपदे एव द्वारं विन्यसेत्। महीधर-सोम-भल्लाट-अर्गलपदेषु अन्यतमभूते शयनगृहस्य निर्माणं कर्तुं शक्यते। पुनश्च शयने तावत् पूर्वस्यां दिशि शिखा भवेदिति ज्ञातव्यमेव। अधुना क्षत्रियस्य प्रतिनियतं प्रोक्तं वास्तुविद्यायाम् –

**गृहक्षते पुष्पदन्ते द्वारं स्यात् क्षत्रियस्य तु।**
**वितथे चान्नभूमिं च गोष्ठागारं तथासुरे।**
**स्थानभूमिं च गन्धर्वे सदा कुर्यात् विशेषतः ॥**

क्षत्रियाणां कृते निर्मीयमाणे गृहे गृहक्षतपदे पुष्पदन्तपदे वा द्वारस्थापनं कार्यम्। एवं वितथपदे भोजनगृहं तथा असुरपदे गोष्ठागारं विन्यसेत्। तथैव गन्धर्वपदे स्थानभूमिः निर्मातव्या। वैश्यस्य कृते द्वारादिस्थानं श्लोकद्वये कथ्यते। तस्मै भल्लाटपदे पुष्पदन्तपदे वा स्थापितं द्वारं शुभं जनयति। यमपदे वैवस्वतपदे गन्धर्वपदे गृहक्षतपदे वा शयनप्रकोष्ठः निर्मातव्यः। प्राक्शिरोभूत्वा शयनं प्रकर्तव्यमिति विदुषां वचनम्। पूषापदे अथवा वरुणपदे अथवा पूर्वदिशां

1. वा.वि. 4/20
2. वा.वि. 4/21

प्रति प्रोक्तपदेष्वन्यतमे पाकशाला निर्मातव्या। एवं गन्धर्वपदे आस्थानमण्डपः तथा असुरपदे गोष्ठागारः करणीयः। पैतृकपदे तावत् गर्भभूमिः प्रकुर्यात् वैश्यः इति विदुषामभिप्रायः। शूद्राणां तु - भल्लाटे च महेन्द्रे च द्वारे शूद्रस्य पूजिते इति श्लोकत्रये द्वारादिस्थानं प्रोक्तम्। अर्थात् शूद्रेण भल्लाटपदे महेन्द्रपदे वा द्वारं स्थापनीयम्। सुग्रीव-पुष्पदन्त-मित्र-वरुणपदेष्वन्यतमपदे शयनगृहस्य द्वारं भवेत्। परन्त्वेषः नियमः न केवलं शूद्राणाम्, अपि तु सर्वसाधारणोऽयं वर्तते। दौवारिकपदप्रमाणानुसारं पैतृकभूमेः अर्थात् रुद्रभूमेः निर्धारणं कर्तव्यम्। पूषापदे पाकशाला, असुरपदे च गोष्ठागारः, तस्य तस्य द्वारं वा विद्यात्। स्थानभूमिः अर्थात् आस्थानमण्डपः सर्वदा गन्धर्वपदे एव भवेद् इति प्रोक्तम्।

पादाधिष्ठान-लुपाकरणादीनां कथनात्परम् अधुना द्वारविन्यासः निरूप्यते। तदङ्गतया अवनतयन्त्रेण भूमेः समीकरणमपि कथ्यते। तत्रादौ अवनतयन्त्रस्य लक्षणं उक्त्वा तेन समतलनिर्माणप्रकारं प्रतिपादयति वास्तुविद्याकारः यथा– **अथ कुर्यादवनतं पट्टिकाभिस्त्रिभिः पुनः।**[1] अत्रादौ अवनतयन्त्रस्य लक्षणोक्तप्रकारेण समतलकृते स्थाने पट्टिकात्रयम् अवनतरूपेण स्थापनीयम्। ताः पट्टिकाः त्रिकोणरूपेण पञ्चविंशत्यङ्गुलान्तरे संस्थापनीयाः। तदनन्तरं जलेन तलस्यार्थात् भूमेः समतलत्वं वीक्ष्य तत्र शङ्कुद्वयं स्थापयेत्। जलोपरि समानरूपेण कीलैः प्रमाणं स्वीकृत्य कोणत्रयात्मकयन्त्रस्य पार्श्वपट्टिकासु सम्भावयेत्। एवं क्रमेण अवनतयन्त्रविधिना शङ्कुं स्थापयित्वा सूत्रं प्रसारणीयम्। सूत्रमेतत् तिर्यक्पट्टिकायाः अङ्ककुंगतेरवलोकनार्थमपेक्षितम्। अत्र पार्श्वयोः अन्तरमुन्नतं भवति। अङ्कस्य एवं सूत्रस्य संयोगं सूक्ष्मरूपेण ज्ञात्वा भूतलस्य निम्नोन्नती समीकुर्यात्। सामान्यः अर्थः एवं भवति यत् द्वारस्थाने भूमिः एकरूपा अथवा समतला कार्या इत्येव। इत्थं प्रथमं भूपृष्ठं समीकृत्य अनन्तरं गृहाधिष्ठानाधारतया उपपीठमित्येकमवयवं योजयेदिति पुनरुच्यते वास्तुविद्यायाम् – **अधिष्ठानस्य चाधस्तादुपपीठं प्रयोजयेत्।**[2] एवं पूर्वोक्तप्रकारेण भूपृष्ठं समीकृत्य परम् अधिष्ठानस्य अधोभागे उपपीठस्य प्रयोगः करणीयः। एवंरूपेण स्थापितमुपपीठं भवनस्य औन्नत्यर्थम् अत्यन्तं सुदृढरूपेण निर्मातव्यम्। तथा तदुपपीठं शोभाजनकमपि भवति। सम्प्रति अस्योपपीठस्य प्रमाणमुच्यते - **समं त्रिपादमर्धं वा पञ्चांशद्व्यंशमेव वा**[3] इति। उपपीठस्य प्रमाणम् अधिष्ठानस्य समं, त्रिपादम्, अर्धं, पञ्चांशं, द्व्यंशं, सपादम्, सार्धं, पादोनं, द्विगुणं, पादोनद्विगुणं वा प्रमाणं स्वीकृत्य उपपीठस्य निर्माणं कार्यम्। एवमेव पादुकाख्यप्रथमावयवात् उपपीठस्य निष्क्रमणं कथ्यते - **आद्यङ्गपादुकस्य निष्क्रमं करमानतः**[4] इति। अत्र आद्यङ्गमिति अधिष्ठानस्यैव नामान्तरम्। निष्क्रामो नाम विस्तारः। तस्मात् आद्यङ्गात् अर्थात् अधिष्ठानात् करमानमितं, पादोनकरमितं, सपादकरमितं, सार्धकरमितं, पादोनद्वितयकरमितं, किष्कुद्वयकरमितं वा विस्तारयुक्तम् उपपीठं रचनीयम्। इत्थमत्र षट् प्रकारकोपपीठविस्तृतिः निरूपिता। अग्रे जलप्रणालीस्थानम् **उपपीठबहिर्भागमवाटाङ्गणमीरितम्**[5] इति श्लोकेनोक्तम्। जलप्रणालीत्यस्य जलमार्ग ईत्यर्थः। उपपीठस्य बहिर्भागात् अवटाङ्गणं कर्तव्यम्। तन्नाम गृहस्यान्तर्भागस्थमङ्गणमित्यर्थः। तच्च अवटाङ्गणम् उपपीठात् बहिर्भागे ईशान्यकोणे निर्मातव्यम्। कदाचित् प्राङ्मुखमपि भवितुमर्हति इति ग्रन्थकारेणोक्तं श्लोके दृश्यते।

---

1. वा. वि. 13/1-4
2. वा. वि. 13/05
3. वा. वि. 13/6-7
4. वा. वि. 13/8-9
5. वा. वि. 13/10

मनुष्यालयचन्द्रिकायां **कुर्याद् गृहाय कृतवास्तुपदं समस्तम्**[1] इति श्लोके गृहाय वास्तुपदं निर्मातव्यमित्युक्तम्। गृहस्य अधोभागाद् बहिर्भागाद् अन्तर्भागस्थे चाङ्गणे जलं यथा न तिष्ठेत् तथा कर्तुम् एवम् अन्तस्थाङ्गणे विद्यमानस्य निम्नत्वस्य निवारणार्थञ्च सम्पूर्णे निवासस्थाने मृत्तिकया, शिलया अथवा अन्येन वस्तुना वा अष्ट-द्वादश-षोडशाङ्गुलपरिमित्या औन्नत्यं कार्यम्। यतो हि भवननिर्माणे वास्तुपदं तावत् अतीवमुख्यम्। तद्यदि दृढं न भवति तर्हि निर्मितभवनं कदापि पतितुमर्हति। तस्मात् पञ्चाङ्गमपि दृढं भवेत्। तथैव निवेशनस्थानं दृढं विद्यते चेदपि तां भूमिं समतलात्मिकां कृत्वा सामान्यभूतलाद् अष्ट-द्वादश-षोडशाङ्गुलमितरूपेण कर्तव्यम्। अनन्तरं तस्योपरि गृहनिर्माणं कार्यम्। अत्र भारतीयवास्तुशास्त्रज्ञैः न केवलं भित्तिनिर्माणस्थानम्, अपि तु सम्पूर्णं निवेशनमेव भद्रं दृढं च भवेदित्युक्तम् इत्यवगम्यते। आधुनिककाले प्रधानतया जनाः स्तम्भ - भित्तिनिर्माणस्थानमेव भद्रं दृढं च कांक्षन्ति। अग्रे उपपीठरचना तथा निवेशस्थजलमार्गं च कथ्यते– **रक्षाशोभोच्छ्रयार्थं सकलनिलयमासूरतोऽधः समन्तात्**[2]**।** अत्र सर्वेषां गृहाणां पञ्चाङ्गस्य अर्थात् अधिष्ठानस्य अधोभागे गृहस्य रक्षणार्थं सौन्दर्यार्थम् एवम् उन्नत्यर्थं च अष्टाष्टाङ्गुलानां संयोजनेन एकहस्तपरिमितं वा द्विहस्तपरिमितम् उपपीठं रचयेत्। अन्तः गर्ताङ्गणे तावद् दक्षिणोत्तरस्य आदितः आन्तमपि वृषभयोनिः ध्वजयोनिर्वा भूत्वा निवेशनस्य जलम् ईशान्यदिशि यथा गच्छेत् तथा उत्तरस्यां पूर्वस्यां वा दिशि जलमार्गः करणीय इत्युक्तम्। पुनः गेहाधिष्ठानोच्चतुल्यो रसादि.... इत्यत्र मनुष्यालयस्योपपीठस्य औन्नत्यम् अधिष्ठानस्यौन्नत्यं प्रति समानं स्यात् अथवा अधिष्ठानस्य औन्नत्यस्य षट्सु पञ्चभागमितम्, सप्तसु षड्भागमितम्, अष्टसु सप्तभागमितम्, नवसु अष्टभागमितम्, दशसु भागेषु नवभागमितं वा उपपीठस्य औन्नत्यं भवेदेव। पादुकादीतरावयवानां तस्य तस्य औन्नत्यं विभज्य रचयेद् इत्युक्तम्। इतरावयवास्तु पादुका, जगतिः, कुमुदः, गल इत्यादयः।

इत्थं ग्रन्थद्वयेऽपि उपपीठरचना जलमार्गनिर्माणविधिश्च निरूपितः। उपपीठनिर्माणक्रमे कश्चन भेदः ग्रन्थद्वये दृश्यते। यतो हि वास्तुविद्यायां समम्, त्रिपादम्, अर्धम्, पञ्चांशम् इत्यादीनि प्रमाणानि स्वीकृत्य उपपीठं निर्मातव्यम् इत्युक्तम्। तथैव करमानव्यत्यासेन उपपीठस्य निष्क्रमणमर्थात् विस्तारः अपि निरूपितः। मनुष्यालयचन्द्रिकायां तु प्रत्येकम् अष्टाङ्गुलयोजनेन एकहस्तमितम्, करद्वयमितं वा उपपीठं निर्मातव्यमित्युक्तम्। तस्माद् उपपीठनिर्माणप्रमाणे एव ग्रन्थद्वयेऽपि व्यत्यासः दृश्यते। तदर्थमङ्गणस्य समतलत्वं कार्यमिति द्वितयेऽपि प्रोक्तमेव। अतः अत्र कश्चन भेदः वाच्यः।

इत्थं द्वारविन्यासार्थं बहवो विषयाः प्रतिपादिताः। सन्दर्भानुगुणं गृहनिर्माणसमये सर्वमवलोक्य कार्यं साधयामश्चेत् दोषाः समस्याः वा समीपं नायान्ति इति वदन् अत्रैवोपसंहरामि।

❀ ❀ ❀

1. म. चं. 05/01
2. म.चं. 5/02

# ग्रामस्य मुख्यद्वारम्

**– डॉ. अश्वनीकुमारः**

वास्तुशास्त्रस्यानुसारं कस्यापि भवनस्य प्रासादस्य कार्यालयस्य वा मुख्यद्वारं बहुमहत्त्वं धत्ते । गृहस्य समृद्ध्यर्थं परमावश्यकमस्ति यत्सर्वप्रथमं तस्य मुख्यद्वारस्य दिशा दशा च सम्यग्रूपेण निर्धारिता भवेत् । यथा मानवशरीरे मुखस्य महत्ता भवति, तथैव भवन-प्रासाद-गृह-कार्यालयाणां मुख्यद्वारस्यापि महत्त्वं भवति ।

तत्र मुख्यद्वारं सदैव अन्यद्वारानामापेक्षया सुविस्तृतं दीर्घं सुसज्जितं च भवेत् । वास्तुसिद्धान्तानामनुसारं सकारात्मकदिशि द्वारं गृहस्वामिने लक्ष्मीं, वैभवञ्च प्रददाति, एतद्विपरीतं नकारात्मकदिशि मुख्यद्वारं जीवने समस्यां जनयति । अतः भवनादीनां द्वाराणां निर्माणकाले वास्तुशास्त्रस्य नियमानां परिपालनं कर्त्तव्यम् । प्रसंगेऽस्मिन् विश्वकर्मवास्तुशास्त्रे विश्वकर्मणा कथितं यत्-शुभ-मुहूर्त्त-समय-दिवस-कालतिथ्यादिसर्वान् निरीक्ष्यैव स्वहस्ते कङ्कणादिं धारयित्वा पवित्रमनसा स्वस्य इष्टदेवस्य भक्तिपूर्वकमर्चनां कुर्यात् । समस्तमंगलघोषस्वस्तिवाचनादिभिः सह शिल्पी गृह-भवन-प्रासादानां वास्तुस्थलस्य प्रदक्षिणां कुर्यात्तथा च तस्य कृतेऽत्यावश्यकस्य मुखद्वारस्य परिकल्पनां कुर्यात् ।[1]

**ग्रामे वास्तुकल्पना -**

**गृह-नगर-ग्रामेषु च सर्वत्रैव प्रतिष्ठिता देवाः ।**
**तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः ॥**[2]

यथा गृहे वास्तुपुरुषोऽस्ति तथैव सम्पूर्णग्रामनगरयोरपि वास्तुपुरुषस्य कल्पनां कृत्वा मर्ममहामर्म-स्थानयोर्भेदनं न कर्त्तव्यमेवञ्च यथोचितदिग्भेदेन वर्णानुसारं जनानां बोधनं कर्त्तव्यम्।

वर्णानां वासस्थानम् - ग्रामनगरयोर्यथासम्भवमुत्तरदिशि ब्राह्मणवर्णः, पूर्वदिशि क्षत्रियवर्णः, दक्षिणदिशि वैश्यवर्णस्तथा पश्चिमदिशि शूद्रवर्णस्यावासो भवेच्चेद्विशेषशुभं भवति।[3]

**नगरे गृहे वा कोणविचारः -**

ग्राम-नगर-गृह-भवनादिषु चतुर्षु कोणेषु ईशानकोणे चरकी, अग्निकोणे विदारी, नैर्ऋत्यकोणेपूतना, वायव्यकोणे राक्षसी च निवसन्ति। अतः ग्रामनगरयोरेतेषु कोणेष्वन्त्यज-श्वपच-चाण्डालादीनां हीनकर्मजनानां

---

1. 'शुभे मुहूर्त्ते सुदिने स्थपतिर्धृतकंकणः। शुचिः शुद्धमना भक्त्या पूजयित्वेष्टदेवताः ॥'
   'सर्वमंगलघोषैश्च स्वस्तिशब्दैश्च शिल्पिभिः । वास्तुं प्रदक्षिणीकृत्य मुखद्वारं प्रकल्पयेत् ॥' विश्वकर्मवास्तुशास्त्रम्, २५.१-२
2. बृहत्संहिता, ५२.६७
3. 'वासगृहाणि च विन्द्याद्विप्रादीनामुदग्दिगाद्यानि । विशतां च यथा भवनं भवन्ति तान्येव दक्षिणतः ॥' बृहत्संहिता, ५२.६८

निवासः कर्त्तव्यः।[1] ग्रामस्य सामूहिकद्वारस्य व्यवस्थायां पिण्डस्य दैर्घ्यभागस्याथवा यस्यां दिशि द्वारनिर्माणं करणीयं तस्याः विस्तारस्य नवभागान् कृत्वा पूर्वादिदिक्क्रमानुसारं द्वारनिर्माणं कर्त्तव्यम्, पूर्वदिशि तृतीयचतुर्थभागयोः, दक्षिणदिशि चतुर्थषष्ठभागयोः, उत्तरपश्चिमदिशौ च चतुर्थपञ्चमभागयोर्द्वारं शुभं भवति ।[2]

मण्डकादिसर्वविधग्रामाः भवेयुर्दुर्गो भवेयुरथवा नगरपुरादयो भवेयुस्तेषां मुख्यद्वाराणि व्यक्तरूपेण निर्धारितमानानुसारेण कल्पितानि भवितव्यानि। येषां पथिको दूरादेव ग्रहणं कर्त्तुं समर्थो भवेत्।[3] 'ग्रामस्य मुख्यद्वारमेवं सुव्यक्तं भवेत् यत् तस्य सम्मुखे गोपुरस्य महामण्डपस्य वा स्थापना सुलभा भवतु । तत्र महास्ताम्भस्य निर्माणमपि भवितुमर्हति तथा च वर्धनशीलमहावृक्षस्यापि स्थापना भवितुमर्हति[4]। तत्र ईष्टिकासुधाभिरट्टापथस्तम्भस्य निर्माणं कर्त्तुं शक्यते। अनेनैव प्रकारेण तत्र समयसूचनार्थं घण्टागृहस्य निर्माणमपि भवितुमर्हति। मुख्यद्वारस्य पार्श्वे तडागः सघनवृक्षावली चापि सौन्दर्यवर्धने सहायकौ स्तः। एवं तत्र पेयजलार्थं जलाशयस्य निर्माणमपि भवितव्यम्। मुख्यद्वारस्थले नानास्थानानि स्थापयेत्।[5] ग्रामस्य सुरक्षानिमित्तं मुख्यद्वारे सदैव सायुधैर्योधगणभट्टान् नियुक्तं कर्त्तव्यम्। विशेषप्रकारेण एभिर्द्वारस्य रक्षा कर्त्तव्या।[6] तत्र एकस्य द्वयोः त्रयाणां चतुर्णां वा अन्यक्षेत्रेभ्य आगतानां महापथानां मेलनस्थानं निर्मितव्यम्। एवञ्च तत्र विहारस्थलानां दर्शनीयस्थलानामपि स्थापना कर्त्तव्या[7]। एवं तत्र महापणव्यापारस्य आपणाः भवितव्या ये विविधसामग्रिद्रव्यैः पूरिता स्युः। एतदतिरिक्तं तत्र वार्षिक-मासिकरूपैरापणानां व्यवस्थाऽपि कर्त्तव्या, विशेषरूपेण लोह-काष्ठ-शिला-वेण्वादीनां विपणस्थलमपि भवेत्[8]। द्वारस्य दूरभागे कोणेष्वेव यत्र-कुत्र चाण्डाल-पुलिन्द-किरातादीनां कृतेऽपि स्थानस्याबण्टनं कर्त्तव्यम्। निम्नवर्गस्य समुदायस्य व कृतेऽपि तत्र दिशः कोणेषु स्थानं प्रदाय आवासस्य व्यवस्था कर्त्तव्या। उपलब्धभूम्यनुसारं तत्र द्वारस्य समीपभागे एव यव-अन्नादिभ्यः तुषनिष्कासनाय खलस्थानस्य निर्माणमपि कर्त्तव्यम्।[9] एतदतिरिक्तं ग्रामस्य मुख्यद्वारं नृत्तस्थलेन युक्तं लोहकार्यालययुक्तं वा कर्त्तव्यम्। एवं प्रकारेण शिल्पी नगरस्य मुख्यद्वारं सुखदरूपेण

---

1. 'ऐशान्यादिषु कोणेषु संस्थिता बाह्यतो गृहस्यैताः । चरकी विदारिनामाऽथ पूतना राक्षसी चेति ॥'
   'पुरभवनग्रामाणां ये कोणास्तेषु निवसतां दोषाः । श्वपचादयोऽत्यजात्यास्तेष्वेव विवृद्धिमायान्ति ॥' बृहत्संहिता, ५२.८१-८२
2. 'दैर्घ्ये नवांशा पदमत्र सव्याद् द्वारं शुभं प्राक्त्रिचतुर्थभागे ।
   चतुर्थषष्ठे दिशि दक्षिणस्यां पश्चाचतुःपञ्चमके तथोदक् ॥' स. शि. २०.११७ ,वास्तुसारः
3. 'ग्रामाणापि सर्वेषां दुर्गुणञ्च पुरामपि । मुख्यद्वारं व्यक्तरूपं यथामानं प्रकल्पयेत् ॥' विश्वकर्मवास्तुशास्त्रम्, ६७.१
4. 'गोपुरस्थापनाद्वापि महामण्टकल्पनात् । महास्तम्भस्थापनाद्वा महावृक्षप्रवर्धनात् ॥' विश्वकर्मवास्तुशास्त्रम्, ६७.२
5. 'अट्टापथस्थापनाद्वा घण्टास्थानप्रकल्पनात् । तटाकसहितं वापि सन्निकृष्टमहीरुहम् ॥'
   जलाशययुतं वापि नदीह्रदसमन्वितम् । विश्वकर्मवास्तुशास्त्रम्, ६७.३
6. 'सुरक्षितं योधगणैर्भटैर्वा भृत्यकैरपि । सायुधन्तु पुरद्वारं रक्षणीयं विशेषतः ॥'विश्वकर्मवास्तुशास्त्रम्, ६७.४
7. 'एकं द्वयं त्रयं वापि चतुष्कं मेलनं भुवः । विहारस्थानकोपेतं दर्शनस्थानकं तथा ॥' विश्वकर्मवास्तुशास्त्रम्, ६७.५
8. 'महापणश्रेणियुतं भूरिद्रव्यैर्युतं क्वचित् ।' 'वार्षिकं मासिकं स्थानं पाक्षिकं वा क्वचिन्मतम् ।
   लोह-दारु-शिला-वेणुक्रयस्थानादिसंयुतम् ॥' विश्वकर्मवास्तुशास्त्रम्, ६७.६ (श्लोकांशः)
9. 'तद्दुरभागकोणेषु चण्डालानामपि क्वचित । पुलिन्दानां किरातानां मांसविक्रयाणामपि ॥'
   'नीचानामपि दिक्कोणे स्थानं भूमिवशान्नयेत् । स्थलयोग्यं खलस्थानं क्वचित्तत्रैव कल्पयेत् ॥' विश्वकर्मवास्तुशास्त्रम्, ६७.१०

कल्पितं कुर्यात् ।[1]

**द्वाराणां शुभस्थितिमाह -** आदित्यस्य स्थाने द्वारस्थापने सति अर्थस्य हानिर्भवति। यमस्य स्थाने द्वारकल्पनात् पुत्रस्य मृत्युः तथा च सोमस्य स्थाने द्वारस्थापनेन कुलस्य क्षयो भवति। आग्नेयकोणे द्वारस्थापनेन अग्निभयं भवति। पूषायाः स्थाने द्वारस्थापनेन द्वारं सम्पतिकारकं भवति। वितथस्थाने द्वारस्थापनेन सर्वदा आरोग्यता आयाति, तथा च गृहक्षतस्थाने द्वारस्थापनेन द्वारं बलप्रदायकं भवति। यमस्थाने श्रीः तथा च गन्धर्वस्थाने द्वारस्थापनेन मृत्युर्भवति। भृङ्गराजस्थाने धनप्राप्तिः पुत्रप्राप्तिश्च भवति। मृगस्थाने सूर्य स्थाने वा द्वारस्थापनेन वैक्रम्यस्य प्राप्तिर्भवति। पितृस्थाने द्वारस्थापनेन आयुवृद्धिः, दौवारिकस्य अंशे द्वारस्थापनेन सम्पत्तिवृद्धिश्च भवति। सुग्रीवस्थाने द्वारस्थापनेन कृषिकार्ये प्रचुरता एवञ्च पुष्पदन्तस्य स्थाने द्वारस्थापनेन सम्पदा आयाति। वरुणस्थाने स्थापनद्वारमारोग्यदायकं भवति । असुरस्थाने द्वारस्थापनेन क्षयो भवति। शेषस्य स्थाने द्वारं क्षयप्रदं तथा च भल्लाटस्य स्थाने स्थापितद्वारमर्थवर्धकं भवति। सोमस्य स्थाने द्वारस्थापनेन क्षीणतायां वृद्धिर्भवति। पर्वतस्थाने नागस्थाने वा द्वारस्थापनेन बहूद्वेगो भवति। अतः यस्मिन् स्थाने अभिवृद्धिर्भवति, तन्मानानुसारं द्वारं परिकल्प्यते।[2]

**वास्तुदृष्टया द्वारदोषाणां परिहारोपायः -**

वास्तुशास्त्रस्यानुसारं कस्यापि भवनस्य प्रासादस्य वा मुख्यद्वारस्य बहुमहत्त्वं भवति। वास्तुशास्त्रं अस्मान् सकारात्मकनकारात्मकोर्जायाः सन्दर्भे तस्य महत्त्वसन्दर्भे वा ज्ञापयति । सकारात्मकोर्जायाः वृद्धौ सति गृहे प्रसन्नता आगच्छति, तथा तत्र नकारात्मकोर्जायाः वृद्धौ सति दुःखं रुग्णता चायाति। अतः अनया नकारात्मकया ऊर्जया गृहे वास्तुदोषं सम्प्राप्यते। यस्या उपस्थितेरनुमानं केनाऽपि न क्रियते। वास्तुशास्त्रस्यानुसारं गृहस्य मुखद्वारं बहुमहत्त्वपूर्णमुपयोगि च भवति। द्वारनिर्माणकाले अस्य द्वारस्य दिग्वर्णयोर्ज्ञानमवश्यमेव करणीयम् । द्वारनिर्माणेऽन योरतिमहत्त्वपूर्णं स्थानं विद्यते। यथा कया दिशा गृहे सकारात्मकाया ऊर्जायाः तथा च कया दिशा गृहे सकारात्मकाया ऊर्जायाः प्रवेशो भवति। अतः सर्वप्रथममिदमावश्यकमस्ति, यत् गृहनिर्माणकाले मुख्यद्वारस्य दिशं दशाञ्च सम्यग्रूपेण वास्तुशास्त्रानुसारेणैव विचिन्तयेत्। मुख्यद्वारं सर्वदा सर्वथा च अन्यद्वाराणामपेक्षया बृहत् व सुसज्जितञ्च भवेत्। वास्तुसिद्धान्तानुसारं सकारात्मकदिग्युक्तं द्वारं गृहस्वामीं लक्ष्मी-ऐश्वर्य-परिवारिकसुख-वैभवादिकञ्च प्रददाति। परञ्च नकारात्मकदिग्युक्तं द्वारं गृहस्वामीजीवने समस्यान् उत्पादयति। अतः भवनस्य मुख्यद्वारनिर्माणकाले प्रयत्नपूर्वकं विचारः करणीयः। तत्र द्वारस्य वेधत्यागः प्रयत्नपूर्वकं करणीयः।

गृहस्य यावतोच्चता भवति तया द्विगुणितं दूरं विद्यमाने स्थाने वेधपदार्थो भवति चेत् मुख्यद्वारनिर्माणे कोऽपि दोषो न भवति । स वेधः गृहस्वामीकृतेऽथवा गृहिणीकृते दोषकारको न भवति । यदि गृहस्योच्चतायाः समानदूरमेव मुख्यद्वारस्य वेधोऽस्ति चेत् गृहस्वामिनो वेधो भवति, परञ्च गृहिणीकृते दोषकारको न भवति । यतो हि गृहिणी गृहाऽर्धा भवति। विश्वकर्मप्रकाशेऽप्युक्तमेव[3] यदि कस्याऽपि भवनस्य द्वारं वृक्षेण वेधितम्, कर्णवेधेन युक्तम्, स्थूणा

1. 'नृत्तस्थलयुतं वापि लोहकार्यालयान्वितम् । मुख्यद्वारं कल्पनीयं सुखदं शिल्पिभिः क्रमात् ॥' विश्वकर्मवास्तुशास्त्रम्, ६७.११
2. वास्तुमञ्जर्यामप्युक्तम् श्लो. ३४४-३४९
3. 'द्वारवेधं तु यत्नेन सर्वथा परिवर्जयेत् । गृहोच्छायाद द्विगुणितं त्यक्त्वा भूमिं बहिस्थितः ॥'
'न दोषाय भवेद् वेधो गृहस्य गृहिणीस्तथा । गृहार्धं गृहिणी ज्ञेया गृहात्पूर्वोत्तरा शुभ ॥' विश्वकर्मप्रकाशः, ७.९७-९८

वेधितं, कूपेन वा वेधितं स्यात्तर्हि तद्वारं दोषयुक्तं भवति । भवनस्य मुख्यद्वारसम्मुखे यदि कोऽपि निर्मित्तदेवालयः, काऽपि वीथिका, बाम्बी-भस्मस्थानञ्च शिराममर्मादिविद्धकानि स्थानानि सन्ति चेत्तदा तं द्वारं विषनाडीसमानमेव ज्ञातव्यम् । अनेन द्वारेण युक्तं भवनं बह्वशुभकारकं मन्यते । द्वारं सुष्ठुपदस्थाने भवेत्, तथा च मुख्यद्वारं भवनस्य रक्षां करोति, तस्मात् तद्वारं बहुस्थूलीकृतं सदृढं सौन्दर्ययुक्तञ्च भवेत् । यथा मयमतग्रन्थेऽप्युक्तमस्मिन् विषये[1]- गृहस्य मुख्यद्वारस्य रोधनं न कर्त्तव्यम् तत्कृते तस्य पिहितद्वारस्य पृष्ठभागे अन्यद्वारस्य निर्माणं न कर्त्तव्यम्, हि मुखद्वारस्य रोधनं निश्चितरूपेणैव कुलनाशस्य कारकं भवति । यस्य द्वारस्य कपाटं बलेन विना स्वयमेवोद्घाटितं भवति, तद्वारमशुभफलदायकं भवति। निर्धारितशास्त्रोक्तमानात् न्यूनमथवाऽधिकं द्वारं निर्मीयते चेत्तदप्यशुभं भवति। तत्र यदि वास्तुशास्त्रमानान्न्यूनं द्वारं भवति, तर्हि गृहे सन्तापप्रवेशो भवति तथा च वास्तुशास्त्रमानादधिकं भवेच्चेदपि राजभयं भवति । यदि द्वारमर्ध खण्डितं तदा तद्दलवेधः कथ्यते। विश्वकर्मप्रकाशे यथोक्तम्-[2] वास्तुशास्त्रस्यानुसारं विभिन्नदिक्षुर्निर्माणकार्ये पूर्वनिर्मितगृहे वा वास्तुदोषः सम्भवोऽस्ति। अनेन प्रकारेण सर्वे द्वारवेधाद् दुर्भागः, निधनम्, रोगः, दरिद्रता, कलहः, विरोधः, अर्थनाशश्चेति भवति । विश्वकर्मप्रकाशस्यानुसारं गृहं परितः शुभवृक्षाः तथा विभिन्ननिर्माणानि कर्त्तव्यानि। गृहस्य पूर्वदिशि फलयुक्तवृक्षाः स्थापयेयुः। दक्षिणदिशि क्षीरयुक्तावृक्षाः शुभफलदायकाः भवन्ति । पश्चिमदिशि जलाशयो श्रेष्ठो भवति, यस्मिन् पङ्कजोत्पत्तिरपि विद्यमाना भवेत्।

गृहं परितः परिखा-वलय-वृत्तादीनां निर्माणं कर्त्तव्यम्। दक्षिणदिशि तपोवनस्य स्थाननिर्माणं तथा उत्तरदिशि च मातृकागृहस्य निर्माणं कर्त्तव्यम्। पश्चिमदिशि श्रीलक्ष्मीनारायणस्य देवालयं, वायव्ये नवग्रहाणां पङ्क्तिञ्च स्थापयेयुः । उत्तरदिशि यज्ञशालां तथा निर्माल्यस्य स्थानञ्च स्थापयेत् । पश्चिमदिशि सोमदेवस्य स्थानं बलिनिर्वपणाय स्थापयेत् । द्वारमुभयतः स्वस्ति-तुलसीवृक्षादि स्थापयेत्।

ईशानकोणे जलवापीं निर्मययेत् तथा च जलशायी-विष्णोः स्थानमपि भवेत् । द्वारे सिद्धगणपतेः स्थापना कुर्यात् । एवं प्रकारेण देवगणानां स्थानानि तेषां शुभमण्डपैः सह कारयेत् । अनेनैव क्रमेण यः प्रसन्नमनसा कस्यापि स्वेष्टदेवालयस्य निर्माणं करोति, सः यदि घण्टा-वितानक-तोरणदिभिः देवालयमलङ्कृत्य नित्यपूजां करोति, तस्य गृहे लक्ष्मीः सदैव तिष्ठति ।[3] यो द्वारार्चनविधिं बलिदानञ्च कृत्वा द्वारस्य मुखे एकं महाध्वजं स्थापयति, तस्य पुत्र-स्त्री-धनादिषु वृद्धिर्भवति । तस्य सर्वकार्याणि सफलानि भवन्तीति ।[4]

❁ ❁ ❁

1. 'देवायतनविद्धं च विथिधि (धि?) विद्धं तथैव च । वल्मीकभस्मविद्धं च सिराममर्मादिविद्धकम् ॥'
   'विषनाडीसमानं च फणयोः पद्मेव च । स्थूलभावावनं रक्षाद्वारं तद् (तु?) लसितं वरैः ॥' मयमतम्, ३०.३९-४०
2. 'पिहिते मुखद्वारे तु कुलनाशे भवेद् ध्रुवम् । पृष्ठद्वारे सर्वनाशः स्वयमुद्घाटिते तथा ॥'
   'मानोने व्यसनं कुर्यादधिके नृपतेर्भयम् । अर्धखण्डं यदि द्वारं दलवेधं विनिर्दिशेत् ॥' विश्वकर्मप्रकाशः, ७. श्लो. १००-१०१
3. विश्वकर्मप्रकाशः, ७. श्लो. ११५-१२०
4. एवं द्वारार्चनविधिं कृत्वा द्वारबलिं ततः । महाध्वजं द्वारमुखे प्रवेशसमये कृतम्॥ विश्वकर्मप्रकाशे यथोक्तम् ७. श्लो. १२१

# लङ्कादेशस्य स्थानपरिकल्पनायां भेदः वर्तमानस्थितिश्च

**– अंशुलकुमारदुबे**

सिद्धान्तग्रन्थेषु सर्वत्र मध्यमभूपरिधि-स्पष्टभूपरिध्योः साधनं क्रियते। मध्यमभूपरिधिः पृथिव्याः मध्यमस्थानाद्गच्छति ,भूमेः मध्यस्थानमेवनिरक्षस्थानं कथ्यते। निरक्षदेशो उत वा स्थानं नाम यत्र अक्षांशस्य अभावः स्यात् । क्षितिजात् ध्रुवोन्नतिरेव अक्षांशः। गोले समस्थानयोः ध्रुवस्थानयोः अन्तरमक्षांशः। निरक्षदेशे अक्षांशस्य अभावः भवति अतः तत्र क्षितिजसंलग्ने ध्रुवतारे याम्ये उत्तरे च दृश्येते। निरक्षदेशीयस्थानानां ग्रन्थेषु वर्णनं दृश्यते, निरक्षस्थानेष्वेव लङ्का परिगण्यते । अतः तस्य वर्णनं सूर्यसिद्धान्ते-

**राक्षसालयदैवौकः शैलयोर्मध्यसूत्रगः रोहीतकमवन्ती च यथा सन्निहितं सरः।**[1]

सिद्धान्तशिरोमणौ-

**यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान्स्पृशत् ।**

**सूत्रं मेरूगतं बुधैर्निगदितं स मध्य रेखा भुवः ॥**[2]

लङ्कादेशस्य प्रसंगः सूर्योदयसूर्यास्तयोः साधने अहर्गणसाधने लग्नसाधने च दरिदृश्यते यथा – **लङ्कायामार्धरात्रिकः**[3] सावनाहर्गणसाधने लङ्कादेशीयार्धरात्रिकालिकाहर्गणं साध्यते।

सूर्योदयविषये-

**लङ्कापुरोर्कस्य यदोदयः स्यात् तदा दिनार्धं यमकोटिपुर्याम् ।**[4]

देशान्तरं तथा रेखापुराणां वर्णने –

**लङ्काकुरुक्षेत्रदेवकन्याः सिताद्रिरौहीतकवत्सगुल्मम्।**[5]

अहर्गणेनानुपातसिद्धलङ्कादेशीयग्रहाः देशान्तरेण संस्कारेण संस्कृताः भवन्ति । परं विचारणीयं वर्तते यत् लङ्कादेशोऽति कः? सम्प्रति श्रीलङ्का इति नाम्ना ख्यायते अथ च प्राक्तनो देशः यः निरक्षरेखायां उत वा मध्यमभूपरिधौ आसीत् किन्तु वर्तमाने श्रीलङ्का इति देशः भूमध्यरेखायां नास्ति ।

---

1. सू.सि.मध्यमधिकारः62 चौखंबा संस्कृत प्रतिष्ठान वाराणसी
2. सि.शि.मध्य.अधि.भूपरिधि 2 चौखंबा संस्कृत प्रतिष्ठान वाराणसी
3. सू.सि.मध्यमधिकारः50 चौखंबा संस्कृत प्रतिष्ठान वाराणसी
4. सि.शि.मध्य.अधि.भुवनकोशः44 चौखंबा संस्कृत प्रतिष्ठान वाराणसी
5. सि.चूडामणिः,रङ्गनाथाचार्यः,,सरस्वतीसुषमा संवत 2014

अतः विचारणीयं वर्तते यत् निरक्षस्थिता वास्तिविकी लङ्का का? उच्यते सिद्धान्तमञ्जूषायां[1] अस्मिन् विषये म.महो.मधुसूदन-ओझामहोदयः स्वग्रन्थे इन्द्रविजये[2] द्वादशविप्रपत्तिभिः व्याचक्षते यत्- अधुना केचन विद्वांसः सिंहलद्वीपं लङ्काद्वीपं मन्यन्ते, परन्तु वयं वदामः यत् एषा सर्वथा भिन्ना धारणा अस्ति । लङ्का इत्यादयः शब्दाः भारतीयग्रन्थेषु प्राप्यमाणाः संज्ञाः सन्ति। यस्य समाधानं केवलं भारतीयशास्त्राणाम् आधारेण सम्भवति, स्वस्य कामनाधारितं समाधानं स्वीकार्यं न भवितुम् अर्हति। अन्यथा कपोलकल्पितकृतं मतं व्यर्थं भविष्यति। भारतीयग्रन्थेषु लङ्का सिंहलद्वीपात् भिन्ना इति वर्णिता अस्ति। "बृहत्संहिता"[3] इत्यस्य कूर्मखण्डे लिखितम् - "दक्षिणे दिशि लङ्का-कलाजिन-सौरीकर्ण- तालिकता, काञ्ची-मरुचि-पतन्चेरी-आर्यक-सिंहल-ऋषभा च। एवं प्रकारेण लङ्का, सिंहलस्य च पृथक् पृथक् वर्णनं कृतम् अस्ति।" यदि सिंहलद्वीपः लङ्काद्वीपः अस्ति। तर्हि भागवतादिषु महापुराणेषु सिंहलद्वीपः सप्तमः द्वीपः इति वर्णितः, लङ्का अष्टमः द्वीपः इति न वर्णितः अतः सिंहलद्वीपः लङ्काद्वीपः च भिन्नाः इति सिद्धम्। भारतीयार्यग्रन्थेषु लङ्का निरक्ष (अक्षांशरहितस्थानम् अर्थात् 0° डिग्री) देशे परन्तु लङ्कातः सिंहलद्वीपः सप्त अंशः (7 डिग्री) चत्वारिंशत् (40) कला उत्तराक्षांशेषु च स्थितः अस्ति। एवं सिंहलस्य द्वीपदेशत्वात् (अक्षांशसहितः) लङ्कादेशः कथमपि न गणयितुं शक्यते। तथैव अद्यतनयुगे यथा ब्रिटेनदेशस्य ग्रीनविच्-नगरं विदेशिभिः याम्योत्तरध्रुवगता मध्यरेखा मन्यते स्म, तथैव प्राचीनकाले भारतस्य उज्जयिनीनगरात् मध्यरेखा मन्यते स्म । विद्वांसः वदन्ति यत्[4]- "लङ्का-उज्जयिनी कुरुक्षेत्रप्रदेशान् स्पृष्टवा मेरुमध्यगता रेखा पृथिव्याः मध्यरेखा इति उच्यते ।"इयं उज्जयिनी-नगरी ग्रीनविच्-नगरात् 75 अंशः 43 कला पूर्वदेशान्तरे स्थितास्ति।

परन्तु सीलोन् इति प्रसिद्धः सिंहलदीपग्रीनविचतः 80 अंशः 50 कला मिते दूरे अस्ति, सिंहलद्वीपः उज्ययिनीतः प्रायः पूर्वदिशि 5 अंशतः स्थितः इति तात्पर्यम्। अतः सिंहलद्वीपतः उज्जयिनीं न शक्नोति। परन्तु लङ्काद्वीपस्य ग्रीनविचतः देशान्तरांशाः उज्जयिन्याः देशान्तरांशतुल्याः 76 अंशः पूर्वदेशान्तरे भवेत्। अतः सिंहलद्वीपः लङ्का भवितुं न शक्नोति। सिंहलद्वीपस्य लङ्कायाः कृते व्यवहारः केषाञ्चन जनानां साहसमात्रम् एव। इति मतं मधुसूदनओझामहाभागस्य। अवन्तिदेशात् पृथिव्याः षोडशभागे अवन्तीपुरं गणितानुसारेण स्थितम्" इति भास्करेण लिखितम्।[5] एवं सिद्धान्तशिरोमणिकर्त्तुः मतेन लङ्कातः सार्धद्विंशति (22 ½) -अक्षांशेषु उज्जयिनी-नगरी स्थिता इति सिद्धम्। यदि विषुवद्रेखा मालदीवोपरि गता अपि स्वीक्रियते तदा उज्जयिनीनगरस्य अक्षांशाः सम्यक् भवितुमर्हन्ति। यदि सिंहलदेश एव लङ्का इति स्वीक्रियते तर्हि शून्याक्षांशस्य स्पर्शस्य अभावात् शून्यबिन्दुतः दूरं स्थानं भवेत तदा लङ्कायाः उपलक्षणं निरक्षबिन्दुतः न भवितुमर्हति।

---

1. मेदिनीवलयमध्यरेखिका देशजो भवति मध्यमो ग्रहः। 118,ज्यो.सि.मञ्जूषा,विनयपाण्डेय,चौखंबा प. हाउस,अंसारी रोड नवदेहली
2. लङ्काप्रसङ्गः,इन्द्रविजयः,मधुसूदन ओझा शोधप्रकोष्ठः,जयनारायणव्यासविश्विवद्यालयः जोधपुरम्
3. अथदक्षिणेन लङ्काकालाजिनसौरिकीर्णतालिकटाः । 11,नक्षत्रकूर्मनिरूपणम् , बृहत्संहिताः चौखंबा
4. यल्लङ्कोज्जयिनी पुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत्।.....2,सि.शि. भूपरिधिः Chaukhamba Sanskrit Series Gooal Mandir Varanasi
5. निरक्षदेशात् क्षितिषोडशांशे भवेदवन्तिगणितेनयस्मात्।तदन्तरं षोडशसंगुणं स्याद्भूमानमस्माद्बहु किं तदुक्तम्॥15॥ सि.शि. चौखंबा संस्कृत प्रतिष्ठान वाराणसी गोलाध्याय भुवनकोशः Chaukhamba Sanskrit Series Gooal Mandir Varanasi

अवन्तिनगरस्य 22½ अक्षांशानां स्थितिः न प्राप्यते। उज्जयिनी 23 अंशः 10 कला अक्षांशेषु स्थिता अस्ति। अतोऽयं सिंहलद्वीपः कथञ्चित् लङ्का न भवितुमर्हति इति सिद्धम्।वाल्मीकिरामायणस्य सुन्दरकाण्डे लिखितम् अस्ति यद् अयं वानरः शतयोजनदूरे आकाशे कूर्दितवान् । शतयोजनादूरे वनरेखां दृष्टवान्[1] अहं शतयोजनानां दूरं लङ्घयितुं शक्नोमि, तर्हि समुद्रस्य पारं शतयोजनानां अस्य दूरस्य किं महत्त्वम् अस्ति? वा.रा.सु.का. (2/4)

**शतयोजनादूरं लङ्घयित्वा अपि न श्रान्तः श्रेष्ठः पराक्रमी श्रेष्ठः वानरयोद्धा।** वा.रा.सु.का.62/3 ।

एतादृशेभ्यः कथनेभ्यः स्पष्टं भवति यत् महेन्द्रपर्वतस्य त्रिकूटपर्वतस्य च मध्ये शतयोजनान्तराले (चतुर्क्रोशः अष्टमीलः वा एकयोजनम् ।) अस्य आधारेण चतुःशतकोसः अष्टशतमीलपर्यन्तं वा लङ्का स्थिता इति सिद्धम् । लङ्का च अवश्यमेव विषुववृत्ते स्थिता भवितुम् अर्हति। महेन्द्रपर्वतस्य विषुववृत्तात् 100 अक्षांशे स्थितिः कारणात् प्रत्येकं (अंशः) सार्धषष्टिमीलतुल्यः अस्ति, अतः 350 क्रोशवर्तते परन्तु सिंहलद्वीपः केवलं 50 क्रोश दूरे अपि नास्ति । अतः लङ्काद्वीपः पृथग् द्वीपः, सिंहलद्वीपः पृथग् द्वीपः इति निश्चितम्।

अयं सिंहलद्वीपः पञ्चत्रिंशत्क्रोशमितो दीर्घः, सार्धद्वाविंशतिक्रोशमितो विस्तारः। लङ्काद्वीपः तु चतुःशतक्रोशमितोदीर्घः, शतविंशतिक्रोशमितो विस्तारः च आसीत् इति रामायणे लिखितम् –

"लङ्का त्रिंशत् योजन (120 क्रोशः) विस्तारः तथा च (400 क्रोश) दीर्घः आसीत्। वर्तमानकाले सिंहलद्वीपे अनेके पर्वताः महाबली नाम्नीगंगानदी च सन्ति। लङ्कावर्णने तु त्रिकूटसुवेल् पर्वतद्वयस्य वर्णनं प्राप्यते। यदि महाबली नाम्नी गंगा आसीत् तर्हि रामायणे तस्य उल्लेखः अवश्यमेव भवेत्। केचन जनाः वदन्ति यत् वर्तमानकाले सिंहलद्वीपे त्रिकूटपर्वते रावणविहारः, अशोकवाटिका इत्यस्य प्रसिद्धेः कारणात् सिंहलद्वीपे श्रीलङ्कायाः रावणविहारः सम्भाव्यते, परन्तु एतत् उचितं न दृश्यते। यतः प्रमाणाभावे विनोदमात्रेण न तथ्यं स्वीक्रियते । अथवा लङ्कादीनि बहूनि तादृशानि स्थानानि भवितुमर्हन्ति। पुष्पकविमानेन लङ्कातः रावणस्य भारतम् आगमनमार्गे आगते सिंहलद्वीपे विश्रामस्थानस्य भ्रमणस्य च सम्भावना सह रावणस्य अनुज्ञायाः अत्र लङ्कासदृशानि स्थानानि निर्मितानीति सम्भाव्यते। अतः सिंहलं एव लङ्काद्वीप इति वक्तुं न युक्तम् । अतः सिंहलद्वीपं लङ्का इति स्वीकारे त्रुटिः सम्भाव्यते ।

यद्यपि ग्रीकजनानां ग्रन्थे सिंहलद्वीपस्य नाम "टोपरोवेन" इति लिखितम् । तस्य शब्दस्य अपभ्रंशः 'टापु रावण' इति स्वीकृत्य, केचन जनाः सिंहलद्वीपं लङ्का इति स्वीकुर्वन्ति। एतत् अपि केवलं कल्पना एव .यतो हि 'टापु' इति शब्दः भारतीयव्युत्पन्नः रावणटापूत्वं किन्तु नैता तस्य लङ्का इति । भारते अस्य प्रचलनं न भवितुम् अर्हति। वक्तुं शक्यते अस्य आधारेण एतत् द्वीपः लङ्का इति न गणयितुं शक्यते। अथवा लङ्का इव अद्यापि महान् द्वीपः रावणस्य अधिकारक्षेत्रे आसीदिति। सिंहलद्वीपः अपि तेषु अन्यतमः अस्ति। तथ्यतः बौद्धग्रन्थेषु[2] सिंहलद्वीपस्य नाम 'ताम्रपर्ण' इति तस्यैव ताम्रपर्णस्य वचनं टोपरोवेन् भवितुम् अर्हति। अनेन आधारेण सिंहलद्वीपः रावणद्वीपः इति घोषितः अस्ति। अतः सिहलद्वीपस्य लङ्का इति कथनं सर्वथा असङ्गतम्।

सेतुबन्धः समुद्रे रामेश्वरतः सिंहल्द्वीपपर्यन्तं वर्तते यस्य किञ्चित् दूरं पर्वतसमूहाः सन्ति ,अतः केचन जनाः वदन्ति यत् ते पर्वताः अवश्यमेव श्रीरामचन्द्रेन निर्मितस्य सेतोः भग्नावशेषाः सिंहलम् इति स्थूलं प्रमाणं स्यात्। परन्तु

1. वाल्मीकिरामायणम्,सुन्दरकाण्डम् सर्ग 3 श्लो.205
2. पृष्ठसंख्या 150 ,लङ्काप्रसङ्गः,इन्द्रविजयः,मधुसूदन ओझा शोधप्रकोष्ठः,जयनारायणव्यासविश्विवद्यालयः जोधपुरम्

एषः तर्कः अस्ति। एते पर्वताः सेतुकार्यादवशिष्टाः इति। श्रीरामेण यः सेतुः निर्मितः सः समुद्रे प्लवमानैः शिलाभिः निर्मितः आसीत्। ताः शिलाः अवश्यं तत्र तत्र प्रकीर्णाः यदा सेतुः भग्नः अभवत् । किन्तु रामेश्वर-सिंहलद्वीपयोः मध्ये स्थिताः पर्वतशृङ्खलाः पृथिव्याः सृष्टिकालात् एव सन्ति, एतादृशाः पर्वतशृङ्खलाः कदापि श्रीरामेण समुद्रे स्थापिताः पर्वतशिखराः न भवितुम् अर्हन्ति। अतः एतान् पर्वतान् दृष्ट्वा सिंहलद्वीपं लङ्का इति वक्तुं न अर्हति।

केचन जनाः मन्यन्ते यत् भारतस्य दक्षिणभागे किमपि स्थानं ० अंशः स्थाने न स्थितम् अस्ति। अतः निरक्षस्थानस्य उत्पत्तिः सिंहलद्वीपतः एव परन्तु उक्तिरियं न सम्यक् मेसोपोटामियादेशे निमरुदेन स्थापितं बेबिलोननगरं अद्यत्वे उपलब्धं नास्ति बगदादे बेबिलोन् इति कथयति तर्हि कः विश्वासं करिष्यति? सम्भवति चिरकालान्तरे केचन नगराणि नष्टानि भवन्ति, यथा वेदेषु उल्लिखितानि "यव्यावती"[1] "वसोर्धारा"[2] इत्यादीनि नगराणि अद्यत्वे न उपलभ्यन्ते अथवा प्रसिद्धानि "वसोर्धारा", "महोदय" "पुष्कलावती" प्रभृतीनि पुराणोक्तानि नगराणि न दृश्यन्ते अनेके द्वीपाः बहुकालानन्तरं समुद्रे निमग्नाः भवन्ति यथा उक्तं च तथा स्कान्दे प्रभासखण्डे द्वासप्ततिशततमाध्याये -

**भरतो नाम राजाभूदाग्नीध्रः प्रथितः क्षितौ ॥ यस्येदं भारतं वर्ष नाम्ना लोकेषु गीयते ॥१॥**
**भारतं नवधा कृत्वा पुत्रेभ्यः प्रददो पृथक् ॥ तेषां नामाङ्कितान्येव ततो द्वीपानि जज्ञिरे ॥२॥**
**इन्द्रद्वीपः कसेरूश्च ताम्रपर्णो गभस्तिमान् ॥ नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः ॥३॥**
**अयं तु नवमो द्वीपः कुमार्य्यासंज्ञितः प्रिये ॥ अष्टी द्वीपाः समुद्रेण प्लाविताश्च तथापरे ॥४॥**
**ग्रामादिदेशसंयुक्ताः स्थिताः सागरमध्यगाः । एक एव स्थितस्तेषां कुमार्य्याख्यस्तु सांप्रतम् ॥५॥**[3]

एवं प्रकारेण भारतस्य नवभागेषु विस्तारः समीचीनः दृश्यते। चिरकालानन्तरं तेषां अष्टद्वीपानां बहवः भागाः समुद्रान्तः स्थले निमग्नाः जाता। लङ्काद्वीपस्यापि सागरगर्भप्रवेशस्य सम्भावना अस्ति, अतोऽन्यस्थानस्य नामाधारेण एकस्य स्थानस्य नामनिर्णयः पण्डितैः न युज्यते। अतः सिंहलद्वीपः केवलं अज्ञानात् एव लङ्का इति निर्दिश्यते इति स्पष्टम्।

यः कन्याकुमारीदीपः नाम्ना प्रसिद्धः अद्यापि अवशिष्टः अस्ति, पूर्वोक्ताः शेषाः दीपाः समुद्रे निमग्नाः सन्ति। एतत् तमिलसाहित्यग्रन्थे **शिलापट्टिकारामे** प्राप्यते, यस्मिन् **कुमारिकन्दनम्** इति नाम्ना उल्लिखितम् अस्ति। द्वितीयशताब्द्यां लिखितोऽस्ति अपि च अयं पाण्ड्यराजदेशः समुद्रे मग्नः अभवत्, यस्य विषये अपि उपरि उक्तम् अस्ति। अस्मिन् सम्पूर्णे द्वीपे द्वौ नद्यौ आस्ताम्, ययोः नाम अपि अस्मिन् ग्रन्थे उक्तम् अस्ति। ते **पहरौली कुमारी** च नाम्ना उल्लिखितौ। प्राचीनतमिललेखकः **अडियाकुन्नालरः**[4] अवदत् यत् अद्यतनस्य कन्याकुमार्याः दक्षिणदिशि एकः महाद्वीपः स्थितः आसीत् , यस्य कुलदीर्घता 700 कावतम् (कवतं तमिलमापनम् - अतः कङ्कटीकारामग्रन्थे 1 कवतं अस्माकं अद्यतनकिलोमीटरमापने 10.06 किलोमीटर्) अर्थात् 700*10.06 = 7042 किलोमीटर्

1. तत्रैव पृष्ठसंख्या 151
2. तत्रैव पृष्ठसंख्या 151
3. स्कन्धपुराणम्,प्रभासखण्ड ,अध्याय 1721-5
4. https://en.wikipedia.org/w/index.php?title=Tamil_literature&oldformat=true#Vijayanagar_and_Nayak_period

मध्ये एतत् कुमारी कन्दनम् विस्तृतम् आसीत्। **कुमारीकन्दनम्**[1] इति नाम्ना एकस्मिन् द्वीपे त्रिवारं तमिलसंगमम् अभवत्। संगम् यस्मिन् विभिन्नमहाद्वीपेभ्यः जनाः आगत्य चर्चां कृत्वा एकं साहित्यं निर्मान्ति। साहित्ये कुत्रापि एषः महाद्वीपः **कुमारीकन्दनम्** इति नाम्ना वर्णितः नास्ति अपितु पाण्ड्यादेशः अथवा तमिलजनदेशः इति वर्णितः अस्ति। स्कन्दपुराणस्य तमिलानुवादे कन्धपुराणम् इति तत्र कुमारिकन्दनस्य प्रथमः उल्लेखः प्राप्यते, यस्य अनुवादः पञ्चदशशताब्द्यां कुमारीकन्दनम् इति नाम्ना जातः। अस्यद्वीपस्य कुमारीकन्दनसंज्ञा विषये कथा वर्तते यत् अस्य महाद्वीपस्य राजा **प्रतान्** आसीत् यस्य सुतायाः नाम कुमारी आसीत्, यस्मात् कारणात् सम्पूर्णस्य प्रान्तस्य कुमारी कन्दनम् इति नाम्ना अभवत्। अस्य वर्णनं 1864 तमे वर्षे आङ्ग्लप्राणिशास्त्रज्ञस्य **फिलिप् स्क्लेटरमहोदयस्य**[2] 'मेमल्स् आफ् मेडागास्कर' (mammals of medagascar ) इति पुस्तके अस्ति ।

तस्य मतेन मेडागास्करदेशस्य तथा च भारते प्राणिजगति प्रचुरमात्रायां समानता दृश्यते। अनुभूयते यत् यदि स्थलमार्गेण भारतं न प्राप्तम् तर्हि जले एतादृशी दीर्घयात्रा कथं सम्भवति? यथा लैमूरजीवस्य ऑस्ट्रेलियादेशे अपि सम्पर्कः प्राप्यते। तत्रापि शताधिकाः प्रजातयः लेमुरजातयः वा दृश्यन्ते यदि मेडागास्कर-भारत-ऑस्ट्रेलिया-देशानां मध्ये अतीव दूरी अस्ति तथा च त्रयाणां मध्ये विशालः जलराशिः समुद्रः अस्ति । लेमुरिया[3] इति महाद्वीपः महत्त्वपूर्णां भूमिकां निर्वहति अनेन सिद्धान्तेन पूर्वं यदा लेमुरिया महाद्वीपस्य अन्वेषणं प्रचलति स्म तदा भारतस्य तमिलनाडुनगरस्य स्थानीयजनजातीयलोककथा बहवः वैज्ञानिकाः एकस्य नष्टमहाद्वीपस्य विषये ज्ञातवन्तः। पूर्वं काल्पनिकमहाद्वीपः इति प्रसिद्धः आसीत्, तदनन्तरं तमिलसाहित्येन परिचिताः जनाः लेमुरिया-कुमारीकन्दनयोः मध्ये सम्बन्धं अन्वेष्टुं आरब्धवन्तः। तमिलसाहित्यस्य अनुसारं पाण्ड्यराजाः 11000 वर्षाणि यावत् कुमारीकन्दने शासनं कृतवन्तः । यत्र पूर्ववत् त्रयः तमिलसङ्गमाः आसन्, तत्र प्रथमः संगमः 9000 ईपू वर्षे कुमारिकन्दनम् अथवा लेमुरियामहाद्वीपस्य राजधानी मदुरैनगरे आयोजितः। परन्तु एतत् अद्यतनं मदुरैनगरम् नास्ति । तमिलसाहित्यस्य अनुसारं कुमारी कन्दनम् 49 भागेषु विभक्तम् आसीत् येषु 7 भागाः मदुरै-नगरस्य आसन् । प्रथमे तमिलसंगमे कुवेरः मुरुगन, शिव इत्यादयः 4449 साहित्यकाराः उपस्थिताः आसन्। यस्मिन् प्रथमः संगमः 4440 वर्षाणि यावत् अभवत् यस्मिन् 89 संगमराजाः शासनं कृतवन्तः, एतत् तमिलग्रन्थे **इरायनार अक्कापुरुलराजसूचौ** दृश्यते । अतः सम्प्रति लङ्कादेशस्य स्थानविषये उपर्युक्तव्याख्यानुसारं निष्कर्षरूपेण कथयितुं शक्यते यत्

लङ्काद्वीपः कुमारीकन्दनस्य एकः द्वीपः भवितुमर्हति, अस्मिन् विषये तर्कः अयं वर्तते यत् कुमारीकन्दनम् एकः महान् द्वीपखण्डः आसीत्,अस्य विस्तारः विषुवरेखां यावत् ततोऽप्यधिको वा आसीत्। अतः लङ्काविषुवरेखायामासीदिति। सम्प्रति यः श्रीलङ्कादेशः अस्ति सः विषुवतीलङ्का न इति तु निश्चप्रचम्।

मधुसूदनओझामहोदयस्य तथा च तमिलसाहित्ये वर्णितकुमारीकन्दनम् प्रान्तस्य । अथ च लैमूरिया महाद् वीपसम्बन्धिविविधव्याख्यादिभिःस्पष्टं भवति यत् प्राक्तनो लङ्कादेशः वर्तमानलङ्कादेशाद्भिन्नः आसीदिति ।

❖ ❖ ❖

1. https://en.wikipedia.org/wiki/Kumari_Kandam
2. https://en.wikipedia.org/wiki/Philip_Sclater
3. https://blogs.scientificamerican.com/history-of-geology/a-geologists-dream-the-lost-continent-of-lemuria/

# वासगृहे आन्तरिकप्रकोष्ठविन्याससम्बद्धाः वास्तुदोषाः, तेषां निवारणोपायाश्च

**– गिरीशभट्टःबि**
**– प्रो. ए. श्रीपादभट्टः**

**सारांशः–**

वासार्थं गृहं सर्वेषां कृतेऽपि आवश्यकमेव भवति। सर्वेऽपि जन्तवः स्वकीयावश्यकतानुसारं स्वकीयवास-स्थानस्य निर्माणं कुर्वन्ति। मनुष्यः सर्वेषु प्राणिषु श्रेष्ठः भवति। मनुष्यस्य वाक्शक्तिवशात् तथा बुद्धिशक्तिवशादेव अन्यजन्तुभ्यः मनुष्यः श्रेष्ठतमः जातः। अतः अन्यजन्तूनां वासस्थानेभ्यः श्रेष्ठतमं व्यवस्थिततमञ्च वासस्थानं मनुष्यः इच्छति। तादृशस्य वासस्थानस्य निर्माणं कथं करणीयमिति उद्बोधयितुं वास्तुशास्त्रं प्रवृत्तम्। वास्तुशास्त्रोक्तरीत्या व्यवस्थितरूपेण गृहनिर्माणं क्रियते चेदेव मनुष्यजीवनं सुखमयं शान्तिमयञ्च भवति। अन्यथा मनुष्यस्य जीवनं दुःखमयं भवति। वास्तुशास्त्रोक्तरीत्या गृहस्य आन्तरिकव्यवस्था, परिसरश्च न भवति चेत् वास्तुदोषाःसम्भवन्ति। वास्तुदोषाः बहुविधाः सन्ति। वास्तुदोषेषु गृहस्य आन्तरिकव्यवस्थासम्बद्धाः वास्तुदोषाः अन्यतमाः। गृहस्य आन्तरिक-व्यवस्थासम्बद्धाः वास्तुदोषाः, तेषां निवारणोपायाश्च अस्य पत्रस्य प्रतिपाद्यविषयः भवति।

**वासगृहस्य आन्तरिकव्यवस्था –**

पूर्वदिशः अधिपतिः इन्द्रः। प्रगतिः, अभ्युन्नतिः, समग्रविकासः, आलोकः– एते तस्य अधिकारविषयाः भवन्ति। आग्नेयकोणस्य अधिपतिः अग्निः। तेजः, प्रखरता, दाहकत्वं च तस्य अधिकारविषयाः सन्ति। दक्षिणदिशः अधिपतिः यमः। मृत्युः, बलं, वीर्यं, पौरुषं च तस्य अधिकारविषयाः भवन्ति। नैर्ऋत्यदिशः अधिपः भवति राक्षसः। आलस्यम्, अपवित्रता, भारः च तस्य अधिकारविषयाः भवन्ति। पश्चिमदिशः अधिपः भवति वरुणः। जलं, हिमपातः, वर्षा (वृष्टिः) च तस्य अधिकारविषयाः भवन्ति। वायव्यदिशः अधिपः भवति अनिलः (वायुः)। वायुः, वायुमण्डलीयानि वैपरीत्यानि, अतिमारुतः च तस्य अधिकारविषयाः भवन्ति। उत्तरदिशः अधिपः भवति कुबेरः। धनं, समृद्धिश्च तस्य अधिकारविषयः। ईशान्यदिशः अधिपः भवति रुद्रः। पूजा, सत्कार्यं, धर्मः, मन्दिरं च तस्य अधिकारविषया। मध्यभागस्य अधिपतिः भवति ब्रह्मा। बुद्धिशक्तिः, तपः, ज्ञान-विज्ञानादयः तस्य अधिकारविषयाः भवन्ति। अस्यसिद्धान्तस्यानुसारेण आवासीयवास्तुनि कस्याः कस्याः दिशः अधिपतेः यद्यद्विकार क्षेत्रं वर्तते तत्त दधिकारक्षेत्रसम्बद्धप्रकोष्ठाः तत्तद्दिशिकरणीयाः इतिवास्तुशास्त्रे निरूपितमस्ति। यतोहि तस्याः तस्याः दिशायाः अधिपतेः दिशि तत्तत्सम्बद्धप्रकोष्ठाः निर्मीयन्ते चेत्तत्तद्दिशाधिपतेः बलं तथा नैसर्गिकशक्ते बलं च सर्वदा गृहस्वामी प्राप्नोति। यदि तत्तद्दिगधिपतेः अधिकारक्षेत्रसम्बद्धप्रकोष्ठाः तत्तद्दिगधिपतेः दिशि न कृत्वा अन्यदिगधिपानां दिक्षु क्रियन्ते तर्हि, "सः गृहस्वामी मम अधिकारक्षेत्रसम्बद्धप्रकोष्ठं मम दिशि न कृत्वा अन्यदिशि कृतवान्तथा मम दिशि अन्यस्य अधिकारक्षेत्रसम्बद्धस्य प्रकोष्ठं निर्मितवान्" इति तेदिगधिपाः गृहस्वामिनः उपरि कोपं प्रदर्शयन्ति, तेषां

कोपव-शाद्त्पन्नानां दुष्ट-फलानां भाजनः भवति गृहस्वामी। अतः गृहपतिना तत्तद्दिगीशस्य प्रकृति-स्वभावादिकं मनसि निधाय तत्तद्दिशि तत्तद्दिगीशस्य अधिकारक्षेत्रसम्बद्धप्रकोष्ठाः एव निर्मातव्याः।

वासार्थं निर्मीयमाणानि गृहाणि आवासीयवास्तूनि इत्युच्यन्ते। आवासीयवास्तुनि आन्तरिकव्यवस्था कथं भवेद् इति बृहद्वास्तुमालायाम् अधोनिर्दिष्टेषु श्लोकेषु निरूपितं वर्तते–

**पूर्वस्यां श्रीगृहं प्रोक्तमाग्नेय्यां स्यान्महानसम् । शयनं दक्षिणस्यां च नैर्ऋत्यामायुधाश्रयम् ॥**
**भोजनं पश्चिमायां च वायव्यां धनसञ्चयम् । उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम् ॥**
**इन्द्राग्न्योर्मथनं मध्ये यमाग्न्योर्घृतमन्दिरम् । यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम् ॥**
**राक्षसजलयोर्मध्ये विद्याभ्यासस्य मन्दिरम् । तोयेशानिलयोर्मध्ये रोदनस्य च मन्दिरम् ॥**
**कामोपभोगशमनं वायव्योत्तरयोर्गृहम् । कौबेरेशानयोर्मध्ये चिकित्सामन्दिरं सदा ॥**
**पुरन्दरेशानयोर्मध्ये सर्ववस्तुषु सङ्ग्रहम् । सदनं कारयेदेवं क्रमादुक्तानि षोडश ॥[1] इति।**

आवासीयवास्तुनि पूर्वस्यां दिशि श्रीगृहं (लक्ष्म्याः गृहं) कार्यम्। आग्नेयकोणे महानसं कार्यम्। दक्षिणस्यां दिशि शयनप्रकोष्ठः निर्मातव्यः। आयुधाश्रयं (शास्त्रागारः) तथा उपकरणानां सङ्ग्रहागारः तु नैर्ऋत्यकोणे कार्यं। पश्चिमायां दिशि भोजनगृहं कार्यम्। वायव्यकोणे धनसञ्चयः (वित्तसङ्ग्रहागारं) कार्यः। उत्तरदिशि द्रव्यसंस्थानं (तिजोरी) कार्यम्। ईशान्यकोणे देवगृहं (पूजागृहं) कार्यम्। द्वयोः द्वयोः दिशोरन्तराले पुनः एकैकः प्रकोष्ठः निर्मातव्यः। तद्यथा – इन्द्राग्न्योः अन्तराले अर्थात् पूर्व-आग्नेययोरन्तराले मथनगृहं (दधिमन्थनप्रकोष्ठः) निर्मातव्यम्। यमाग्न्योरन्तराले अर्थात् दक्षिण-आग्नेययोरन्तराले घृतमन्दिरं निर्मातव्यम्। यमराक्षसयोर्मध्ये अर्थात् दक्षिण-नैर्ऋत्ययोर्मध्ये पुरीषत्यागमन्दिरं (शौचालयं) निर्मातव्यम्। राक्षसजलयोर्मध्ये अर्थात् नैर्ऋत्य-पश्चिमयोर्मध्ये विद्याभ्यासस्य मन्दिरं (अध्ययनप्रकोष्ठं) निर्मातव्यम्। तोयेशानिलयोर्मध्ये अर्थात् पश्चिम-वायव्ययोरन्तराले रोदनस्य मन्दिरं (शोकगृहं) निर्मातव्यम्। वायव्य-उत्तरयोर्मध्ये कामोपभोगशमनं गृहं (कामगृहम् अथवा रतिगृहं) निर्मातव्यम्। कौबेरेशानयोर्मध्ये अर्थात् उत्तर-ईशान्ययोरन्तराले चिकित्सामन्दिरं निर्मातव्यम्। पुरन्दरेशानयोर्मध्ये अर्थात् पूर्व-ईशान्यदिशोरन्तराले सकलवस्तूनां सङ्ग्रहपरककोष्ठः निर्मातव्यः। इत्थं गृहे अष्टसु दिक्षु अष्टविषयाणां सम्बद्धाः प्रकोष्ठाः तथा द्वयोः द्वयोः दिशोरन्तराले पुनः एकैकविषयसम्बद्धः प्रकोष्ठः इत्थमाहत्य ८+८ = १६ सम्बद्धाः प्रकोष्ठाः अत्रोक्तवन्निर्मातव्याः। मध्ये ब्रह्मस्थाने किमपि न निर्मातव्यम्। ब्रह्मस्थानं रिक्तमेव भवेत्। ब्रह्मस्थानं परिपीड्यते चेत् (ब्रह्मस्थाने किमपि निर्माणं क्रियते चेत्) गृहस्वामी पीडामनुभवति। यथोक्तं बृहत्संहितायां श्रीमता वराहमिहिराचार्येणवास्तुविद्याध्याये –

**सुखमिच्छन् ब्रह्माणं यत्नाद्रक्षेद्गृही गृहान्तःस्थम्।**
**उच्छिष्टाद्युपघाताद्गृहपतिरुपतप्यते तस्मिन् ॥[2] इति।**

1. बृहद्वास्तुमाला –१५० तः १५८ श्लोकाः
2. बृहत्संहिता – वास्तुविद्याध्यायः – श्लोकः ६४




चित्रम् – १ : आवासीयवास्तुनि प्रकोष्ठविन्यासः

**आवासीयवास्तुनि प्रकोष्ठविन्याससम्बद्धाः वास्तुदोषाः तेषां निवारणोपायाश्च –**

वास्तुदोषाः विभिन्नप्रकारकाः भवन्ति - भूखण्डस्य प्लवत्वदोषाः, आकारदोषाः, शल्यदोषाः, मर्मदोषाः, द्वारवेधदोषाः, दिक्सम्बन्धिदोषाः इत्यादयो बहवः दोषाः भवन्ति। तेषु दिक्सम्बन्धिवास्तुदोषेषु वासगृहस्य आन्तरिक-व्यवस्थासम्बद्धाः वास्तुदोषाः अन्तर्भवन्ति।

**पूर्वदिगुद्भवाः वास्तुदोषाः तेषां निवारणोपायाश्च –**

देवेषु इन्द्रः तथा ग्रहेषु सूर्यः पूर्वदिशः स्वामिनौ स्तः। भवनस्य द्वाराणि वातायनानि च पूर्वाभिमुखानि निर्मितानि चेत् सूर्यस्य प्रातःकालीनानां कीटाणुनाशकगुणयुक्तानां नीलोत्तर (पराबैंगनी) किरणानां भवनस्यान्तः प्रवेशे अनुकूलो भवति। येन भवनस्यान्तः सञ्चरतां कीटाणूनां नाशो भवति। अत एव गृहस्य पूर्वस्यां दिशि द्वाराणां, वातायनानां, भवनस्य अधिकतमरिक्तस्थानानाम्, अध्ययनप्रकोष्ठस्य च निर्माणं वास्तुसम्मतं भवति। किन्तु पूर्वदिशि गृहस्वामिनः शयनप्रकोष्ठः, शौचालयम्, आच्छादकस्य (छत) तथा तलस्य शेषं गृहस्य उपरि तथा भवनस्य पूर्वदिशि आधिक्येन निर्मीयते चेत् वास्तुदोषस्य कारणं भवति। अत एव एतादृशप्रकारेण वास्तुदोषकारकं निर्माणं न करणीयम्। यदि अनिवार्येण तथा वास्तुदोषकारकं निर्माणं करणीयमेव भवति तर्हि पूर्वदिशि सूर्ययन्त्रं संस्थापनीयम्।[1]

**आग्नेयदिगुद्भववास्तुदोषाः तेषां निवारणोपायाश्च –**

पूर्वदक्षिणयोर्मध्ये आग्नेयकोणः भवति। आग्नेयदिशः अधिपती देवेषु अग्निः, ग्रहेषु शुक्रश्च भवतः। आग्नेया दिक् पाकगृहनिर्माणार्थं सर्वोत्तमा भवति। तथा विद्युदुपकरणानां स्थापनार्थमपि आग्नेयकोणः एव श्रेष्ठः

1. गृहवास्तु-शास्त्रीय विधान (डॉ.देशबन्धुशास्त्रिविरचितम्), पृ.सं. 155

भवति। किन्तु आग्नेयकोणे जलसङ्ग्रहः वास्तुदोषकारकः भवति। एवमेव आग्नेयकोणे भवनस्य मुख्यद्वारं निर्मितं चेदपि वास्तुदोषकारकं भवति। गेहस्य आग्नेयकोणः नैर्ऋत्यकोणापेक्षया उन्नतं भवति चेत् वास्तुदोषः सम्भवति। तथा आग्नेयदिशः दक्षिणपार्श्वे विस्तारः वास्तुदोषकारको भवति। आग्नेयकोणोद्भववास्तुदोषवारणार्थं द्वारे गणपतिप्रतिमायाः प्रतिष्ठापनं कार्यम्। तथा गणपतिपूजा, बुधवारस्य अर्चना च कार्ये।[1]

**दक्षिणदिगुद्भववास्तुदोषाः तेषां निवारणोपायाश्च –**

दक्षिणदिशः स्वामिनौ देवेषु यमः, ग्रहेषु कुजः। भवनस्य दक्षिणदिशि किमपि निर्माणकार्यम् अवश्यं करणीयमेव। तथा तच्च निर्माणं पूर्वदिशः उत्तरदिशश्च अपेक्षया उन्नतं भवेत्। भवनस्य दक्षिणा भित्तिः उन्नता तथा बृहती भवति चेत् शुभं भवति। भवनस्य दक्षिणा दिक् गृहेशस्य शयनप्रकोष्ठनिर्माणार्थं सर्वोत्तमा भवति। भवनस्य दक्षिणा दिक् पूर्वोत्तरदिशोरपेक्षया निम्ना भवति चेत् वास्तुदोषस्य कारणं भवति। भवनस्य दक्षिणस्यां दिशि ट्यूब्लैट् स्थापनं शुभदं भवति। गृहस्य आच्छादकस्य अथवा छाद्योपरिभागे दक्षिणस्यां दिशि जलस्य पात्रनिर्माणं शुभदं भवति। तथा गृहस्य दक्षिणपार्श्वे बृहद्वृक्षाणां रोपणमपि शुभदायकमेव भवति।[2]

**नैर्ऋत्यदिगुद्भवाः वास्तुदोषाः तेषां निवारणोपायाश्च –**

नैर्ऋत्यकोणस्य अधिपतिनौ देवेषु निर्ऋतिः तथा ग्रहेषु राहुः। नैर्ऋत्यकोणः बृहद्वस्तूनां सङ्ग्रहार्थं शुभप्रदं भवति। गृहस्य नैर्ऋत्यभागस्य तलं तथा आच्छादकम् इतरभागानामपेक्षया उन्नतं भवेत्। गृहस्वामिनः शयननिमित्तम् एषा दिक् उत्तमा भवति। नैर्ऋत्यदिशायां निम्नसोपानानि (ढलान होना), पाकगृहं, मलसंग्रह टैंक् इत्यादिकं निर्मीयते चेत् वास्तुदोषः सम्भवति। नैर्ऋत्यकोणे वास्तुदोषवारणार्थं गृहे राहुयन्त्रं स्थापनीयम्। अनेन नैर्ऋत्यकोणाधिपतेः राहोः प्रीतिः भूत्वा वास्तुदोषस्य परिहारो भवति। गृहस्य नैर्ऋत्यपार्श्वे बृहद्वृक्षस्य रोपणं करणीयम्। तथा **इन्द्राणीयन्त्रस्य स्थापनं करणीयम्।**[3]

**पश्चिमदिक्समुद्भवाः वास्तुदोषाः तेषां निवारणोपायाश्च –**

पश्चिमदिगधिपः देवेषु वरुणः तथा ग्रहेषु शनिः। गृहस्य पश्चिमभागस्य तलं नैर्ऋत्यदिशः अपेक्षया निम्नं तथा वायव्यकोणापेक्षया उन्नतं भवेत्। गृहस्य पश्चिमदिशि सूर्यस्य प्रकाशः अत्यन्तं न्यूनप्रमाणेन यथा पतेत् तथा गृहनिर्माणं करणीयम्। अत एव गृहस्य पश्चिमदिशि वातायनानां निर्माणं न करणीयम्। गृहस्य पश्चिमदिक् भोजनप्रकोष्ठस्य निर्माणार्थम् अत्यन्तम् उत्तमा भवति। गृहस्य पश्चिमदिक्स्थं भवनं सर्वाधिकं निम्नतमं भवति चेत्, पश्चिमदिशि गृहस्य मुख्यद्वारं भवति चेत्, तथा शयनप्रकोष्ठः पश्चिमदिशि भवति चेत् वास्तुदोषः समुत्पद्यते। पश्चिमदिशि वास्तुदोषस्य वारणार्थं वरुणयन्त्रस्य स्थापनं कार्यम्। अनेन पश्चिमदिगीशस्य वरुणदेवस्य प्रीतिः भूत्वा वास्तुदोषस्य वारणं भवति।[4]

---

1. गृहवास्तु-शास्त्रीय विधान (डॉ.देशबन्धुशास्त्रिविरचितम्), पृ.सं. 155
2. तत्रैव - 156
3. तत्रैव - 156
4. तत्रैव - 156

**वायव्यदिक्समुद्भवाः वास्तुदोषाः तेषां निवारणोपायाश्च –**

वायव्यकोणस्य स्वामिनौ देवेषु वायुदेवः तथा ग्रहेषु चन्द्रः। गृहस्य वायव्यकोणः अतिथिप्रकोष्ठः, सैप्टिक् टैंक्, तथा वृक्षादीनां रोपणार्थं प्रशस्तं भवति। वायव्यकोणे पाकगृहस्य तथा अध्ययनप्रकोष्ठस्य निर्माणं क्रियते चेत् वास्तुदोषः समुत्पद्यते। वायव्यकोणोद्भववास्तुदोषवारणार्थं चन्द्रयन्त्रस्य स्थापनं कार्यम्। तथा **तत्र भित्तिषु श्वेतवर्णः ( Light Colour) लेपनीयः।**[1]

**उत्तरदिगुद्भवाः वास्तुदोषाः तेषां निवारणोपायाश्च –**

उत्तरदिगधिपौ देवेषु कुबेरः, ग्रहेषु बुधः। उत्तरदिक् धनसङ्ग्रहार्थम्, अध्ययनप्रकोष्ठनिर्माणार्थं, पूजा-प्रकोष्ठनिर्माणार्थं च उत्तमा भवति। गृहस्य उत्तरदिशि मुख्यद्वारं तथा वातायनानि भवेयुः। गृहस्य उत्तरदिक्स्थ-भवनस्य तलम् अवशिष्टभवनानां तलानामपेक्षया निम्नानि भवेयुः। उत्तरदिशि पाकशाला, शौचालयः, पुरातनं बृहच्च वस्तु इत्यादिकं भवति चेत् वास्तुदोषो सम्भवति। उत्तरदिशि वास्तुदोषनिवारणार्थं बुधयन्त्रस्य स्थापनं करणीयम्। अनेन उत्तरदिगधिपः बुधः प्रसन्नः भूत्वा वास्तुदोषोद्भवक्लेशानां वारणं करोति।[2]

**ईशान्यदिगुद्भवाः वास्तुदोषाः तेषां निवारणोपायाश्च –**

ईशान्यकोणाधिपौ देवेषु शिवः, तथा ग्रहेषु बृहस्पतिः। ईशान्यकोणे मुख्यद्वारं, वातायनानि, रिक्तस्थानं, निम्नसोपानानि (डलान), पूजागृहं, ट्यूबलैट् तथा जलव्यवस्था शुभदानि भवन्ति। उत्तरदिशि शौचालयः, उन्नतं जलस्य टैंकी, उन्नता सीमाभित्तिः च भवन्ति चेत् अथवा ईशान्यकोणस्थभवनस्य तलं शेषभवनानां तलानामपेक्षया उन्नतं भवति चेत् वास्तुदोषो समुत्पद्यते। ईशान्यदिगुद्भववास्तुदोषाणां वारणार्थं गृहस्य प्रवेशद्वारे प्रतिष्ठितस्वस्तिकं स्थापनीयम्। तथा शिवस्य उपासना कार्या। तथा ईशान्यकोणे स्वच्छता रक्षणीया।[3]

भवननिर्माणार्थं यथासम्भवं वास्तुदोषरहिता भूः एव चेतव्या। तथा वास्तुदोषः यथा नोत्पद्यते तद्वदेव भवनस्य आन्तरिकव्यवस्था अपि कार्या। यदि न शक्यते तर्हि दोषाल्पत्वं गुणबाहुल्यं च यादृशभूखण्डे भवति तादृशभूखण्डश्चेतव्यस्तथा यथा दोषाल्पत्वं गुणाधिक्यञ्च भवति तथा भवनस्य आन्तरिकी व्यवस्था कार्या। तस्मिन् सन्दर्भे यत्र यत्र वास्तुदोषः अस्ति तत्र तत्र वास्तुग्रन्थेषूक्तरीत्या तेषां वास्तुदोषाणां वारणं कार्यम्। एतेभ्यः वास्तुदोषवारणोपाये "वास्तुशान्तिः" पूजनविधिरपि भारतीयवास्तुशास्त्रे प्रतिपादितोऽस्ति। वास्तुशान्तिरेव भवनस्य वास्तुदोषाणां वारणार्थं विद्यमानः सर्वोत्तमः उपायः भवति। अतः यदि भवने वास्तुदोषः वर्तते तर्हि योग्यं ब्राह्मणमाहूय तस्मै योग्यं दक्षिणादिकं दत्त्वा वास्तुशान्तिम् अवश्यं कारयेत्[4]। अनेन भवनस्य वास्तुदोषाणां वारणं भवति तथा भवनस्य गुणानाञ्च वृद्धिर्भवति।

---

1. गृहवास्तु-शास्त्रीय विधान (डॉ.देशबन्धुशास्त्रिविरचितम्), पृ.सं. 157
2. तत्रैव - 157
3. तत्रैव - 157
4. वास्तुरत्नाकर-परिशिष्टप्रकरणम्, श्लोकः - 66

**निष्कर्षः –**

भारतदेशस्य समस्तप्राचीनवैज्ञानिकविद्यासु भारतीयवास्तुविद्या मानवस्य जीवने प्राकृतिकशक्तीनां सम्यक्तया उपयोगं कृत्वा जीवने सुखसमृद्धिमानेतुं प्रशस्तं मार्गं दर्शयति। भारतीयवास्तुशास्त्रस्य समस्त-नियमानां तथा उपनियमानां मूलः आधारः "यथा पिण्डाण्डः तथा ब्रह्माण्डः" इति सिद्धान्तः एव भवति। मनुष्यः समस्तप्राकृतिकशक्तीनां सन्तुलनं सामञ्जस्यं च कृत्वा तदनुसारं स्वजीवनं यापयति चेत् स्वजीवने निरन्तरम् उत्तरोत्तरं सुखं समृद्धिं स्थिरतां स्फूर्तिं नवचैतन्यं च सम्प्राप्य तस्य शरीरमपि स्वस्थं भवति, मनः अपि प्रसन्नं भवति। अस्य परिणामरूपेण व्यक्तिः स्वकीयसमस्तकार्याणि श्रद्धया दत्तावधानपूर्वकं कर्तुं शक्नोति। अनेन सः उत्तमधनसम्पादनमपि कृत्वा उत्तमरीत्या स्वजीवनं यापयितुं शक्नोति। परन्तु यदि यः कोऽपि मनुष्यः प्रकृतेः विरुद्धरीत्या जीवनं यापयति चेत्, वास्तुविरुद्धभवनानां निर्माणं करोति चेत् अनेन विपरीतपरिणामो जायते। अर्थात् वास्तुविरुद्धभवनानां निर्माणं क्रियते चेत् तत्र यः निवसति, सः निरन्तरं दुःखी, रुग्णः (रोगी), निर्धनः च भूत्वा स्वस्य जीवनमेव असुरक्षितं क्लेशमयञ्च करोति। अतः भवननिर्माणवेलायां भवननिर्माणस्य आदिमघट्टादेव वास्तुशास्त्रोक्तानां समस्तनियमानां यथाशक्ति पालनं करणीयम्। एवं यदि वास्तुसम्मतं वास्तुदोषरहितं भवनं निर्मीयते तर्हि तत्र निवसतां जनानां कृते तद्भवनं भौतिकम् आध्यात्मिकञ्च सुखं जनयति। तथा एतादृशं वास्तुसम्मतं भवनं लौकिकं पारलौकिकं च उन्नतिं साधयितुं प्रशस्तं भवति।

गृहारम्भार्थं बहुजागरूकतया भूचयनं कर्तव्यं भवति। यतो हि दोषरहितभूमौ गृहं निर्मीयते चेदेव गृहमपि दोषरहितं भवति। सदोषभूमौ निर्मितं गृहमपि दोषयुक्तमेव भवति किन्तु आधुनिककाले जनसङ्ख्यायाः आधिक्यात् गृहनिर्माणार्थं सर्वतोभावेन वास्तुसम्मतस्य भूखण्डस्य प्राप्तिः अत्यन्तं दुर्लभा भवति। सामान्यतः पत्तनेषु निवसतां जनानां क्षेत्राण्येव अतिलघूनि भवन्ति। तत्रैव गृहनिर्माणं करणीयं भवति । अतः तत्र सर्वतोभावेन वास्तुसम्मतक्षेत्रस्य चयनमसम्भवं भवति। अतः तादृशसन्दर्भेषु यत्र यत्र वास्तुदोषो भवति तत्र वास्तुग्रन्थेषूक्तरीत्या वास्तुदोषाणां निवारणं कृत्वा गृहनिर्माणं करणीयं भवति। एवम् अनिवार्यतः दोषयुक्तभूमावेव गृहनिर्माणं करणीयं भवति चेत् वास्तुग्रन्थेषूक्तरीत्या वास्तुशान्त्यादिकं कृत्वा वास्तुदोषाणां निवारणं कृत्वा ततः परं तत्र गृहनिर्माणं करणीयम्, तदा तत्र निवासेन दुःखक्लेशादिकानि न सम्भवन्ति, जीवने सुखसमृद्धिः भवतीति निष्कर्षं दातुं शक्नुमः।

❖ ❖ ❖

# भारतीयमन्दिराणां पर्यावरणेन सह सम्बन्धः

**– मेघा शर्मा**

**– प्रो. बिहारी लाल शर्मा**

संस्कृतवाङ्मय आविश्वं सर्वोत्तममिति नास्ति कस्यापि विप्रतिपत्तिः । अस्मात् अधिकविस्तृतं, सुसमृद्धं शाश्वतं सार्वभौमिकं च ज्ञानं न कुत्रापि प्राप्तम्। ज्ञानमिदं न केवल उपदेशवाचकमन्त्राणां समूहः एव, अपितु आदर्शजीवनपद्धतेः मूलसिद्धान्तान् विस्तरेण प्रस्तौति।

सम्पूर्णवाङ्मयः मूलरूपेण चतुर्षु वेदेषु, तेषां षडङ्गेषु (शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषेषु), पुराणेषु धर्मशास्त्रेषु दर्शनादिषु विभक्तः। ज्योतिषं वेदाङ्गरूपेण विद्यते। अस्य च भौतिकम् आध्यात्मिकं च द्विविधं स्वरूपं वर्तते। वैशेषिकदर्शनानुसारम् अङ्गाङ्गिनोः यथा अभेदसम्बन्धोवर्तते तथैव वेदज्योतिषयोः अभेदसम्बन्धः वर्तते । यतः ज्योतिषम् अङ्गम् वेदश्च अङ्गी।

ज्योतिर्विज्ञान मूलतः सिद्धान्त-जातक-संहितानामभिः त्रिशाखासु विभक्तम्। विकासक्रमे वास्तुशास्त्रं संहिताशाखया सह सम्बद्धम्। वास्तुशास्त्रम् अत्यन्तमहत्त्वपूर्णं गूढञ्च विज्ञानम्। वास्तुशास्त्रस्य अभिप्रायः ताभ्यः समस्तरचनाभ्यः वर्तते, यत्र मनुष्याः निवसन्ति। भवन दुर्ग-मन्दिर-मठ-गृह-क्षेत्र-वाटिकादिनि समस्तवस्तूनि वास्तुरिति।

वास्तुशास्त्रम् भारतीयसंस्कृति-ज्योतिर्विज्ञान-शिल्पकला-स्थापत्यकलादीनां समन्वितरूपं वर्तते। वास्तुविज्ञानं प्रकृतिद्वारा प्रदत्ततत्त्वानां पृथिवी-जल-वायु-तेज-आकाशानां सम्यक् उपयोगं कृत्वा धनवृद्धिं, समृद्धिं, शारीरिकं तथा मानसिकसुखं प्रददाति। भारतीयवास्तुविद्या प्रकृतिप्रदत्तशक्तेः समुपयोगं कृत्वा तच्छक्त्यनुकूलं नगर-भवन-उद्यान-मन्दिरादीन् निर्माय राज्यप्रजादीन् सदैव सुखसमृद्धिभ्यां परिपूरयति ।

अस्माभिः स्वसमीपे यस्यापि प्राकृतिकतत्त्वस्य अनुभवः क्रियते तत्सर्वमपि प्रकृतिरेव वर्तते। मानवः प्रकृतिं विना स्वजीवनस्य कल्पनामपि कर्तुं न अर्हति। सूर्य-चन्द्र पञ्चमहाभूत-वृक्षादयः सर्वमपि प्रकृतिरेव। प्रकृतौ व्याप्ततत्त्वानि वयं स्वानुरूपं परिवर्तयितुं न शक्नुमः परन्तु प्राकृतिकतत्त्वानुकूलम् अस्माभिः भवितुं शक्यते। वयं प्रकृतेः भोगं कुर्मः। भक्षणीयं भोजनं, पातव्यं पेयं, स्थातव्या भूमिः, सूर्यस्य तापः, चन्द्रमसः शीतलता, शुद्धवायुः एतत् सर्वमपि अस्याः प्रकृतेः एव उपलभ्यते।

अस्माकमृषिमुनयः पर्यावरणस्य महत्त्वेन सुपरिचितः आसन्। एतदेव कारणं यत् समये-समये स्वग्रन्थेषु एतस्य उल्लेखः तैः कृतः। ऋग्वैदिककाले सूर्य-चन्द्र-उषा-सोम-इन्द्रादिभ्यः प्राकृतिकरूपेभ्यः देवानां स्वरूपं प्रकल्पितम् । प्रकृतिं देवरूपेण स्वीकरणेन स्पष्टं यत् मनुष्यजीवनं प्रकृतिं विना शून्यं वर्तते।

पञ्चमहाभूतानां सन्तुलनप्रबन्धनकर्तृशास्त्रं वास्तुशास्त्रमुच्यते। मनुष्यसंरचना पञ्चमहाभूतैः अभवत्। यदि सः मन्दिरे/भवने पञ्चमहाभूतनिर्मितवातावरणं प्राप्नोति तर्हि तस्य विकासः सुनिश्चितः। अतः वास्तुनिर्माणाय

भूमि-जलादिकं विचार्य आचार्यैः शुभाशुभत्वं निगदितमस्ति । यथा -

**यत्र वृक्षाः प्ररोहन्ति सस्यं हर्षात्प्रवर्धते।**
**स भूमिर्जीविता वाच्या मृता चातोऽन्यथा भवेत्।।**[1]

अर्थात् यस्यां भूमैः वृक्षाः शीघ्रं संवर्धनं प्राप्नुवन्ति, सा भूमिः जीविता भवति। वृक्षैरैव भूमै उर्वराशक्तिः ज्ञायते।

**मन्दिरशब्दस्य व्युत्पत्तिः –**

**''मंद्यतेऽत्र मदं किरच्''**[2]

अर्थात् यत्किमपि आवासः, गृहम् अथवा निवासस्थानं वा मन्दिरम् वर्तते। 'मन्द' इति शब्दः साहित्ये विश्लेषणरुपेण प्रयुज्यते यस्यार्थः प्रसन्नः, आनन्दः, प्रकाशः, आभासश्च भवति। मन्दरः मन्दारः वा इत्यादयः शब्दाः मन्दशब्दात् निष्पन्नाः भवन्ति। मन्दारस्य अर्थः पर्वतः पर्वतदेवो वा तथा च कल्पवृक्षस्य कृतेपि मन्दाशब्दः प्रयुक्तः अस्ति। महाकाव्येषु, सूत्रग्रन्थेषु, कौटिल्यार्थशास्त्रे तथा शास्त्रग्रन्थेषु देवालयः-देवायतनं-देवकुलः-देवगृहादीनां शब्दानां धार्मिकदेवस्थानरुपेण प्रयुक्ताः सन्ति तथा च दक्षिणभारते देवस्थानाय अधिकांशतः विमानहर्म्यशब्दयोः प्रयोगः प्राप्यते।

विभिन्नशास्त्रग्रन्थेषु मन्दिरनिर्माणाय भूमिचयनस्य निर्देशः वर्तते। कस्याश्चिदपि संरचनायाः निर्माणात् पूर्वं सा संरचना कस्यां भूमौ भवेत् अथवा तस्यै संरचनायै का भूमिः श्रेष्ठाः भविष्यति, विचारोऽयं सर्वप्रथमं करणीयः। मन्दिरनिर्माणाय समीपस्थवातवरणं शुद्धं भवेत्। देवालयः मनुष्याय मानसिकसन्तुष्टिं तथा च आध्यात्मिकशान्तिं प्रददाति। मनुष्यः मन्दिरे स्वाराध्यम् अवलोक्य मन्त्रमुग्धः भवति। भक्तस्य आराध्येन सह मेलनं कस्मिंश्चिद् उत्तमे स्वस्थपर्यावरणे, स्वच्छस्थाने एव भवेत्।

मन्दिंर केवलं मनुष्येभ्यः आश्रयस्य अथवा भक्तेः स्थानं न अपितु पशु-पक्षीभ्योऽपि संरक्षणं प्रददाति। कापि संरचना या वातावरणानुकूला न भवति, सा कस्मैश्चिदपि सन्तुष्टिं न प्रददाति। वास्तुशास्त्रीनियमानां पालनं वातावरणे मानवीयजीवने च सामञ्जस्यं भवति।

**भूमिचयनम्–**

देवालयचन्द्रिकायां निगदितं यत् यत्र कर्पूर-अगरु -नारिकेल-तिलक-दर्भ-कदम्ब-अर्जुन-मालेय-क्रमुक-केतकी-इक्षु-कुन्द-कमल-उत्पलादयः जायन्ते एधन्ते च, सा भूमिः मन्दिरनिर्माणाय सर्वश्रेष्ठा भवति। यथोक्तम् -

**कर्पूरागरुनारिकेलतिलकैर्दर्भैः कदम्बार्जुने-**
**र्मालेयैः क्रमुकेक्षुकेतककुशैः कुन्दारविन्दोत्पलैः।**
**पूर्वोदक्प्लवशालिनी बहुजला वा या दरीदृश्यते।**

1. वृ.वा.मा.मिश्रप्रकरण 101
2. कंवल-रामलाल,प्राचीन मालवायां मन्दिरस्य वास्तुकला, अध्याय-२, पृ. 20

**सेयं शान्तिकरी सुरेशयजने सूक्ता सुपद्मा मही।।**[1]

यत्र जलप्रवाहः पूर्वदिशं प्रति भवति अर्थात् भूमिप्लवः पूर्वं प्रति भवति, या भूमिः बहुजला, कमलैः परिपूर्णा भवति सा भूमिः देवालयाय सर्वोपयुक्ता भवति।

देवालयचन्द्रिकायां भूमिः भद्रा तथा पूर्णा नामाभ्यां कथिता। भूमिद्वयमपि मन्दिरनिर्माणाय सर्वश्रेष्ठम् उक्तम्। भूमिद्वयस्यापि लक्षणं विशेषताश्च एवं सन्ति।

**भद्रा-संज्ञकभूमिः -** या भूमिः वृक्षैः तथा फलैः पूर्णा, तथा समुद्रतटे विद्यते, नदीप्रवाहस्य अथवा कस्यचित् प्रसिद्धतीर्थस्थलस्य दक्षिणभागे भवेत्, या ब्रीहिक्षेत्राणां पश्चिमभागे भवेत्, यस्यां भूमौ यज्ञाय उपयोगिनः पलाशादयः वृक्षाः भवेयुः, या भूमि उद्यानयुता अथवा जलाशययुक्ता भवति सा भूमिः भद्रा उच्यते। एतादृशी भूमिः याज्ञिकेभ्यः प्रीतिदायिका भवति।

**तीरं वारिनिधेः श्रिताथ सरितस्तीर्थस्य वा दक्षिणे**
**व्रीहिक्षेत्रविचित्रताप्यदिशि यज्ञार्हाङ्घ्रिपैरङ्किता ।**
**कीर्णा पूर्वफलप्रसूतनरुभिर्योद्यानह्यद्यापि वा ।**
**भद्रा सा परिगीयते वसुमती प्रीतिप्रदा यज्वनाम् ॥**[2]

**पूर्णासंज्ञाभूमिः –**

या भूमिः प्लक्ष-अश्वत्थ-निम्ब-अर्जुन-कुल-कुलस्थ-आसना-अशोक-निष्पाव-अङ्कोल-मालती-चम्पक-तिल-खदिर-कोद्रववृक्षैर्युक्ता । या भूमिः पर्वतशिखरे अथवा पर्वतैः परिवृता भवति। सा भूमिः पूर्णा कथिता। भूमीयं देवगृहमपि कथिता।

**वृक्षेषु देवत्वम् –**

भारतीयवास्तुशास्त्रीणां मतमस्ति यत् वृक्षाः अस्मभ्यम् दीर्घायुषं सौन्दर्यं च प्रददति। प्राणवायोः तथा च अनुकूलचुम्बकीयतत्त्वानां। प्राप्तिरपि वृक्षैः सहजतया भवति। यथा निम्बवृक्षः विविधौषधिरूपेण शिरसारभ्य पादपर्यन्तम् विभिन्नासाध्यरोगाणां प्रतिरोधं करोति। तथैव तुलसीवृक्षस्यापि विशेषमहत्त्वमस्ति।

वृक्षाणां महत्तायाः विषये विभिन्नग्रन्थेषु वर्णनं प्राप्यते। वृक्षाः पञ्चमहाभूतानां सन्तुलनं कुर्वन्ति। वृक्षाः पृथ्वीतत्त्वं बलं प्रदति जलतत्त्वं संरक्षं, अग्नितत्त्वस्य प्रबन्धनं कुर्वन्ति। वायुतत्त्वस्य शुद्धिकरणं तथा पवित्रीकरणं कुर्वन्ति। एतेषां चतुर्णां तत्त्वानां प्रभावेणैव आकाशतत्त्वं व्यवस्थितं भवति।

बृहद्वास्तुमालानामकग्रन्थे वृक्षाणां महत्त्वोपरिः एतत् वर्णनं प्राप्यते-

**अश्वत्थमेकं पचुमन्दमेकं न्यग्रोधमेकं दशचिञ्चणीकम्।**
**कपित्थविल्वामलकत्रयञ्च पञ्चाम्रवापी नरकं न पश्येत् ॥**[3]

---

1. देवालयचन्द्रिका, प्रथमपटल, श्लोक संख्या 3
2. देवालयचन्द्रिका, प्रथमपटल श्लोक सं. 4
3. बृहद्वास्तुमाला 5.23

अर्थात् यदि कश्चन मनुष्य एकस्य अश्वत्थस्य एकस्य निम्बस्य, एकस्य न्यग्रोधस्य, दश चिञ्चणीकानाम्, त्रयाणां विल्वानाम्, त्रयाणाम् आमलकानाम्, पञ्चानाम् आम्राणाञ्च रोपणं करोति सः नरकद्वारं न पश्यति।

एवमेव मत्स्यपुराणे पर्यावरणमहत्त्वस्य वर्णनं प्राप्यते, यत्र वृक्षाणां शुभाशुभानाम् एवं वास्तुदोषाणां निरुपणं कृत्वा वास्तुदोषाणां निवारणं कृत्वा वृक्षारोपण प्रक्रिया वर्णिता।

वृक्षां अस्माकं कृते दैवीयशक्तेः स्वरूपाः सन्ति। न केवलं देवपूजायामेव यज्ञेष्वपि तुलसी-दुर्वा-कुश-बेलपत्र-आम्र-चन्दन-पलाश-खदिर-अश्वत्थ-अर्कादीनां वृक्षाणाम् अत्यधिकं महत्त्वं वर्तते। वामनपुराणे विभिन्नवृक्षाणाम् उत्पत्तिः विभिन्नदेवभ्यः कथिता।[1]

| **देवता** | **वृक्षः** | **देवता** | **वृक्षः** |
|---|---|---|---|
| कामदेवः | कदम्बः | यमराजः | कृष्णोदुम्बरम् |
| मणिभद्रः | वटवृक्षः | रुद्रः | अहूसा |
| शिवः | धत्तूरः | स्कन्दः | बन्धुजीवा |
| ब्रह्मा | खदिरः | सूर्यः | अश्वत्थः |
| विश्वकर्मा | कण्टकी | कात्यायनी | शमी |
| पार्वती | कुन्दगुल्मः | लक्ष्मीः | बिल्वः |
| गणेशः | सिन्धुवारकः | शेषनागः | श्वेतश्यामदूर्वा |

एतेषु वृक्षेषु तेषां देवतानां स्वाभाविकप्रीतिः भवति। एतेषां वृक्षाणां पूजनेन एतेषां देवतानां कृपा प्राप्यते। एतदतिरिक्तं लोके देवीदेवानाम् उपासनायै लतापत्रादिभिः मण्डपं निर्माय पूजायाः विधानम् प्राप्यते । मन्दिरस्य जगत्याः स्थाने मण्डपं स्थाप्य तत् कदलीपत्र-लतापत्र- वस्त्रादिभिः आच्छाद्य मन्दिरस्य रूपं दीयते।

मन्दिरनिर्माणाय भूमिचयनानन्तरम् चयनितभूमौ मुहूर्तानुसारं विधानानन्तरं भूमिकर्षणाय वृषभाः योज्यन्ते। लाङ्गलनिर्माणाय असननामकवृक्षस्य काष्ठः प्रयोक्तव्यः। देवालयचन्द्रिकायाम् उक्तम्- दर्भैः रज्जुः निर्मातव्या, तदा रज्जुना वृषभाः बधनीयाः, वृषभकण्ठे श्वेतपुष्पमाला भवेत्। यथोक्तम् देवालयचन्द्रिकायाम् -

**आचार्यो मनुभावितोऽह्नि सुशुभे लग्ने वृषाभ्यां मिथ-**
**स्तुल्याभ्यामसनादिजैर्हलयुगाद्यैर्दर्भमालासितैः।**
**प्रागास्यो मिहिरार्णतस्त्रिरथवा कृष्ट्वा क्षितिं पञ्चधा**
**मुद्गादीनि समुप्य मूलमनुना सिञ्चेज्जितन्ताणुना ॥**[2]

इत्थं भूमिचयनादनन्तरं भूमिकर्षणादिष्वपि कार्येषु वृक्षाणां प्रयोगः भवति। मन्दिरं पर्यावरणञ्च परस्परमं पूरके स्तः न तु भिन्ने।

**देवप्रतिमा-** मानवशरीरे यथा हृदये आत्मनः निवासः भवति तथैव देवालयस्य गर्भगृहे परमात्मनः प्रतिमारूपे

1. वास्तुविमर्शपत्रिका, पृ. स. 83, एकादश पुष्प, संस्करण-2018
2. देवालयचन्द्रिका, प्रथमपटल,श्लोक सं. 7

अवस्थितिः प्रकीर्तिता।[1] यथा-

**ब्रह्मस्थानं यदैतच्च तन्नाभिः परिकीर्तिता।**

**हृदयं पीठिका श्रेया प्रतिमा पुरुषः स्मृतः ॥[2]**

शास्त्रलिखितप्रतिमास्वरूपानुसारमेव शिल्पिभिः मूर्तिनिर्माणं क्रियते। देवायतननिर्माणाय येषां द्रव्याणाम् आवश्यकता भवति तेषु द्रव्येषु पाषाणः अथवा शिला प्रधाना भवति। मानवसभ्यतायाः विकासेन शिल्पादिकार्याणामपि विकासः अभवत्। प्राचीनकाले प्रस्तरैः अथवा धातुभिः मूर्तिनिर्माणं न भवति स्म। तदा प्रायः मृत्तिकायाः अथवा काष्ठस्य प्रतिमा भवति स्म। काष्ठ-धातु-इष्टिकादीनां प्रयोगः अपि क्रियते स्म परन्तु पाषाणस्यैव प्राधान्यम् आसीत्। अतः आधारात् शिखरपर्यन्तं पाषाणास्यैव प्राधान्यं भवति। अयं पाषाणः अथवा शिलापी पर्यावरणस्यैवोपहारः। मानवेन शिल्पकलायाः विकासं कृत्वा प्रकृतौ उपलब्धानां समेषामपि द्रव्याणां स्वकार्याय प्रयोगः कृतः। मन्दिरनिर्माणानन्तरं गर्भगृहे प्रतिमा अनेनैव पाषाणेन निर्मीयते। प्रकृतौ उपलब्धेन एकेन पाषाणेन देवप्रतिमायां परिवर्तनं कृत्वा तस्मै एकं रूपम्, सुन्दरता, आकारश्च प्रदीयते।

विश्वकर्मावास्तुशास्त्र-शुक्रनीति-विश्वकर्माप्रकाश-समरागणसूत्रधार-अभिलषितार्थ-चिन्तामणि-मानसोल्लास-राजवल्लभवास्तुशास्त्र-प्रासादमण्डनादिषु ग्रन्थेषु पाषाणशिलादीनां ज्ञानम् आवश्यकमुक्तम्। सूत्रधारमण्डने देवतामूर्तिप्रकरणे सूत्रधाराय धातु-रत्न-शिला-काष्ठ-चित्रं लेपादीना ज्ञानं प्रदत्तम्-

**धातुः रत्नशिलाकाष्ठचित्रलेपसमुद्भवम् ।**

**यद्रूप विधिवत्तस्य विधिं वक्ष्यामि वस्तुतः ॥[3]**

प्रतिमानिर्माणाय अष्टलोह-रत्न-श्रेष्ठवृक्ष-इष्टिका-प्रवालैः सह पर्वतीयपाषाणाः शुभप्रदाः उक्ताः यथा-

**अष्टलोहमयी मूर्तिः शैलरत्नमयी तथा।**

**श्रेष्ठवृक्षमयी वाऽपि प्रवालादिमयी शुभा ॥[4]**

**शिलाभेदः-** वास्तुशास्त्रिभिः शिल्पशास्त्रिभिश्च त्रिधाः शिलाः स्वीकृताः। 1. पुरुषशिलाः, 2. स्त्रीशिलाः तथा ,3. नपुसंकशिलाः, एतासां शिलानां विभाजनम्[5] शिलाणां गुणाधारेण आकाशाधारेण च कृतमस्ति।

श्वेता रक्ता च पीता च विप्रादीनां द्विवासिता।[6] इत्यनुसारेण श्वेत-रक्त-पीत-श्यामवर्णशिलाः क्रमशः ब्राह्मणेभ्यः, क्षत्रियेभ्यः, वैश्येभ्यः, शूद्रेभ्यः च उपयोगी भवति।

वास्तुशास्त्रस्य निर्देशः अस्ति यत् पुरुषदेवानाम् यथा शिवलिङ्ग-राम-कृष्ण-गणेश-ब्रह्मादीनां प्रतिमाः

1. प्रासादमण्डन-उपोद्धात पृ. 03
2. क्षीरार्णव 01/03
3. देवतामूर्तिप्रकरण, संपादक-डॉ. श्रीकृष्ण जुग्नू न्यू भारतीयबुक्स कार्पोरेशन दिल्ली, 2003
4. सूत्रधारमण्डन 1/23
5. शिलाचयन की परम्परा, प्रथम अध्याय. पृ. 9
6. मयंमत 33/41

पुरुषशिलाभिः निर्मिताः भवेयुः। तथा पिण्डिकानां देवीनां च प्रतिमाः स्त्रीजातिशिलाभिः निर्मिताः भवेयुः। नपुंसकशिलाभिः देवालय-भवन-कुण्डादीनां निर्माणं भवेत्। विशेषरूपेण भिन्ने तलभागे उपयोगः करणीयः। यथा–

**लिङ्गनी प्रतिमा मिश्रं कुर्यात् पुंशिलया सुधीः ।**
**युञ्जीयात् स्त्रीशिलां सम्यङ्नारीबेरं च पिण्डिकम् ॥**
**षण्डोपलेन कर्त्तव्ये ब्रह्मकूर्म शिले तथा ।**
**प्रासादतलकुण्डालिकर्म कुर्याद् विचक्षणः ।**
**एवं मूर्तिनिर्माणाय पाषाणावश्यकता भवति ।**[1]

**मन्दिरेषु पर्यावरण-संरक्षणम्**

पर्यावरणाद् अभिप्राय अस्मान् परितः विस्तृतेन तेन वातावरणेन परिवेशेन वा वर्तते येन वयम् आवृताः स्मः। प्रकृतौ विद्यमानाः समस्तजैविकाजैविकघटकाः पर्यावरणसंरचनायां सहायकाः सन्ति। प्रकृतिमानवयोः सृष्टे आरम्भादेव अन्योन्याश्रितसम्बन्धः वर्तते। अस्माकं पुरातनधार्मिकपरम्पराः पर्यावरणसन्तुलने सहायकाः सन्ति। मन्दिरेषु क्रियामाणाः हवन-यज्ञ-पूजा-पाठादयः न केवलं जनजीवनाय सुखसमृद्धी एव प्रददति, अपितु विज्ञानसम्मताः अपि एते वर्तन्ते, यैः पर्यावरणं स्वच्छं भवति। महर्षिः दयानन्देनोक्तं यद् यदि पर्यावरणशुद्धिम् एवं सुखवृद्धिम् इच्छन्ति तर्हि नित्यं प्रातः प्रत्येकमपि गृहे यज्ञः भवेत्। आरोग्यतायाः सम्बन्धः यज्ञेन वर्तते असंख्याज्ञातसूक्ष्मजीवाणवः अस्मान् परितः वातावरणे तथा अस्माकं रोमकूपेषु रक्ते तथा अङ्गेषु भवन्ति। हवनेन एतेषां सर्वेषां नाशः भवति। असाध्यरोगाणामपि उपचारः हवनेन सम्भवति। अश्वत्थ-आम्र-बिल्व-पलाश-शमी-उदुम्बर-अशोक-पारिजात-आमलक-मौलश्रीवृक्षाणां समिधाभिः घृतेन सह हवनः क्रियते। एतत् सर्वम् अद्यत्वे विज्ञानसम्मतं वर्तते। यतः यज्ञानाम् उद्देश्यं पञ्चभूतानां शुद्धिः वर्तते, यत्तु अस्माकं पर्यावरणस्यैवाङ्गं वर्तते। यज्ञानां वैदिकोद्देश्यं पर्यावरणशुद्धिः सन्तुलनञ्च वर्तते। एवं मन्दिरेषु यज्ञैः पर्यावरणशुद्धिः भवति।

**वृक्षाः तथा तेषां पर्यावरणे प्रभावः**

**वटः** – वटः न्यग्रोधनाम्नापि ज्ञायते। वटवृक्षस्य विशेषता अस्ति यत् अस्मिन् सम्पूर्णजैवविविधता भवितुं शक्यते। अत्र पिपीलिकादारभ्य भिन्न-भिन्न पक्षिपर्यन्तं सर्वे आश्रयन्ति। वटवृक्षः कार्बनडाईआक्साइड $CO_2$ इत्यस्य अवशोषणं करोति। वटः ऑक्सीजन $O_2$ इत्यपि सर्वाधिकं त्यजति।

**अश्वत्थः** – अश्वत्थस्य पूजा सम्पूर्णदेशे भवति। अयं सर्वाधिकः शुभः तथा च दिव्यवृक्षः मन्यते। वैज्ञानिकैरपि एतत् स्वीकृतं यत् अनेन वृक्षेण उत्सर्जिता $O_2$ गैस इति शक्तिशालीनी, उत्तमा तथा शाखासु अधिका भवति। सूर्योदयात् पूर्वम् अमुम् वृक्षं परितः परिक्रमणं स्वास्थ्याय अत्यन्तं लाभप्रदं भवति।

**तुलसिका** – तुलसिका सुभगा, पावनी, पुण्या, वैष्णवी इत्यादिभिः नामभिरपि ज्ञायते। तुलसिकायाः वैज्ञानिकम्, औषधीयम् तथा आध्यात्मिकं महत्त्वं वर्तते। एषा विषाक्तकीटाणु-

1. काश्यपशिल्पम् 49, 57-58

रोगवर्धककीटाणुनां नाशं करोति। श्वाससम्बन्धिरोग-कुष्ठादिरोगाणाम् उपचारे तुलसिका लाभप्रदा भवति।

**निम्बः** – वृक्षोऽयं कीटनाशकरूपेण कार्यं करोति। पूर्णरूपे अस्य बीजानि जलं परिष्कुर्वन्ति। वायुं च शुद्धं करोति।

**आम्रः** – अस्य पत्राणि कीटनाशकरूपेण कार्यं करोति। आम्रः स्वास्थ्याय उत्तमः भवति। आम्रवृक्षस्य आयुः अत्यधिकं भवति। एतादृशाः अनेके वृक्षाः सन्ति ये ५००-६०० वर्षेभ्यः जीविताः सन्ति।

**कदलीवृक्षः** – कदलीफलं सम्पूर्णवर्षे उपलब्धः भवति। वृक्षोऽयं आवर्षं फलं ददाति। कदलीवृक्षस्य पत्राणाम् उपयोगः सज्जारूपेणापि प्रयुज्यते। वृक्षोऽयं सम्पन्नतायाः प्रतीकः वर्तते।

**नारिकेलः** – वृक्षोऽयं कल्पवृक्षरूपेण प्रसिद्धः वर्तते। एतेषां आयुः १००-१५० वर्षाणि यावत् भवति। नारिकेलस्य जलमपि स्वास्थ्यवर्धकं भवति। नारिकेलस्य आवरणकमपि अग्नि-प्रज्वलनाय उपयुक्तं भवति। ईन्धनरूपेणापि अस्य प्रयोगः भवति।

एतेभ्यः वृक्षेभ्यः अतिरिक्तम् अन्ये वृक्षा अपि सन्ति ये न केवलं पर्यावरणं शुद्धं कुर्वन्ति अपितु मानवानां कल्याणमपि कुर्वन्ति। मन्दिरस्य तथा तस्य समीपस्थवृक्षाः वातावरणं स्वच्छं शुद्धं च कुर्वन्ति। मन्दिरे एतेषां वृक्षाणां संरक्षणं भवति।

मनुष्यः मन्दिरे परमात्मनः दर्शनं करोति। परमात्मनः निवासः तस्मिन्नेव स्थाने भवति यत्र वातावरणं स्वच्छं पवित्रं तथा आनंदमयं भवति। न केवलं मन्दिरस्य एव समीपस्थवातावरणमपि स्वच्छं भवेत्। स्वच्छता शुद्धता च शुद्धपर्यावरणस्योदाहरणं अस्ति।

एवं मन्दिरेण पर्यावरणस्य संरक्षणं क्रियते। यज्ञस्य हवनसामग्री, धूपं, गन्धवर्तिकादयः मन्दिरस्य वातावरणं स्वच्छं, शुद्धं पवित्रञ्च कुर्वन्तीति।

**निष्कर्षः-** वास्तुशास्त्रस्य पर्यावरणस्य च सम्बन्धः अत्यन्तगहनः वर्तते। एवमेव पर्यावरणमन्दिरयोः सम्बन्धोऽपि अत्यन्तगूढः वर्तते। ब्रह्माण्डेऽस्मिन् प्रकृतिः एव सर्वश्रेष्ठा, बलवती च। प्रकृतिरेव सृष्टेः आधारः वर्तते। भूमिचयनाय, देवप्रतिमानिर्माणाय, यज्ञ-देवपूजनादीनां कृते प्रकृतेः महती आवश्यकता भवति। प्रकृतौ उपलब्धसंसाधानां प्रयोगं कृत्वैव मन्दिरनिर्माणं भवति। मन्दिरनिर्माणानन्तरं मन्दिरस्य वातावरणं वृक्षाः शुद्धं कुर्वन्ति। मन्दिरं केवलं पर्यावरणस्यैव न अपितु मानवजीवनकल्याणाय च अपि वर्तते।

❖ ❖ ❖

# श्रीमद्रामायणदिशा नगरवास्तुविचारः

**– ए. श्रीनिवास शर्मा**

**– प्रो. ए. श्रीपादभट्टः**

नगरनिर्माणविधानानि भारतदेशे वेदेषु तथा आगमशास्त्रे च वर्तन्ते। मयः, विश्वकर्मा इत्यादयः नगरनिर्माणविधानानि लोकाय प्रदत्तवन्तः । रामायणे अपि अयोध्यायाः तथा लङ्कायाः नगरवर्णनम् अद्भुतरूपेण कृतम् । नगरी कथं भवेत्, राजधानी कथं भवेत्, मुख्यतया राजधान्याः निर्माणं दुर्गेषु कुतः कर्तव्यम् ? ततः किं प्रयोजनम् ? रक्षणं कथं कर्तव्यम् इत्यादयः विषयाः अत्र प्रस्तूयन्ते ।

**नगरलक्षणानि -**

नगरस्य लक्षणानि कथं भवेयुरिति मयमते इत्थं प्रोक्तम् -

**उन्नतगोपुरयुक्ता नानाविधमालिकोपेता । सर्वसुरालयसहिता नानागणिकान्विता बहूद्याना ॥**[1]

उन्नतगोपुराः, विभिन्नप्रकाराः अट्टालकाः, समस्तदेवतामन्दिराणि, बहून्युद्यानानि यत्र विद्यन्ते तत्तु नगरमिति परिकीर्त्यते ।

**हस्त्यश्वरथपदातिबहुमुख्या सर्वजनयुक्ता । द्वारोपद्वारयुताभ्यन्तरतोऽनेकजवासा ॥**[2]

यत्र अश्व-गज-रथ-पदातिसर्वजनयुक्तं, द्वारोपद्वारयुतं नगरं भवति ।

**राजधानी लक्षणम् -**

**या नृपवेश्मसमेता सा कथिता राजधानीति ।**
**काननवनदेशे वा सर्वजनावाससङ्कीर्णम् ॥**[3]
**क्रय-विक्रयकैर्युक्तं पुरमुदितं यत् तदेव नगरमिति ।**[4]

यस्मिन् राज्ये राजभवनं भवति सा राजधानीति कथ्यते । अरण्याः, जननिवासयोग्यप्रदेशाः, वस्तूनां क्रय-विक्रयणानि यत्र भवन्ति तत्तु नगरमित्युच्यते।

**राष्ट्रस्य मध्यभागे सज्जनबहुले नदीसमीपे च ।**

---

1. मयमतम्, 10-23
2. मयमतम्, 10-24
3. मयमतम्, 10-25
4. मयमतम्, 10-26/1

**नगरं केवलमथवा राजगृहोपेतराजधानी वा ॥**[1]

यस्मिन् प्रदेशे सज्जनाः, नद्यश्च भवन्ति तत्तु नगरम्। यदि नगरस्य मध्यभाग उन्नतशिखरयुतं राजगृहं भवति चेत् सा राजधानी भवति ।

**दुर्गलक्षणानि**

मयमतानुसारं दुर्गलक्षणानि -

**बहिरुदकं रहितवनं छन्नपथं दुष्प्रवेशं च । गोपुरमण्डपयुक्तं सोपानच्छन्नमच्छन्नम् ॥**[2]

**द्विकवाटचतुष्परिघार्गल हस्तोन्नतेन्द्रकीलयुतम् । सस्थूणमध्यमालयमिण्ठकसहितं सगूढसोपानम्॥**[3]

**द्वाराणि मण्डपसभाशालाकाराणि कार्याणि ।**[4]

दुर्गाणि कथं भवेयुरित्युक्ते दुर्गं परितः जलाशयानि, विस्तृतपन्थानः, दुष्प्रवेशमार्गाः, गोपुरयुतमण्डपाः, ससोपानसौधानि भवेयुः। न्यूनातिन्यूनं कवाटद्वयं, चतुर्षु दिक्षु परिघाः, अर्गलाः भवेयुः। सगूढसोपानानि, द्वाराणि, सभामण्डपानि भवेयुः।

**द्वारलक्षणम् -**

**दिक्षु चतुर्द्वारयुतं गोपुरयुतं तु शालाढ्यम् । क्रयविक्रयकैर्युक्तं सर्वजनावाससङ्कीर्णम् ॥**[5]

**दुर्गे यन्त्राणां प्रयोजनम्**

दुर्गेषु यन्त्राणामावश्यकता इति विचारः मयमते उपलभ्यते -

**सर्वस्याभ्यन्तरतः पांसुचयोपर्यनेकयन्त्रयुतम् ।**
**परितः परिखोपेतं पांसुचये संहताट्टालम् ॥**[6]
**चतुर्षु दिक्षु मृण्मयभित्तीनामुपरि आयुधयुतयन्त्राणि योजनीयानि।**
**अपराजितपृच्छे विविधयन्त्रलक्षणानि उपलभ्यन्ते ।**

लक्षणान्यनुसृत्य दुर्गाणि सप्तधा विद्यन्ते । तद्यथा –

**गिरिवनजलपङ्केरिणदैवतमिश्राणि सप्त दुर्गाणि ॥**[7]
**गिरिमध्यं गिरिपार्धं गिरिशिखरं पार्वतं दुर्गम् ।**
**अजलं तरुवनगहनं वनदुर्गं तदुभयं तु मिश्रं स्यात् ॥**

1. मयमतम्, 10-19
2. मयमतम्, 10-40
3. मयमतम्, 10-41
4. मयमतम्, 10-42/1
5. मयमतम्, 10-20
6. मयमतम्, 10-45
7. मयमतम्, 10-36

**दैवं तु सहजं दुर्गं पङ्कयुतं पङ्कदुर्गं स्यात् ।**
**नद्यब्धिपरिवृतं यज्जलदुर्गं निर्वनोदमिरिणं स्यात् ॥**

1. गिरिदुर्गम् । 2. वनदुर्गम् । 3. जलदुर्गम् । 4. पङ्कदुर्गम् । 5. इरिणदुर्गम् ।
6. दैवतदुर्गम् । 7. मिश्रदुर्गम् ।

सप्तानां दुर्गाणां लक्षणानि मानसारे इत्थं प्रतिपादितानि -

**पर्वतावृत्तमध्ये च पर्वतस्य समीपके । पर्वताग्रप्रदेशे तु गिरिदुर्गमिति त्रिधा ॥[1]**
**तलपर्जान्यान्तरयुतं गगनं च प्रवेशनम् । एतत्तु वनदुर्गं स्याज्जलदुर्गमिहोच्यते ॥[2]**
**समुद्रैश्च नदीभिश्च संवृतं जलदुर्गकम् । पर्वतकन्दरैर्युक्तं दुष्प्रवेशं च शत्रुभिः ॥[3]**
**दुर्गं तु कृत्वा नृपतिस्तिष्ठेत्तत्पङ्कदुर्गकम् ।[4] मन्त्रतन्त्रादिसामर्थ्यैः कृतान्तं देवदुर्गकम् ॥[5]**
**अनेकपर्वतोपेतं नानावनसमिश्रकम् । तत्रास्थितं तु तद्दुर्गं मिश्रदुर्गमिति स्मृतम् ॥[6]**
**सर्वेषामपि दुर्गाणां वप्रैश्च परिधैर्वृतम् । प्रवेशनिर्गमस्थाने द्वारैरपि समन्वितम् ॥[7]**

**मयमतानुसारं दुर्गप्रयोजनम्–**

**दुर्गं दुर्गममुक्तं दुर्लङ्घयं दुरवगाहं च ॥[8] रक्षार्थं च जयार्थं च ह्यरिभिरभेद्यं च दुर्गमिष्टं स्यात् ।[9]**

दुर्गं प्रवेशाय दुःशक्यं, दुर्जय्यम्, शत्रुभिरभेद्यं भवेत्, तादृशं दुर्गं रक्षणार्थं जयार्थञ्चोपयोगी भवति ।

**रामायणे वास्तुविमर्शः**

**लङ्कानगरवास्तु -**

लङ्कानगरवास्तु श्रीमद्रामायणे सुन्दरकाण्डे हनुमता धृष्टम्। तथैव युद्धकाण्डे समुद्रावतरणानन्तरं रामेण वर्णितम्।

**काञ्चनेनावृतां रम्यां प्रकारेण महापुरीम् । गृहैश्च गिरिसंकाशैः शारदाम्बुदसंनिभैः ॥[10]**
**पाण्डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम् । अट्टालकशताकीर्णां पताकाध्वजशोभिताम् ॥[11]**

1. मानसारः, 10-46
2. मानसारः, 10-47
3. मानसारः, 10-48
4. मानसारः, 10-49/1
5. मानसारः, 10-51
6. मानसारः, 10-52
7. मानसारः, 10-53
8. मयमतम्, 10-48/2
9. मयमतम्, 10-49/1
10. रामायणम्, 5-2-16
11. रामायणम्, 5-2-17

**तोरणैः काञ्चनैर्दिव्यैर्लतापङ्किविराजितैः । ददर्श हनुमाँल्लङ्कां देवो देवपुरीमिव ॥[1]**

**गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः । ददर्श स कपिः श्रीमान्पुरीमाकाशगामिव ॥[2]**

**पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा । प्लवमानामिवाकाशे ददर्श हनुमान्कपिः ॥[3]**

**सप्तभौमाष्टभौमैश्च स ददर्श महापुरीम् । स्थलैः स्फटिकसंकीर्णैः कार्तस्वरविभूषितैः ॥[4]**

स्वर्णप्राकारमयी लङ्का शरत्कालमेघ इवोन्नतगिरिसदृशगृहैः सह रमणीयतया भाति। सा लङ्का विस्तृतैः प्रधानैः वीथिभिः सह दीव्यति । असंख्याकाट्टालकैः, दिव्यतोरणैः, चित्रविचित्रलतापङ्किभिः, तथैव पताकध्वजैः सह प्रकाशते । तथा प्रकाशमाना लङ्का स्वर्गस्थामरपुरीमिव देदीप्यते । शिखराग्रे स्वर्णयुक्तभवनैः सहाकाशनगरमिव भासमानां तां लङ्कां हनुमान् ददर्श । विश्वकर्मणा निर्मिता लङ्का रावणेन पालिता। स्वर्णमयी लङ्का सप्त उत अष्ट अट्टालकयुक्तभवनानि, स्फटिकयुक्तस्थलानि हनुमान् ददर्श ।

**लङ्कानगरे रावणभवनम् –**

**रूप्यकोपहितैश्चित्रैः तोरणैर्हेमभूषणैः । विचित्राभिश्च कक्ष्याभिद्वरिश्च रुचिरावृतम् ॥[5]**

**अर्धयोजनविस्तीर्णमायतं योजनं महत् । भवनं राक्षसेन्द्रस्य बहुप्रासादसंकुलम् ॥[6]**

रावणमन्दिरं स्वर्ण-रजतमयद्वारैः सह शोभते । चित्रविचित्राः अट्टकाः विराजन्ते । तन्मन्दिरं नैकप्रासादयुतम् अर्धयोजनविस्तीर्णम् एकयोजनमुन्नतम् ।

श्रीरामो वानरसेनाभिस्साकं सुवेलपर्वतशिखरमारुह्य लङ्कानगरस्य सौन्दर्यमित्थं दृष्टवान् -

**स्थित्वा मुहूर्ते तत्रैव दिशो दश विलोकयन् । त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा ॥[7]**

**ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम् । तस्य गोपुरश्टङ्गस्थं राक्षसेन्द्रं दुरासदम् ॥[8]**

श्रीरामश्चित्रविचित्रकाननयुतत्रिकूटपर्वतस्योपरि विश्वकर्मनिर्मितां रमणीयलङ्कां ददर्श । तदा राजगोपुरे राक्षसेन्द्रं रावणं वानरसेनाः दृष्टवन्तः ।

**दृढबद्धकवाटानि महापरिघवन्ति च। चत्वारि विपुलान्यस्या द्वाराणि सुमहान्ति च ॥[9]**

**तत्रेषूपलयत्राणि बलवन्ति महान्ति च। आगतं परसैन्यं तैस्तत्र प्रतिनिवार्यते ॥[10]**

---

1. रामायणम्, 5-2-18
2. रामायणम्, 5-2-19
3. रामायणम्, 5-2-20
4. रामायणम्, 5-2-49
5. रामायणम्, 5-6-4
6. रामायणम्, 5-9-2
7. रामायणम्, 6-40-2
8. रामायणम्, 6-40-3
9. रामायणम्, 6-3-11
10. रामायणम्, 6-3-12

**द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः । शतशो रचिता वीरैः शतघ्यो रक्षसां गणैः ॥[1]**

**सौवर्णस्तु महांस्तस्याः प्राकारो दुष्प्रधर्षणः । मणिविद्रुमवैदूर्यमुक्ताविरचितान्तरः ॥[2]**

**सर्वतश्च महाभीमाः शीततोया महाशुभाः । अगाधा ग्राहवत्यश्च परिखा मीनसेविताः ॥[3]**

**लङ्कापुनर्निरालम्बा देवदुर्गा भयावहा । नादेयं पार्वतं चान्यं कृत्रिमं च चतुर्विधम् ॥[4]**

**स्थिता पारे समुद्रस्य दूरपारस्य राघव । नौपथश्चापि नास्त्यत्र निरुद्देशश्च सर्वशः ॥[5]**

**शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा । वाजिवारणसंपूर्णा लङ्का परमदुर्जया ॥[6]**

लङ्कायाः द्वाराणि दृढबद्धानि, विपुलान्युन्नतानि चत्वारि सन्ति । तेषामुपरि शक्तियुक्तयन्त्राणि विलसन्ति। तानि यन्त्राणि लोहयुतानि शक्तियुक्तानि सदा सन्नद्धानि च। शक्तियुक्तशस्त्रान्, शिलाखण्डान् क्षिपन्ति ।

अतिभयङ्काराः शीततोययुक्तपरिखाः लङ्कायाः चतुर्षु दिक्षु विद्यन्ते । तासु परिखासु मकराः, मस्त्याः भ्रमन्ति स्म। परिखाणामुपरि यन्त्राधारितवारिधयः दरीदृश्यन्ते ।

लङ्कायाः उपरि विजृम्भणमसाध्यम्। नद्यः, कृत्रिमागाधाः, अचलाः, वनानि, प्राकारादीनि लङ्कायां विद्यन्ते इति हेतोः देवताः अपि प्रवेष्टुं न शक्नुवन्ति। लङ्काप्रापणं दुःशक्यम्। सा लङ्का त्रिकूटपर्वतस्याग्रे संरचिता ।

**श्रीरामभद्रस्य प्रासादवर्णनम् –**

सुमन्त्रस्य श्रीराममन्दिरदर्शनसन्दर्भे वाल्मीकिना प्रतिपादितं यथा-

**ततो ददर्श रुचिरं कैलासशिखरप्रभम् । रामवेश्म सुमन्त्रस्तु शक्रवेश्मसमप्रभम् ॥[7]**

**महाकवाटविहितं वितर्दिशतशोभितम् । काञ्चनप्रतिमैकाग्रं मणिविद्रुमतोरणम् ॥[8]**

**शारदाभ्रघुनप्रख्यं दीप्तं मेरुगुहोपमम् । मणिभिर्वरमाल्यानां सुमद्भिरलङ्कृतम् ॥[9]**

कैलासशिखरमिव देदीप्यमानं, इन्द्रभवनमिव सुशोभितयुतं, महाकवाटाभिहितं राममन्दिरं सुमन्त्रेण दृष्टम्। असङ्ख्याकाः वेद्यः, प्रमुखशिखाराणामुपरि स्वर्णमयमूर्तयः तस्मिन् भवने विराजन्ते । मेरुगृहसदृशस्य राममन्दिरस्य सिंहद्वारं नानाविधहेमरत्न- वज्रवैदूर्यसमलङ्कृतं विद्यते ।

**तथा प्रोत्साहिता देवी गत्वा मन्थरया सह । क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता ॥[10]**

---

1. रामायणम्, 6-3-13
2. रामायणम्, 6-3-14
3. रामायणम्, 6-3-15
4. रामायणम्, 6-3-20
5. रामायणम्, 6-3-21
6. रामायणम्, 6-3-22
7. रामायणम्, 2-15-31
8. रामायणम्, 2-15-32
9. रामायणम्, 2-15-33
10. रामायणम्, 2-9-55

अयोध्याखण्डे मन्थरया प्रोत्साहिता मदगर्विता सा सुन्दरी कैकेयी क्रोधागारं प्रविवेश । पुरा राजमन्दिरेषु क्रोधागारस्यापि प्रामुख्यं विद्यते । तदेव बृहद्वास्तुमालायां प्रोच्यते-

**तोयेशानिलयोर्मध्ये रोदनस्य च मन्दिरम् ।**
**कामोपभोगशमनं वायव्योत्तरयोगृर्हम् ॥**[1]

पश्चिमवायव्यदिशि रोदनमन्दिरं भवतीत्यनेन श्लोकेन ज्ञायते ।

वास्तुशास्त्रे मयादयः, एकस्यां नगर्यां राज्ञः कति गृहाणि भवेयुः, राज्ञः कति, युवराजाय कति, मन्त्रिणां सेनाधिपतिप्रभृतीनां मुख्यानाम् अधिकारिणाम् कति गृहाणि इत्येवं परिमाणानि प्रदर्शितवन्तः ।

अपि च एकस्यां नगर्यां चातुर्वर्ण्यः कुत्र निवास्याः, कस्मिन् प्रदेशे किञ्जातीयकाः भवेयुः इत्येवं छायारूपेण बहुवर्णितं रामायणे वाल्मीकिना ।

तथैव मन्दिराणि कुत्र भवेयुः ? उद्यानानि कुत्र भवेयुः ? वणिजां व्यापारस्थानानि कुत्र भवेयुः ? कर्मकराः कुत्र भवेयुः ? सैनिकाः कुत्र भवेयुः इत्यादि विचाराः दृश्यन्ते ।

❖ ❖ ❖

1. बृहद्वास्तुमाला - 1/154

# वाल्मीकिरामायणानुसारं गृहकक्षाणां समीक्षा

**– श्रीमतीज्योतिशर्मा**

**– प्रो. अशोकथपलियालः**

लौकिकसाहित्ये वाल्मीकिरामायणं, महाभारतं, नाट्यशास्त्रं, शुक्रनीतिः, अष्टाध्यायी, अर्थशास्त्रं, बौद्धजातकम् इत्यादयः प्राचीनग्रन्थाः सन्ति, येषां समयः निश्चितरूपेण न ज्ञायते तथा चेषां निश्चिततिथीनामभावे परवर्तिग्रन्थेषु प्राप्तान् नामोल्लेखान् सङ्केतान् च आधारीकृत्य तर्क-वितर्काः क्रियन्ते। एतद्ग्रन्थेषु वास्तुसम्बद्धा या सामग्री उपलब्धा अस्ति, तस्याः ऐतिहासिकं महत्त्वं वर्तते। एवंविधकतिपयग्रन्थेषु रामायणे प्राप्तवास्तुकलायाः वर्णनपुरस्सरं समीक्षणङ्क्रियते-

भारतीयपरम्परायां रामायणस्य कालः त्रेतायुग-द्वापरयुगयोः सन्धिकालः मन्यते, परन्तु आधुनिकैः विद्वद्भिः तस्य मुख्यभागस्य रचनाकालः प्रायः ५०० ई.पू. इति स्वीकृतः। तदनुसारमस्य ग्रन्थस्य केचन अंशाः पश्चाद् योजिताः।[1] आदिकविना महर्षिवाल्मीकिना विरचितं रामायणं लौकिकसाहित्यस्य आदिकाव्यमिति नाम्नापि सम्बोध्यते। रामायणं २४००० पद्येषु निबद्धमेकं महाकाव्यमपि अस्ति।[2]

रामायणे प्रतिपादितप्रत्येकनिर्माणकार्यहेतोः दक्षवास्तुविदुषां कुशलशिल्पीनां प्राधान्यं प्रदत्तम् अस्ति। विविधमहत्त्वपूर्णनिर्माणकार्याणां सम्पादनात्परं शिल्पिनः वास्तुविदः नामोल्लेखसहितं सम्मानं दीयते स्म। रामायणकालीनजीवने मानवानां गृहविन्यासेऽपि वास्तुशास्त्रस्य प्रयोगः दृग्गोचरो भवति। रामायणे समावेशितायाः गृहवास्तुकलायाः ज्ञानात्प्राग् वास्तुपरिभाषाया अवगमनम् आवश्यकम्। वास्तुशब्दः **वस् निवासे** धातोः निष्पन्नः। अस्य व्युत्पत्त्यर्थः **वसन्ति प्राणिनो यत्र** अर्थात् यत्र मनुष्याः निवसन्ति इत्येवं कृतः।[3] नगर-गृह-भवनाद्यावासः यत्र मनुष्याः निवसन्ति, वास्तुनाम्ना ज्ञायन्ते।[4] वास्तोः वैदिकदेवता ऋग्वेदे वास्तोष्पति इति नाम्ना अभिहिता।[5]

ऋग्वेदे गृहवास्तुसम्बन्धे कथितं यद् यः मनुष्यः सर्वतः अत्यन्तं सावकाशं गृहं निर्माय वसति, सः निरोगी सन् स्वम् अन्यान् च जनान् सुखं प्रयच्छति। सुन्दरगृहार्थे सुवास्तुः[6] एवं गृहाभावार्थे अवास्तुः[7] इति शब्दप्रयोगः प्राप्यते। तत्र रामायणकालीनगृहनिर्माणकला मुख्यरूपेण युग्मगृहं, सामूहिकगृहं, व्यावसायिकगृहं, प्रशासनिकगृहं

---

1. भारतीय वास्तुशास्त्र का इतिहास, पृ. 66
2. संस्कृत साहित्य का इतिहास, पृ. 123
3. शब्दकल्पद्रुमः, भागः – 4, पृ.248
4. हिन्दीसंस्कृतकोश, पृ.923
5. ऋग्वेदः, 7.54.1
6. ऋग्वेदः – 8.19.37
7. अथर्ववेदः – 12.9.7

चेति चतुर्षु भागेषु विभक्तुं शक्यते। रामायणकालस्य गृहाणि वास्तुविद्भिः अत्यन्तं सुशोभितानि कृतानि। समस्तगृहेषु वास्तुशास्त्रीयसिद्धान्तानां प्रयोगः सम्यग्रूपेण दरीदृश्यते।

**1. युग्मगृहम्** – अयोध्यानगरी कौशलराज्यस्य इक्ष्वाकुवंशीयानां राज्ञां राजधानी आसीत्। एषा नगरी द्वादशयोजनदीर्घा एवं त्रियोजनविस्तृता आसीत्। अस्याः नगर्याः सम्पूर्णजनपदेन सम्पर्कं स्थापयितुं राजमार्गाः निर्मिताः।[1] प्रत्येकं वर्गस्य जनान् सुख-सौविध्यानि प्रदातुं गृहविन्यासेऽधिकमवधानं प्रदत्तमासीत्। नगरवासिनां कल्याणाय समुपयुक्तस्थानेषु आवासप्रदानार्थं महापथवीथिकादीनां निर्धारितविभाजनं कृतम्। नानावर्गानाम् अधिकारिभ्यः कर्मचारिभ्यश्च निवासस्थलव्यवस्थापि सुनिश्चिता आसीत्। अद्यतनवास्तुज्ञातृभ्यः अत्यन्तमहत्त्वपूर्ण-प्रेरणास्रोतसामग्री वर्तत इति वक्तुं शक्यते। रामायणकाले नृप-राजकुमारादयः वास्तुनियमान् जानन्ति स्म। यदा भगवान् श्रीरामः सीतालक्ष्मणाभ्यां सह चित्रकूटपर्वते आगतः, तदा तन्मनसि अवसथं निर्माय विश्रान्तेः विचारः आगतः। अतः दारुविशेषस्य परिचयवशात् लक्ष्मणं कथयति – 'हे सौम्य! त्वं वनात् श्रेष्ठानि दृढानि च दारूणि आनीय वासार्थम् अवसथनिर्माणं कुरुष्व'[2] इति।

काष्ठप्रयोगः वास्तुशास्त्रानुसारेणापि अवसथनिर्माणार्थं श्रेष्ठः मन्यते। अतः सिद्धं भवति यद् रामायणकाले गृहनिर्माणाय वास्तुशास्त्रनियमान् पालयन्ति स्म। किष्किन्धानगर्याः वर्णनमपि वास्तुशास्त्रस्य सुन्दरकलां प्रदर्शयति। भगवान् श्रीरामः पत्नीं सीताम् अन्विषन् लक्ष्मणेन सह किष्किन्धासमीपे पम्पासरः आगतवान्, तदा तस्य मित्रता महाराजेन सुग्रीवेण अभवत्। बालिवधानन्तरं सुग्रीवः किष्किन्धानगरे स्थातुं प्रार्थयति, परन्तु श्रीरामः स्वप्रतिज्ञाऽनुसारं मानवसुखसम्पन्ननगरस्थानस्य निषेधं कुर्वन् तत्रैव वने कस्याञ्चित् सुरम्यगुहायां तिष्ठामीति कथयति। भगवान् श्रीरामोऽपि वास्तुशास्त्रस्य मूलसिद्धान्तानुरूपं वायुजलादीनां सौलभ्यं दृष्ट्वा पर्वतीयभूभाग एव स्वस्य कृते गिरिगुहाचयनम् अकरोत्। यथा –

**इयं गिरिगुहा रम्या विशाला युक्तमारुता।**
**प्रभूतसलिला सौम्या प्रभूतकमलोत्पला॥**[3]

भगवतः श्रीरामस्य अनुजः लक्ष्मणः सुग्रीवस्य अन्तःपुरे गच्छन् सप्तकक्षाणाम् आवृत्तान् लङ्घयन् तद्भवनानां वास्तुशिल्पानि दृष्ट्वा अतिविस्मितोऽभवत्। विशिष्टावृत्तकक्षाणां वातायनयुक्तान्तःपक्षानाम् अनन्तरं यः राजकक्षः आसीत्, तस्मिन् समस्तवस्तूनां सुमनोहरव्यवस्था आसीत्। तत्र अन्तःपुरस्थितिवर्णनं कुर्वन् कथितं यद् रजत-सुवर्णपर्यङ्काः यथास्थानानुकूलं बहुमात्रायाम् आसन्। विविधश्रेष्ठासनानि महास्तरणोपेतानि आसन्। एतेन अन्तःपुरम् अत्यन्तं सुसज्जितं दृश्यते स्म।[4]

---

1. आयता दश च द्वे च योजनानि महापुरी। श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा॥
   राजमार्गेण महता सुविभक्तेन शोभिता। मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः॥ - वाल्मीकिरामायणम्, बालकाण्डम् – 5.7.8
2. अयोध्याकाण्डम् – 56.19
   लक्ष्मणानय दारुणि दृढानि च वराणि च। कुरुष्वावसथं सौम्य वासे मे अभिरतं मनः॥
3. किष्किन्धाकाण्डम्, 26.16
4. हेमराजपर्यङ्कर्बहुभिश्च वरासनैः। महास्तरणोपेतैस्तत्र तत्र समावृत्तम्॥ - किष्किन्धाकाण्डम्- 33.20

अन्तःपुरस्य सुसज्जितव्यवस्थां विज्ञाय स्पष्टं वक्तुं शक्यते यद् यैः वास्तुविद्भिः वानरपतेः तदन्तःपुरस्य अन्तःकक्षाणां निर्माणं कृतम्, ते वास्तुशास्त्रीयसिद्धान्तान् सम्यक् जानन्ति स्म।

रामायणकालीनगृहवास्तुकलायाः सुमनोहरं दर्शनं रावणस्य अन्तःपुरस्य सुन्दरप्राचीरेऽपि दृश्यते।[1] मातरं सीताम् अन्विषन् यदा हनुमान् रावणान्तःपुरे प्राप्तवान्, तदा सुन्दरप्राचीरस्य निरीक्षणं कुर्वन् दृष्टवान् यत् तत्प्राचीरस्य निर्माणं केनचिद् वास्तुशास्त्रमर्मज्ञेन साधारणसुवर्णेन सह जाम्बूनदकोटिसुवर्णयुक्तमुक्तामणिसंयोजनं कृत्वा कृतम्।[2] जाम्बूनदकोटिसुवर्णमित्युक्ते सुमेरुपर्वतनदेन निर्मितं सुवर्णमिति। एतत्सुवर्णम् अत्युत्कृष्टं मन्यते।

**2. सामुदायिकगृहम्** – अष्टपदाकारायाः अयोध्यापुर्याः निर्माणार्थं वास्तुशास्त्रीयनियमा एव सर्वोपरि आसन्। अस्याः नगर्याः केन्द्रस्थाने राजप्रासादं परितः राजमार्गा आसन्। राजमार्गैः युग्मगृहेषु, सामुदायिकगृहेषु, प्रशासनिकगृहेषु च गमनागमनं सुलभम् आसीत्। भवनानां शुद्ध्यर्थं तेषु स्वर्णमयलेपं दत्वा तन्नगरीं सुन्दररूपं प्रदीयते स्म। वास्तुशास्त्रस्य समतलभूमौ आवासनिर्माणस्य संस्तुतिः रामायणकाले नगरनियोजकैः वास्तुविशारदैरपि अङ्गीकृता। शिल्पिभिः समुचितरूपदानात्परमेषा नगरी नानावाद्ययन्त्रैः नदिता आसीत्।[3]

आधुनिककालस्य भवने यस्याः आन्तरिकसुसज्जाविषये कथ्यते, तस्याः सुनियोजन-निर्माण-कलात्मकसौन्दर्यादिना रामायणकालीनजनाः पूर्णरूपेण परिचिता आसन्। एतत्कालस्य श्रेष्ठजनेभ्यो धनिकेभ्यः प्रशासनिकाधिकारिभ्यः निर्मितभवनैः वास्तुविदां कुशलकार्याणां परिचयः प्राप्यते।[4]

ब्राह्मणवर्गाय नित्यहवननिमित्तं नगरस्य समुपयुक्तस्थलेषु वेदीनिर्माणं क्रियते स्म। रामायणकाले वास्तुविदः वसतिविधानमपि सम्यक् जानन्ति स्म। अतः ते आग्नेयादिदिक्षु तत्सम्बन्धिजनान् आवासस्थलानि दत्तवन्तः। ते विषयमिमं सम्यक् जानन्ति स्म यद् आवासनियोजनं यदि सम्यक् स्यात्तर्हि नगरे सुखसाधनैस्सह शान्तिरपि स्वयमेव आगमिष्यतीति। यथा –

**तस्मिन् पुरवरे दृष्टाः धर्मात्मानो बहुश्रुताः।**
**नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः॥[5]**

---

1. स हेमजाम्बूनदचक्रवालं महार्हमुक्तामणिभूषितान्तम्।
   परार्घ्यकालागुरुचन्दनार्हं स रावणान्तःपुरमाविवेश ॥ - सुन्दरकाण्डम्, 4-30
2. समासाद्य च लक्ष्मीवाँल्लङ्कां रावणपालिताम्। परिखाभिः सपद्माभिः सोत्पलाभिरलङ्कृताम्॥
   सीतापहरणात् तेन रावणेन सुरक्षिताम्। समन्ताद् विचरद्भिश्च राक्षसैरुग्रधन्वभिः॥
   काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम्। गृहैश्च गिरसंकाशैः शारदाम्बुदसंनिभैः॥
   पाण्डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम्। अट्टालकशताकीर्णां पताकाध्वजशोभिताम्॥
   तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविराजितैः। ददर्श हनुमाँल्लङ्कां देवो देवपुरीमिव॥
   गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः। ददर्श स कपिः श्रीमान् पुरीमाकाशगामिव॥
   पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा। प्लवमानामिवाकाशे ददर्श हनुमान् कपिः॥ - सुन्दरकाण्डम्, 2.14-20
3. दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा। नदितां भृशमव्यर्थं पृथिव्यां तामनुत्तमाम्॥ - बालकाण्डम्, 5.18
4. तस्मिन् पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः। नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः॥ - बालकाण्डम्,6.6
5. बालकाण्डम्, 6.6

सामुदायिकावासयोजनान्तर्गतं वास्तुविद्भिः त्रयाणाम् आश्रयाणां निर्माणं कृतम्। तत्र गृहनिर्माणकलायाः वास्तुशास्त्रीयसमस्तसूत्राणि प्रयुक्तानि। सामुदायिकनिवासेन तात्पर्यम् एतादृशैः गृहैः आश्रमैश्च वर्तते, यत्र सर्वे प्राणिनः सुरक्षां प्राप्य सानन्दं निवसितुं शक्नुयुः।[1] रामायणकालीनाश्रमेषु अग्निहोत्रं कृत्वा देवताः हव्यपदार्थैः सम्पूज्य तुष्टाः क्रियन्ते स्म। तदाश्रमाणां शोभा कमलपुष्पैः शोभायमानया पुष्करिण्या प्रवर्धते स्म।[2]

किष्किन्धापुर्यां वानराः आवासस्य सुन्दरव्यवस्थया सुखमयं जीवनं यापयन्ति स्म। अस्याः पुर्याः भवनानि विन्ध्यसुमेरुपर्वतसन्निभानि आसन्। भवनानि बहुतलानि निर्मीयन्ते स्म, यत्र वानराणामेकः समूह आश्रयं प्राप्य वसति स्म। तत्र सर्वत्र नदी-पर्वतादय आसन्, येन वानरप्रजादिभ्योऽनायासेन फलभोजनादीनि प्राप्यन्ते स्म। वानराणां प्रमुखाधिकारिणां गृहाणि राजमार्गस्य समीपे आसन्। लक्ष्मणः एतादृशानि शुभवास्तुगुणयुतानि वानराणामाकर्षकभवनानि दृष्ट्वा विस्मितोऽभवत्।[3] तत्र श्वेतवर्णिभव्यभवनेषु कृतां चित्रकलां दृष्ट्वा लक्ष्मणेन शिल्पीनां कलायाः प्रशंसा कृता।

**3. व्यावसायिकगृहम्** – अयोध्यानगर्यां व्यावसायिकगृहान्तर्गतं पण्यकेन्द्राणि समाहितानि। अन्तरापण इति शब्दोऽपि एतेषामेव व्यावसायिकगृहाणां पर्यायवाची। यथा -

**कपाटतोरणवतीं सुविभक्तान्तरापणाम्।**
**सर्वयन्त्रायुधवतीमुषितां सर्वशिल्पिभिः॥[4]**

विविधव्यवसायैः तद्वासिनां प्रजानाम् आर्थिकविकासः सम्भवति स्म।[5] तत्काले करदातारः जनाः सामन्तराज्ञां समूहान् परितः सर्वदा तिष्ठन्ति स्म। विविधदेशीयाः वैश्याः अयोध्यानगर्याः शोभां वर्धयन्ति स्म।

**सामन्तराजसङ्घैश्च बलिकर्मभिरावृताम्।**
**नानादेशनिवासैश्च वणिग्भिरुपशोभिताम्॥[6]**

वास्तुशास्त्रनिर्देशानुरूपं रामायणकालीनवास्तुविद्भिः फल-पुष्पोत्पादकानां दुग्ध-दधि-घृतादिविक्रेतॄणां वणिजां व्यवस्था उत्तरपूर्वयोः मध्ये निर्धारिता।

गिरिगुहासु स्थितायाः किष्किन्धापुर्याः रमणीयता, तद्गृहकल्पनया वास्तुकला अत्यन्तं पल्लविता दृश्यते। यैः

---

1. शरण्यं सर्वभूतानां सुसम्मृष्टाजिरं सदा। मृगैर्बहुभिराकीर्णंपक्षिसंघैः समावृत्तम्॥ - अरण्यकाण्डम्,1.3
2. बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितम्। पुष्पैश्चान्यैः परिक्षिप्तं पद्मिन्या च सपद्मया॥ - अरण्यकाण्डम्,1.6
3. विन्ध्यमेरुगिरिप्रख्यैः प्रासादैर्नैकभूमिभिः। ददर्श गिरिनद्यश्च विमलास्तत्र राघवः॥
   अङ्गदस्य गृहं रम्यं मैन्दस्य द्विविदस्य च। गवयस्य गवाक्षस्य गजस्य शरभस्य च॥
   विद्युन्मालेश्च सम्पातेः सूर्याक्षस्य हनूमत। वीरबाहोः सुबाहोश्च नलस्य च महात्मनः॥
   कुमुदस्य सुषेणस्य तारजाम्बवतोस्तथा। दधिवक्त्रस्य नीलस्य सुपाटलसुनेत्रयोः॥
   एतेषां कपिमुख्यानां राजमार्गे महात्मनाम्। ददर्श गृहमुख्यानि महासाराणि लक्ष्मणः॥ - किष्किन्धाकाण्डम्, 33.8-12
4. बालकाण्डम्, 5.10
5. सूतमागधसम्बाधां श्रीमतीमतुलप्रभाम्। उच्चाट्टालध्वजवतीं शतघ्नीशतसङ्कुलाम्॥ - बालकाण्डम्, 5.11
6. बालकाण्डम्, 5.14

वास्तुज्ञातृभिः एतद्गिरिगुहासु सन्निवेशिता रमणीया किष्किन्धापुरी निर्मिता स्यात्, तेऽवश्यमेव वास्तुशास्त्रे पारङ्गताः आसन्। एतैरेव दक्षैः आचार्यैः इमां पुरीं नवं भव्यं रूपं प्रदाय सा वैभवपूर्णा कृता। हर्म्य-प्रासाद-अट्टालिकाभिः एषा पुरी समावृत्ता आसीत्। विविधरत्नैः अस्याः शोभां प्रवर्धयन् समस्तकामनाफलैवृक्षैः सा नगरी सुशोभिता आसीत्–

**हर्म्यप्रासादसम्बन्धा नानारत्नोपशोभिताम्।**
**सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभिताम् ॥**[1]

रावणस्य लङ्कापुर्यपि वास्तुशास्त्रस्य प्रवर्तकाचार्येषु मयेन निर्मिता। लक्ष्मणः अस्याः पुर्याः दर्शनं कुर्वन् अकथयत्– उन्नतशिखरयुक्तत्रिकूटपर्वतः विशालमेघमाला इव दृश्यते। यत्र बुद्धिमान् पराक्रमी हनुमान् रात्रौ प्रविष्टवान्।[2]

**4.** **प्रशासनिकगृहम्** – रामायणकाले प्रशासनिकगृहाणां निर्माणमपि वास्तुशास्त्रनिर्दिष्टानुसरम् आसीत्। वीरसैनिकेभ्यः अयोध्यानगर्यां कोशलराज्ये च सुव्यवस्थितनिवासव्यवस्था आसीत्। एतदुल्लिखन् महर्षिणा वाल्मीकिना कथितं यद् अयोध्यायाः वीरसैनिकाः स्वहस्तैः लक्ष्याणि अनायासेन भेदयन्ति स्म। सहस्रैः महारथिभिः एषा नगरी परिपूर्णा आसीत्। राज्ञा दशरथेनापि स्ववास्तुविशारदैः परामृश्य एतेषां वीरसैनिकानाम् आवासव्यवस्था सुनिर्धारिता।[3] रामायणकालीनकिष्किन्धायामपि प्रशासनिकभवनानां योजना दृश्यते स्म। सुग्रीवस्य राज्याभिषकसमये तस्य वास्तुकौशलस्य अभिव्यक्तिः प्राप्यते –

**इति रामाभ्यनुज्ञातः सुग्रीवो वानरर्षभः॥**
**प्रविवेश पुरीं रम्यां किष्किन्धां बालिपालिताम्।**[4]

उपर्युक्तविवरणेन स्पष्टं भवति यद् अस्मिन् काले गृहनिर्माणकलायां वास्तुशास्त्रनियमानाम् अनुपालनं क्रियते स्म। तत्र वास्तुशास्त्रेण अनुमोदितभूमौ जलाशय-नदी-भोजनादीनां व्यवस्थां दृष्टैव नानावर्गानाम् आवासस्थानानां कार्यं पूर्णरूपेण साधितम्। रावणस्य निवासभवनं लङ्कापुरीपर्वते स्थितम् आसीत्। लङ्कापुरीं परितः समुद्रः व्याप्तः। यः सुरक्षादृष्ट्या अत्यन्तम् उत्तम आसीत्। वस्तुतः रामायणकालीनगृहनिर्माणकला वास्तुशास्त्रस्य नियमानां सिद्धान्तानाञ्च अनुरूपा आसीदिति।

❖ ❖ ❖

1. किन्किन्धाकाण्डम्, 33.5
2. स लम्बशिखरे लम्बे लम्बतोयदसंनिभे। सत्वमास्थाय मेधावी हनुमान् मारुतात्मजः॥
   निशि लङ्कां महासत्वो विवेश कपिकुञ्जरः। रम्यकाननतोयाढ्यां पुरीं रावणपालिताम्॥ - सुन्दरकाण्डम्, 3.1-2
3. ये च बाणैर्न विध्यन्ति विविक्तमपरापरम्। शब्दवेध्यं च विततं लघुहस्ता विशारदाः॥
   सिंहव्याघ्रवराहाणां मत्तानां नदतां वने। हन्तारो निशितैः शस्त्रैर्बलाद् बाहुबलैरपि॥
   तादृशानां सहस्रैस्तामभिपूर्णां महारथैः। पुरीमावासयामास राजा दशरथस्तदा॥ - बालकाण्डम् – 5.20-22
4. किष्किन्धाकाण्डम्, 26.18-19

# आमेरदुर्गस्थ शिलादेवीमन्दिरस्य स्थापत्यकला

**– प्रियाकौशिकः**
**– डॉ. योगेन्द्र कुमार शर्मा**

भारतीयस्थापत्यम् भारतीयसंस्कृतिः परस्परमनयोश्चनयोः परस्परं गहनसम्बन्धो वर्तते। अस्माकं भारतीयसंस्कृतेः स्थापत्यस्य च पार्थिव-अपार्थिवयोः मेलनम् एव वैशिष्ट्यम्। मन्दिरनिर्माणसन्दर्भे शास्त्रेषु वर्णितम् अस्ति यत् मानवानाम् ऐश्वर्यार्थम्, नगरादीनां शृङ्गारार्थम्, जनानां भुक्ति-मुक्तिश्च प्राप्यर्थम्, सर्वविधं सत्यार्थम्, लोकानां धर्माचरणाय देवजनानां क्रीडायै सर्वेषां कीर्ति-आयु-यशश्चवृद्ध्यर्थम्, तथा च राज्ञा कल्याणाय देवालयानां निर्माणं भवतीति।[1]

मनुष्यस्य प्रत्येकं गतिविधिषु क्रियाकलापेषु च भौगोलिकपरिस्थितीनां प्रत्यक्षप्रभावो दृश्यते। यदि कस्यचित् स्थानविशेषस्य स्थापत्यकलायाः अध्ययनं क्रियते तर्हि तदर्थमेतस्य ज्ञानं करणीयं भवति यत् तत्स्थापत्यकला तत्क्षेत्रविशेषस्य तत्कालस्य परिस्थित्या इतिहासेन च कथं प्रभाविता? कस्यचित् स्थानविशेषस्य भौगोलिकसीमाः वयं निर्धारयितुं शक्नुवन्ति किन्तु सांस्कृतिके गमनागमने बाधां न जनयति। धार्मिकसहिष्णुताकारणाद् भारते स्थापत्यकलायाः उत्कृष्टरूपं दृश्यते। भौगोलिकविविधताकारणात् जनसामान्ये अनेकलोकदेवतानां देवीनां महत्त्वं वर्तते। तेष्वेकोऽस्ति राजस्थानप्रदेशः। पुराकालादेव राजस्थानस्य जनाः स्वश्रेष्ठता-शौर्यता-बलिदानप्रधानभावनाकारणात् विश्वं चमत्कृतमकुर्वन् सम्प्रत्यपि कुर्वन्ति च। विभिन्नसम्प्रदायानुयायिभिः अत्र वासः क्रियते।

धर्मः शाश्वतः अपरिवर्तनशीलः नित्यः सत्यश्च वर्तते, अतः धर्मः सनातनः। एषः न म्रियते, न वा लुप्यते। धर्माभावे मानवता नश्यति। हिन्दूधर्मस्य क्षेत्रम् अत्यन्तं व्यापकं वर्तते। एतद्धर्मस्य अनुयायिषु शाकाहारिणः मांसाहारिणश्च, आस्तिकाः नास्तिकाश्च, भक्तिमार्गपराः ज्ञानमार्गपराश्च, एकेश्वरवादिनः बहुदेववादिनश्च इत्येवं नानाविधमतानुयायिनः सम्मिलिताः। राजस्थाने स्थिते आमेरस्थलेऽपि हिन्दूधर्मस्य शैव-शाक्य-रामोपासकादयः समुदायाः प्रचलिताः। एतस्य ज्ञानमस्मभ्यम् आमेरे स्थितैः विभिन्नमन्दिरैः यथा अम्बिकेश्वमहादेवमन्दिरं, श्रीजगत्-शिरोमणिमन्दिरं, रामेश्वरमन्दिरं, कृष्ण-मीरामन्दिरं, श्रीलक्ष्मीनारायणमन्दिरं, श्रीनरसिंहदेवजीमन्दिरं, गल्ताजीमन्दिरं, ताडकेश्वरजीमन्दिरं, शिलामातामन्दिरञ्च इत्यादिभिः प्राप्यते। शाक्तसम्प्रदायस्य अत्र विशेषमहत्त्वम् आसीत्।

शक्तिम् इष्टदेवीं मत्वा ये पूजयन्ति तेषां सम्प्रदायः शाक्त इति कथ्यते। प्राचीनभारतीयदेवसमूहेषु देवैः सह देवीनामपि महत्त्वपूर्णं स्थानं वर्तते। वैष्णवशैवसम्प्रदायाभ्यां सह शाक्तसम्प्रदायः जनसामान्ये अत्यधिकप्रचलितः।

---

1. सुरालयो विभुत्यर्थं भूषणार्थं पुरस्य तु। नराणां भुक्तिमक्त्यर्थं सत्यार्थं चैव सर्वदा ||
लोकानां धर्महेतुश्च क्रीडाहेतुश्च स्वर्भुवाम्। कीर्तिरायुर्यशोऽर्थं च राज्ञां कल्याणकारकः || -प्रा०म०, प्रस्तावनायाम्, पृ०-१

शक्त्या सह बहूनि नामानि संयुक्तानि सन्ति – दुर्गा, काली, भवानी, चामुण्डा, रुद्राणी, लक्ष्मीः, सरस्वती इत्यादीनि।[1]

शैवधर्मस्य शाक्तधर्मेण सह विशिष्टः गहनः सम्बन्धः वर्तते। शैवमतेन सः शाक्तधर्मस्य प्राचीनताऽपि वर्तते। वैदिकसाहित्येऽदिति, उषा, सरस्वती, श्रीः, लक्ष्मीः इत्यादीनां विषये विस्तृतं ज्ञानं प्राप्यते।[2]

पुराणेषु विन्ध्यपर्वतः देव्याः निवासस्थानं कथितम्।[3] पुराणैस्सह महाभारतेऽपि देवीमाहात्म्यस्य विस्तृतं विवरणं प्राप्यते। महाभारतपर्यन्तं शाक्तसम्प्रदायः समाजे सम्यक् आधारं प्राप्तवान्। एवं शनैः शनैः शक्तिपूजायाः विस्तारः जातः, तेन सम्प्रदायरूपं प्राप्तम्। अयमेव सम्प्रदायः कालानुसारं शाक्तसम्प्रदायरूपेण प्रख्यातोऽभवत्।

राजस्थानेऽपि शक्तिः जनसामान्ये अनेकनामभिः प्रसिद्धा वर्तते– रूपण-दुर्गा-हिङ्गलाज-चामुण्डा-पीपलाद-कालिका-जोगणिया-शीतला-वीजासनादि। शक्त्याः स्थानीयग्रामाणाम् अथवा सामाजिकपरम्पराणाम् आधारे अनेकनामानि दत्तानि।[4] अत्र शिवपूजाऽनुरूपैव शक्तिपूजाऽपि प्राचीना भवति। आरम्भत एव राजस्थानं वीराणां भूमिः वर्तते। राजस्थानस्य अर्थो भवति – राजभिः शासितं क्षेत्रम्।[5] राजशासनकाले अतिलघुराज्ञानां पार्श्वेऽपि न्यूनातिन्यूनमेकः दुर्गः आवश्यकः आसीत्, यतः ते स्वपरिवारस्य राजकोषस्य प्रजायाश्च रक्षां कुर्वन्ति स्म। एतद्वीरैः शक्तेः उपासना क्रियते स्म।

राजस्थानस्य प्राचीनराजधानी जयपुरतः प्रायः ११ किलोमीटर उत्तरभागे आम्बेरनगरे स्थितमासीत् यस्य विस्तारः प्रायशः ४ वर्गकि.मी. यावत् वर्तते। प्राचीनकाले कच्छवाहराजपूतानां राजधानी आमेर आसीत्। इमां परितः अरावलिपर्वतशृङ्खला विद्यते।[6] आमेरदुर्गस्य प्रथमप्राङ्गणं जलेबचौक इत्युच्यते। अस्य दक्षिणभागे शिलादेवीमन्दिरं स्थापितमस्ति। जलेबचौक इत्यस्य दक्षिणहस्तं निकषा एव एतत्तीर्थस्थलं वर्तते। मातुः प्रतिमा शिलायाम् उत्कीर्णा इत्यतः एषा शिलादेवीनाम्ना प्रसिद्धा। इयं कालीमाता नाम्नाऽपि ज्ञायते। मूलतः एतद् अम्बाया एव स्वरूपम् अस्ति।

1. श्रीवास्तव, के.सी. प्राचीन भारत का इतिहास एवं संस्कृति, पृ. ८२९ - ८३०
2. ऋग्वेद, १०.१२५.३, पृ. ७५४
3. श्रीवास्तव, के.सी. प्राचीन भारत का इतिहास एवं संस्कृति, पृ. ८३०
4. सिंह, राजबहादुर, मन्दिर संस्कृति, पृ. २१६
5. गुप्ता, डा. मोहनलाल, राजस्थान के ऐतिहासिक दुर्ग
6. सिंह, रनबीर, Heritage of Rulers Amber, पृ. ३८

लोकमतानुसारेण अम्बामातरं समर्पितमन्दिरात् अस्य दुर्गस्य नाम अम्बेर इति जातं, यत्कालान्तरेण आम्बेर आमेर वा अभवत्। शिलादेवी कच्छवाहराजवंशस्य कुलदेवी आसीत्। राजस्थाने प्रचलितं वर्तते यत् –

**सांगानेर का सांगा बाबा जयपुर का हनुमान ।**

**आम्बेर की शिला देवी लायो राजा मान ॥**

बङ्गालमध्ये ढाकासमीपे स्थितस्य जैसोरस्य राजा विक्रमादित्यः स्वपुत्रं प्रतापादित्यं १५८७ ई. मध्ये मुगलानां शासनपद्धतेः ज्ञानं सङ्गृहीतुम् आगरानगरं प्रेषितवान्। प्रतापादित्यः आगरातः बङ्गालदेशं प्रत्यागच्छन् आसीत् तदा तन्मार्गे मथुरायां कृष्णवर्णीयामेकां शिलां दृष्टवान् यस्य विषये प्रचलितम् आसीत् यत् कंसद्वारा देवक्याः पुत्री अस्यामेव शिलायां प्रक्षिप्य कंसेन वध चेष्टा कृता किन्तु सा कंसहस्तात् निःसृत्य आकाशे गता। प्रतापादित्यः तां शिलां जैसोरम् आनीतवान्। तत्पश्चात् १६ शताब्द्यां मानसिंहप्रथमद्वारा जैसोरस्य नृपं केदारं युद्धे पराजित्य इयं शिला आम्बेरम् आनीता तथा च १६०४ ईसवीमध्ये एतत्कृष्णशिलायां देव्याः प्रतिमां निर्मीय, ताम् आमेरदुर्गे प्रतिष्ठापिता। एषा अनन्तरं शिलामातारूपेण विख्याता।[1]

एतदतिरिक्तं प्रासादाद्बहिः मुख्यद्वारे प्राप्तशिलालेखादपि किञ्चित् ज्ञानं प्राप्यते। अत्र अङ्कितं वर्तते यद् इमां मूर्तिं महाराजमानसिंहः १६ शताब्द्याः अन्तिमे बङ्गप्रदेशस्य पूर्वभागात् आनीतवान्। प्रतापादित्यस्य राज्ये राज्ञा केदारेण सह युद्धं कृत्वा यदा सः प्रथमवारम् असफलः जातः तदा तेन काल्याः उपासना कृता। कालीदेवी प्रसन्ना भूत्वा तं स्वप्ने विजयस्य वरदानं दत्तवती। तत्फलस्वरूपं समुद्रे शिलारूपेण पतिता एषा प्रतिमा महाराजेन आमेरम्

1. क. राजस्थान के ऐतिहासिक दुर्ग, गुप्ता, डा. मोहनलाल, अ. २४, कच्छवाहों के दुर्ग, पृ. २५७
   ख. सिंह, रनबीर, Heritage of the Rulers of Amber Jaipur City, ३१०-३, पृ.४६

आनीता तथा च सा शिलादेव्याः नाम्ना प्रसिद्धा जाता। केषाञ्चन मतानुसारं राज्ञा केदारेण युद्धे राज्ञः मानसिंहात् पराजयः अङ्गीकृतः। तदा केदारेण महाराजस्य मानसिंहस्य विवाहः स्वपुत्र्या सह कारितः तथा च उपहाररूपेण एषा मूर्तिः प्रदत्ता। जनसामान्ये एषा शिलादेवीनाम्ना ज्ञायते परन्तु बङ्गाली जनाः जैसोरेश्वरी इति नाम्ना पूज्यन्ते।

मानसिंहप्रथमः देव्याः महान् उपासकः आसीत्। जनश्रुतेः अनुसारं यदा कालीमाता महाराजं मानसिंहप्रथमं स्वप्ने दर्शनं दत्तवती तदा तं नरबलिं प्रदानाय कथितवती देव्याः प्रतिमास्थापनात् परं नरबलिः देव्यै समर्प्यते स्म। पश्चात् सवाई जयसिंहद्वितीयेन नरबलिस्थाने अजबलिः दत्ता।[1] चैत्र (मार्च)-अश्विन (अक्टूबर) मासयोः नवरात्रेः अष्टम्यां बलिदानं दीयते स्म, यदधुना स्थगितं वर्तते।[2] अस्मिन् मन्दिरे न केवलं जयपुरस्य अपितु देश-विदेशात् भक्ताः समागच्छन्ति। भक्तजना अजबलिना सह मद्यमपि देवीं समर्पयन्ति, तदनन्तरं तत्प्रसादरूपेण स्वीकुर्वन्ति।

शिलामातुः दर्शनम् अत्यन्तं मनोहरं भवति। शिलादेव्या सह गर्भगृह एव श्रीगणेशः विराजते, दक्षिणभागे हिङ्गलाजमाता वर्तते। मन्दिरे कार्यरतस्य राजपुरोहितस्य मतानुसारं शिलारूपे उपस्थितायाः हिङ्गलाजमातुः प्रतिमा, एकपञ्चाशत्सिद्धशक्तिपीठेषु अन्यतमस्य बलूचिस्ताने पाकिस्ताने स्थितस्य शक्तिपीठस्य देव्याः पिण्डरूपस्यैव स्वरूपमस्ति।

शिलादेवीमन्दिरं प्राचीनभारतीयशिल्पशास्त्रस्य विविधसिद्धान्तानाम् आधारेण उत्तरभारतस्य नागरशैल्यां निर्मितम् अस्ति। नागरशैली आर्यशैल्याः परिवर्धितं रूपं वर्तते।[3] नागरशैल्याः नामकरणस्य श्रेयः नागेभ्यः दीयते।[4] यदा आर्यानाम् इष्टिकाकाठयोः वास्तुकला नागानां प्रस्तरकलाम् अवलम्बिता सा नागरशैलीरूपेण प्रसिद्धा जाता। नागरशैलीमन्दिराणि वर्गाकाराणि भवन्ति। वर्गाकारगर्भगृहस्य निर्माणम् उन्नतमीनारसदृशं भवति। पर्सी ब्राउनमतानुसारं नागरशेली एव उत्तरभारतीया आर्यशैली (North Indian Aryan style) वर्तते।[5] शास्त्रेषु नागरशैल्याः मन्दिराणां मुख्यरूपेण विंशतिः प्रकाराः कथिताः सन्ति – मेरुः, मन्दरः, कैलासः, कुम्भः, मृगराजः, गजः, विमानछन्दः, चतुरस्त्रम्, अष्टास्त्रं, षोडषास्त्रं, वर्तुलं, सर्वतोभद्रकं, सिंहः, नन्दनः, नन्दिवर्धनः, हंसकः, वृषः, गरुडः, पद्मकः, समुद्रश्च।[6]

1. सिंह, रनबीर, Heritage of the Rulers of Amber Jaipur City, ३१०-3, पृ.४७
2. सिंह, रनबीर, Heritage of the Rulers of Amber Jaipur City, ch-३, पृ.४७
3. उमाशंकर, राजस्थान के मंदिरो का वास्तुशास्त्रीय अध्ययन, अ. ३, पृ.७३
4. जायसवाल, के.पी.- एन् इम्पीरियल हिस्ट्री ऑफ इण्डिया, पृ. ७२
5. ब्राउन, पर्सी, इण्डियन आर्किटेक्चर, पृ. ११३
6. समराङ्गणसूत्रधारः, अ. ६३.७-८

**शिलादेवीमन्दिरस्य प्रवेशद्वारम् -**

शिलादेवीमन्दिरनिर्माणाय श्वेतरक्तयोः वर्णयोः पाषाणानां प्रयोगः कृतः। जलेक चौक इत्यतः मन्दिरप्राङ्गणं यावत् सोपानानि न सन्ति, तत्र चतुर्दशपदात्मकः आरोहो वर्तते।

**पुरद्वारं तु गोपुरम्।**[1]

गोपुरस्यार्थः द्वारम्। जगत्याः चत्वरात् मन्दिरप्रवेशस्य एतदेव मुख्यं द्वारं भवति तथा च एतत्पुरतः सोपानानि निर्मितानि सन्ति। मुख्यद्वारम् अलङ्कृतदेहलिसहितं, तोरणसहितं वा भवति। प्रवेशद्वारं चतुष्किकायाम् अथवा अर्द्धमण्डपे उद्घाटितं भवति। शिलादेवीमन्दिरे चतुर्दशपदीतः प्राङ्गणे प्राप्यते, यत्र मन्दिरस्य प्रवेशद्वारं वर्तते। अस्य प्रवेशद्वारस्य उपरिभागे श्रीगणेशः विराजते। मुख्यद्वारं काष्टनिर्मितम् अस्ति, यत् सवाई मानसिंहेन तथा तस्य प्रथमद्वितीयपत्नीभ्यां च रजतलेपितं कारितम्। तस्मिन् रजतावरणे चित्रितकलाकृतौ देव्याः विभिन्नस्वरूपाणि दर्शितानि। वामभागे द्वारे क्रमशः निम्नदेवीनां चित्राणि सन्ति- १.श्रीकाली, २.श्रीतारा, ३.श्रीषोडशी, ४.श्रीकमला, ५. श्रीमातङ्गी, ६. श्रीभुवनेश्वरी, ७. श्रीबगलामुखी, ८.श्रीधूमावती, ९. श्रीत्रिपुरभैरवी, १०.श्रीछिन्नमस्ता च।

द्वारस्य दक्षिणभागे चित्रितानि देवीचित्राणि –

१. श्रीशैलपुत्री, २.श्रीब्रह्मचारिणी,
३. श्रीसिद्धिदात्री, ४. श्रीचन्द्रघण्टा,
५. श्रीकुष्माण्डा, ६.श्रीस्कन्दमाता,
७. श्रीमहागौरी, ८. श्रीकालरात्रिः,
९. श्रीकात्यायिनी, १०. सिंहः च।

मुख्यद्वारं धनुषाकारं वर्तते। एतत् तोरणेन अलङ्कृतम् अस्ति। अत्र भारतीयमुगलवास्तुशैल्याः तक्षणस्य उदाहरणानि दृश्यन्ते। यद् वृत्ताकारं पुष्पं वर्तते तद् भारतीयशैल्याः तथा च या पुष्पद्रोणी चित्रिता सा मुगलकालीना प्रतीयते। द्वारे मध्यभागे रक्तवर्णीया श्रीगणेशस्य चतुर्भुजप्रतिमा अस्ति, अस्य वामभागो वक्रो वर्तते। अस्य मन्दिरस्य मुख्यद्वारं नैर्ऋत्यकोणे (दक्षिण-पश्चिम) अस्ति।

**गर्भगृहम् –**

प्रासादनिर्माणे सर्वाधिकमहत्त्वपूर्णं स्थानं प्रतिमायाः वर्तते, यस्याः स्थापना गर्भगृहे क्रियते। गर्भगृहं भागत्रयात् पिहितं भवति तथा च एकस्मिन् भागे द्वारं भवति। अधिकांशतया गर्भगृहे प्रकाशस्य अभावो भवति।

1. शुक्ल द्विजेन्द्रनाथ, भारतीय स्थापत्य, पृ.३४१

एतत्कक्षस्य मध्यभागे वेदिकायां प्रतिमा स्थाप्यते, यस्याः पुरतः गर्भगृहस्य द्वारं भवति। गर्भगृहस्य ऊर्ध्वं छत्रभागेऽलङ्करणमपि क्रियते। मन्दिरस्य मुख्यशिखरमपि गर्भगृहे निर्मीयते। गर्भगृहस्य प्रवेशद्वारस्य समक्षे अन्यमण्डपानां निर्माणं क्रियते।[1] शिलादेवीमन्दिरे शिलायां महिषासुरमर्दिन्याः आकृतिः उत्कीर्णा अस्ति। गर्भगृहेऽपि अस्मिन् एव रूपे माता पूज्यते। गर्भगृहं भागत्रयात् पिहितं भवति तथा च एकस्मिन् भागे देव्याः सम्मुखे द्वारं निर्मितम् अस्ति। गर्भगृहसंज्ञकस्य अस्य कक्षस्य मध्यभागे प्रायः १ फीट् मितायां उच्चवेदिकायां देव्याः प्रायः ५ फीट् मिता उन्नता प्रतिमा स्थापिता वर्तते।

भारते प्रतिमापूजायाः प्रचलनं अतिप्राचीनकालादेव प्राप्यते। भारतीयप्रतिमाणां वर्गीकरणं त्रिविधं कृतं वर्तते – ब्राह्मणप्रतिमा, बौद्धप्रतिमा[2], जैनप्रतिमा च। ब्राह्मणप्रतिमाः गोपीनाथरावद्वारा एवमेव वर्गीकृताः – १. चलप्रतिमा २. अचलप्रतिमा, ३. पूर्णप्रतिमा ४. अपूर्णप्रतिमा, ५. शान्तप्रतिमा ६. अशान्तप्रतिमा च।[3] चलप्रतिमाः अचलप्रतिमातः लघु भवन्ति। चलप्रतिमाणां निर्माणे भाररहितद्रव्याणां यथा स्वर्ण-रजत-ताम्रादीनां प्रयोगः क्रियते। अचलप्रतिमाः विशालाकाराः भवन्ति, यासां निर्माणे प्राय: पाषाणस्य प्रयोगो भवति। चलप्रतिमाऽचलप्रतिमयोः पुनः भेदः प्राप्यते।[4]

**चलप्रतिमाः –**

1. कोतुकवेर – एताः प्रतिमाः पूजायाम् उपयुज्यन्ते।
2. उत्सववेर – एतासां प्रयोगः उत्सवार्थम् अर्थात् पर्वविशेषे बहिः नेतुम्।
3. बलिवेर – एताः प्रतिमाः दैनिक-उपधारात्मकपूजायाम् उपहारार्थं प्रयुज्यन्ते।
4. स्नपनवेर – एताः प्रतिमाः प्रतिदिनं भोगार्थं स्नानार्थं च प्रयुज्यन्ते।

**अचलप्रतिमाः** – गर्भगृहे स्थापिताः प्रतिमाः सदैव यथास्थानं प्रतिष्ठिताः भवन्ति। एतासां भेदः निम्नप्रकारेण वर्तते –

1. स्थानकम् – एषा प्रतिमा मूलतः स्थितावस्थायां भवति।
2. आसन – एताः प्रतिमाः उपविष्टाः भवन्ति।
3. शयन – एताः विश्रामं कुर्वत्यः प्रतिमाः भवन्ति।[5]

---

1. वशिष्ट, नीलिमा – स्कल्पचर ट्रेडिशन ऑफ राजस्थान, पृ.१२६
2. शुक्ल, द्विजेन्द्रनाथ, भारतीय वास्तुकला, पृ.१९४
3. टी.ए. गोपीनाथ राव- एलिमेन्ट्स ऑफ हिन्दू आईकॉनोग्राफी, पृ. १७
4. शुक्ल, द्विजेन्द्रनाथ, भारतीय वास्तुकला, पृ. १९५
5. टी. ए. गोपीनाथ राव- एलिमेन्ट्स ऑफ हिन्दू आईकॉनोग्राफी, पृ. १७

शिलादेवीमन्दिरे चलप्रतिमा काचिद्भग्न वर्तते। अत्र अचलस्थानकप्रतिमा प्राप्यते या श्यामवर्णपाषाणे उत्कीर्णा अस्ति। सामान्यरूपेण इयं मूर्तिः तस्याः वाहन-आयुध-मुद्रा-अलङ्करण-भुजासङ्ख्याभिः ज्ञायते।[1] यस्मिन् वस्तुनि वाहने वा काञ्चिद् आकृतिम् उपविष्टां दृश्यते, ताम् आसनवस्तु कथ्यते। भारतीयमूर्तयः पीठ-सिंहासन-कट-गज-मृगासने अथवा व्याघ्र-चर्म-कमल-शिक्षा-पद्मपत्र-सुमेरु-पशु (गज-सिंह-अश्व-वृषभ-महिष-मृग-मेष-वराह-गर्दभ-शार्दुलादिनां) आसने पक्षी (मयूर-हंस-उल्लूक-गरुडादिनां) आसने जलचर (मकर-मीन-कच्छपादिनां) आसने वा स्थिताः प्रकल्प्यन्ते।[2] शिलादेवी महिषासुरमर्दिन्याः रूपे स्थापिता वर्तते, अतः देव्याः आसनवस्तु सिंहः अस्ति, परन्तु वेषेण पुष्पादिभिः आवरणितेन च सिंहः न दृश्यते।

प्रतिमायाः गुणं शक्तिं वा प्रदर्शयितुं तासां हस्तानाम् उपयोगः क्रियते, तथा च हस्तानां सङ्ख्यायामपि वृद्धिः कृता। एतद्धस्तेषु यानि वस्तूनि दर्शयन्ति, तानि कस्याश्चित् शक्तेः, क्रियायाः गुणस्य वा प्रतीकानि भवन्ति। शिल्पशास्त्रग्रन्थानुसारं देवतानां ३६ आयुधानि भवन्ति–चक्र-त्रिशूल-वज्र-धनुष-कृपाण-गदा-अङ्कुश-बाण-छुरिका-दण्ड-शक्ति-मुसल-परशु-कुन्त-रिष्टिका-खट्वाङ्ग-मुशुण्डी-कर्तिका-कपाल-सूची-खेट-पाश-बन्धन-सर्प-हल-मुद्गर-शङ्ख-शृङ्ग-घण्टा-शत्रुशिर-माला-पुस्तक-कमण्डल-कमल-पर्ण-योगमुद्राः।[3]

शिलामातुः अष्टभुजप्रतिमा गर्भगृहे प्रतिष्ठिता वर्तते। एतस्याः केवलं द्वयोः भुजयोः एव दर्शनं प्राप्यते, अन्यभुजाः पुष्पमालायाः अधः आच्छादिताः भवन्ति। शिलादेव्याः दक्षिणहस्तस्य उपरिस्तात् अधः क्रमशः खड्ग-तीर-त्रिशूल-चक्राणि तथा च वामभागे हस्ते क्रमशः खड्गराट्-धनु-अभयमुद्रा-मुण्डानि सन्ति।

मूर्तयः आसन-शयन-स्थानकाः इति त्रिविधाः भवन्ति। तेषुस्थानकप्रतिमायाः मुख्यमुद्राः भवन्ति –

1. समपाद – यत्र प्रतिमा समपादे स्थिता वर्तते।
2. अभङ्गः – यत्र प्रतिमा निर्बन्धं स्थिता वर्तते।
3. त्रिभङ्गः – यस्यां प्रतिमायां शिर-कटि-पादेषु वक्रता भवेत्।
4. अतिभङ्गः – यस्यां प्रतिमायां शरीरे वक्रता भवेत्।

1. अग्रवाल, गिर्राज, किशोर – भारतीय मूर्तिकला, पृ. ८८
2. अग्रवाल, गिर्राज, किशोर – भारतीय मूर्तिकला, पृ. ८८
3. शुक्ल, द्विजेन्द्रनाथ, भारतीय वास्तुकला, पृ. २३२

**हस्तमुद्राः –**

1. अभय – प्रतिमायाः दक्षिणहस्तः उद्घाटितः उत्थापितः च भवेत्।
2. वरद – प्रतिमायाः दक्षिणहस्त अधः उद्घाटितः च स्यात्।
3. ध्यान मुद्रा – प्रतिमायाः हस्तौ अङ्के स्थापितौ भवेताम्।
4. ज्ञानमुद्रा – उत्थापिते दक्षिणे हस्ते तर्जनी अङ्गुष्ठा च मिलितौ भवतः।

शिलादेव्याः स्थानकप्रतिमा अभङ्गा वर्तते। देवीप्रतिमायाः मुखं वामभागे अवनतम्, एतत्सम्बन्धे नैकाः कथाः प्रचलिताः सन्ति यासु काश्चन एवं सन्ति –

मानसिंहप्रतापादित्ययोः मध्ये युद्धम् अभवत्। प्रतापादित्येन यदा स्वविजयाय देव्याः स्तुतिः कृता तदा सा विमुखा जाता। तदारभ्य देव्याः मुखं वक्रं जातम्। अन्यकथानुसारं शिलादेव्यै मानसिंहद्वारा नरबलिः दीयते स्म परन्तु किञ्चित्कालात्परं नरबलिस्थाने महिषबलिः दत्ता इत्यतः देवी विमुखा जाता। स्वप्ने यदा राजा एतत् ज्ञातवान् तदा सः अजबलिदानम् आरब्धवान्।[1]

वैज्ञानिकपक्षानुसारं यदा कस्मिन् स्वहस्तप्रहारः क्रियते तदा सामान्यतः अस्माकं ग्रीवा एकतः नता भवति। देव्याः स्वरूपमपि महिषासुरमर्दिनी इत्यस्ति, अर्थात् महिषासुरस्य मर्दनं कुर्वन्ती असुरे प्रहारकाले हस्ते बलं दीयते, तस्मादेव तस्याः ग्रीवा एकत्र नता वर्तते। धार्मिकदृष्ट्या पश्यामश्चेत् भक्ते अनुग्रहकृपादृष्टिवशादपि देव्याः मुखं वामभागे नतमिति प्रतीयते।[2] अल्बर्ट हॉल म्यूजियम, जयपुरे द्वितीयशताब्द्याः मूर्तिः प्राप्ता अस्ति, या महिषासुरमर्दिन्याः वर्तते। अस्याः मुखं वामभागे नतम् अस्ति।

मूर्तेः उपरिभागे शिरसः उपरि वामतः दक्षिणं यावत् क्रमशः स्ववाहनेषु आरुढाणां श्रीगणेश-ब्रह्मा-शिव-विष्णु-सरस्वतीनां सुन्दरलघुमूर्तयः उत्कीर्णाः। शताधिकवर्षप्राचीनायाम् उत्कीर्णाः देवताः तथा च तेषाम् आयुधानि धूसरितानि जातानि अतः तत्परिचये भ्रमः उत्पद्यते। देव्याः आयुधानि मुकुटञ्च रजतेन निर्मितम् अस्ति। अत्र देव्याः चरणयोः उभयतः सिंहाः विराजमानाः सन्ति। परन्तु वामतः दक्षिणे स्ववाहनेषु आरूढाणां श्रीगणेश-ब्रह्म-शिव-विष्णु-कार्तिकेयानां सुन्दरलघुप्रतिमाः प्रतीयन्ते। "प्रासादमण्डपानुसारं" गर्भगृहं चतुष्कोणं चतुर्भुजं निर्मातव्यम्, तस्मिन् भद्र-सुभद्र-प्रतिभद्रादीनां भूछेदनिर्माणं शुभं भवतीति, दीर्घचतुर्भुजं गर्भगृहं दोषकारकं भवति। शिलामातामन्दिरस्य गर्भगृहं दीर्घचतुर्भुजं वर्तते परन्तु दारुणादि तथा बलभी (स्त्रीलिङ्ग) जातीनां प्रासादे गर्भगृहं दीर्घं भवति चेत् दोषः न।[3] अतः शिलादेवीमन्दिरमेतद् दोषात् मुक्तं वर्तते।

गर्भगृहस्य द्वारस्य चत्वारः भागाः भवन्ति- देहली अथवा उदुम्बरम्, द्वौ पार्श्वस्तम्भौ तथा च उत्तरङ्गमथवा शिरदलम्, एतेषां चतुर्णां भागानाम् अनेकप्रकारैः अलङ्करणं क्रियते। शिलादेवीमन्दिरस्य गर्भगृहस्य द्वारं काष्ठेन निर्मितम्। देहली अलङ्कृता अस्ति, यस्यां कमलपत्रस्य आकारः दृश्यते।

1. द्विवेदी, पण्डित गङ्गाधर, दुर्गा सप्तशती, पृ.२५
2. द्विवेदी, पण्डित गङ्गाधर, दुर्गा सप्तशती, पृ.२५
3. प्रासादमण्डन, अ.३. प.३३-३४, पृ.५६-५७

पार्श्वस्तम्भेषु सुन्दरचित्रकला उत्कीर्णा वर्तते तथा च उत्तरङ्गे तक्षणं कृतं वर्तते। उत्तरङ्गस्य मध्यभागे कमलपुष्पं वर्तते। गर्भगृहस्य प्रवेशद्वारस्य उभयतः प्राचीरे कदलीफलपादपानाम् आकृतयः सन्ति। उत्तरङ्गस्य उपरिभागे कृता सुन्दरकलाकृतिः भारतीयमुगलशैल्यां कृतेति प्रतीयते। यत्र कदलीफलेन सह विशालपत्राणि द्वारस्य शोभां वर्धयन्ति। गर्भगृहस्य द्वारं काष्ठेन निर्मितं वर्तते। यत्र कासस्य आवरणं वर्तते। अस्मिन् जालमयं नक्षत्रचित्राणि उत्कीर्णानि सन्ति।

गर्भगृहे प्रतिष्ठितायाः शिलादेव्याः वामभागे श्रीगणेशः तथा दक्षिणभागे हिङ्गलाजमाता च वर्तते। तत्र नियुक्तराजपुरोहितमतानुसारं हिङ्गलाजमाता भर्तुः रक्षणकर्त्री इत्येवं स्त्रीभिः पूजिता। मातुः प्रतिमा अष्टधातुभिः निर्मिता। एषा चतुर्भुजा प्रतिमा, यस्याः हस्ताः आयुधरहिताः वर्तन्ते। एषा वरदप्रतिमा। अस्याः स्थानक-अचलप्रतिमायाः वाहनम् आसनं वा वस्तुभिः देवीधृतवस्त्रैः न ज्ञायते। एषा प्रतिमा प्रायः १ फीट् उन्नतवेदिकां प्रतिष्ठिता वर्तते। अस्या प्रतिमायाः औच्च्यं प्रायशः २.५ फीट् भवेत्।

वामभागे प्रतिष्ठिता श्रीगणेशस्य प्रतिमा प्रायः २ फीट् उन्नता अस्ति, या अन्यप्रतिमादृशा समोच्चवेदिकायां स्थापिता। श्रीगणेशमूर्तिः श्वेतचारुप्रस्तरेण (Marble) निर्मिता, रक्तवर्णेन अलङ्कृता च वर्तते। श्रीगणेशस्य शुण्डः वामभागे वर्तते। गर्भगृहे श्रीगणेशस्य हिङ्गलाजमातुश्च प्रतिमा पृथक्-पृथक् वेदिकायां प्रतिष्ठिता वर्तते। गर्भगृहे द्वारमेकमेव वर्तते, तथा अन्यवातायनादिकं नास्तीत्यतः महामण्डपात् साक्षात् श्रीगणेशस्य हिङ्गलाजमातुः वा दर्शनं न भवति।

**अन्तरालम् –**

यस्मिन् कक्षे गर्भगृहस्य द्वारम् उद्घाट्यते, सः कक्षः अन्तराल इति कथ्यते। यदि मन्दिरे प्रदक्षिणापथः भवति तर्हि तस्य प्रवेशः निष्क्रमञ्च अन्तराले उद्घाट्यते। एतत्पुरतः महामण्डपं भवति, यस्य स्तम्भाः एतत् महामण्डपात् पृथक् कुर्वन्ति। अन्तरालस्य विस्तारः महामण्डपस्य विस्तारात् न्यूनः तथा अस्य दीर्घता महामण्डपसदृशा अथवा ततः न्यूना अधिका वा भवितुम् अर्हति।[1] अस्मिन् मन्दिरे अन्तरालस्य अभावः वर्तते, परन्तु लोहनिर्मितयवनिकयाः गर्भगृहमहामण्डपे पृथक् क्रियते। गर्भगृहे दर्शनार्थिनां प्रवेशः वर्जितः तथा लोहनिर्मित जालाद् बहिः स्थित्वैव भक्ताः भगवत्याः दर्शनं प्राप्नुवन्ति। एतस्यैव लोहदण्डपूत्याः पुरोहिताः देव्यै नैवेद्यं समर्प्य भक्तान् प्रसादं यच्छन्ति। अन्तरालस्य विस्तारः महामण्डपस्य अपेक्षया न्यूनः वर्तते तथा दीर्घता समाना अस्ति।

**महामण्डपम् –**

अन्तरालस्य अग्रिमभागः महामण्डपमिति उच्यते। दार्घतायां विस्तारतायां च अयं प्रासादस्य अतिबृहत्

1. चतुर्वेदी, श्रीनारायण – नागर शेली के नए हिन्दू मन्दिर, पृ. १७

कक्षः भवति। एतदनेकस्तम्भेषु आधारितं वर्तते। अस्य दक्षिणवामयोः भित्तिषु क्वचित्क्वचित् द्वाराणि निर्मीयन्ते। यत्र द्वाराणि न सन्ति तत्र गवाक्षाः निर्मीयन्ते, यतः महामण्डपे पर्याप्तप्रकाशः पतति। महामण्डपं पर्याप्तम् उन्नतं भवति। एतस्य वितानं सामान्यतः वृत्ताकारम् अथवा वर्गाकारं वर्तते। उद्गतं यदा भवति तदा वृत्ताकारं भवतीति। अस्मिन् विताने सामान्यतः कलापूर्णं तक्षणं क्रियते। अस्य मन्दिरस्य महामण्डपम् अत्यन्तं मनोहरं वर्तते, यत् शुक्लचारुप्रस्तरेण निर्मितं अस्ति। अस्मिन् दक्षिणे वामे च द्वे द्वारेस्तः, एकस्मात् द्वारात् मन्दिरकार्यालयः वर्तते तथा च अन्यद्वारात् पार्श्ववीथी गम्यते, यत् सोपानपर्यन्तं गच्छति। एतस्य प्रयोगः भक्तजनानां कृते वर्जितः। गर्भगृहद्वारस्य पुरतः महामण्डपे एकं द्वारं वर्तते यतः सोपानभ्य अधः अवतीर्य एकस्मिन् अन्धकारे कक्षे गन्तुं शक्नुमः विभिन्नावसरेषु मन्दिरे यज्ञः अनुष्ठीयते। महामण्डपस्य दक्षिणे वामे च भागे कमलवाहिनी अष्टादशभुजदेव्याः तथा दशभुजदेव्याः काल्याः चित्रम् अङ्कितं वर्तते। एतन्मन्दिरस्य महामण्डपे वितानस्य अभावो वर्तते। महामण्डपम् उपरिस्तात् रिक्तं वर्तते, तत्रः स्पष्टम् आकाशः दृश्यते।

**अर्द्धमण्डपम् –**

एतत् महामण्डपस्य पुरतः स्थितम् अस्ति तथा च अस्मात् लघु भवति। अस्मिन्नपि लघु वितानं वर्तते, तदुपरि शिखरमपि भवति। अतिबृहन्मन्दिरेषु नृत्य-मण्डपं, रङ्ग-मण्डपम् इत्यादीनि मण्डपानि अपि निर्मीयन्ते।[1] वस्तुतः अस्मिन् मन्दिरे अर्द्धमण्डपं न लभ्यते, परन्तु महामण्डपं प्रवेशद्वारेण सह यत्र योजयति तत्र पार्श्ववीथीम् अथवा लघुकक्षान् अर्द्धमण्डपस्य उपाधिः दीयते। एतत् स्तम्भैः महामण्डपात् पृथक् दृश्यते। अत्र वृत्ताकारं वितानं वर्तते।

समेषां मण्डपानां गरिमा तथा गवाक्षाणां सौन्दर्यं स्तम्भवशाद् भवति। स्तम्भभागेषु आधारस्थाने कुम्भिका ततः स्तम्भः, भरणी, शीर्षम्, उच्छालकं च भवन्ति। स्तम्भस्य यद् आसनं भवति यत्र स्तम्भः तिष्ठति तत् कुम्भिका इत्युच्यते। तदुपरिभागः स्तम्भ इति कथ्यते। अयं स्तम्भः चतुराकारः, षट्कोणीयः, अष्टकोणीय अथवा गोलाकारश्चापि भवितुम् अर्हति। स्तम्भस्य ऊर्ध्वशिरः भरणी कथ्यते, यस्याः अधोभागः आमलकं तथा च ऊर्ध्वभागः पद्मम् इति कथितः। भरणी स्तम्भात् किञ्चित् बृहद् सन्ति। भरण्याः ऊर्ध्वं तच्छीर्षं भवति। एतच्चतुर्भागात् स्तम्भाद् अग्रे गतं भवति। तत्र कलश-देवी-देवातानां मूर्तयः उत्कीर्णाः भवन्ति। स्तम्भः सामान्यतः शीर्षे समाप्तिं याति, किन्तु यत्र तद् अधिकम् उन्नतं कर्तव्यं भवति, तत्र तस्य शीर्षे अन्यस्तम्भः योज्यते, यः मुख्यस्तम्भात् प्रायः 1 विस्तारं यावत् दीर्घः भवति। एतस्मिन्नपि शीर्षं वर्तते।[2]

1. चतुर्वेदी, श्रीनारायण – नागर शेली के नए हिन्दू मन्दिर, पृ. १७
2. चतुर्वेदी, श्रीनारायण – नागर शेली के नए हिन्दू मन्दिर, पृ. २१-२२



अस्मिन् मन्दिरे प्रायः २८ स्तम्भाः निर्मिताः सन्ति। सम्पूर्णप्रासादः चारुप्रस्तरेण निर्मितः। अस्य स्तम्भाः अतीव आकर्षकाः सन्ति। कुम्भिकायां सुन्दरचित्रकला उत्कीर्णा अस्ति। वृत्ताकारस्तम्भे वृत्ताकारपुष्पाणि निर्मितानि सन्ति। भरण्यां कुम्भिकावदेव तक्षणं वर्तते। शीर्षे देवी-देवतानां मूर्तिः उत्कीर्णा नास्ति, परन्तु धनुषाकारः उत्तरङ्गः वर्तते, यत्र वृत्ताकाराणि अष्टदलकमलानि तथा वृषभ-पुष्पादीनां चित्राणि उत्कीर्णानि सन्ति। महामण्डपस्य सौन्दर्यं अतीवमनोहरं वर्तते।

**शिखरम् –**

मन्दिरे शिखरस्य अभावः वर्तते, यथा वयमन्यप्रासादेषु पश्यामः। अत्र गर्भगृहे यस्मिन् स्थले देवी प्रतिष्ठिता, तदुपरि एव प्रथमतले एकं निर्माणम् अस्ति। एतन्निर्माणस्य मुख्यं कारणमिदं सम्भवति यद् देव्याः प्रतिमायाः ऊर्ध्वभागे किमपि गमनागमनं न स्यात्। सम्भवतः आमेरदुर्गवदेव अस्मिन् प्रासादे विभिन्नकाले नवनिर्माणकार्याणि कृतानि स्युः, यतः एताः विभिन्नताः दृश्यन्ते। राजामानसिंहप्रथमद्वारा मूर्तिप्रतिष्ठा कृता। तथा सवाईमानसिंहद्वितीयेन तथा तस्य भार्याभ्याम् अस्य प्रासादस्य सौन्दर्यीकरणं कृतं, यत्र तक्षणयुतचारुप्रस्तरः, रजतलेपितद्वाराणि, अन्यपूजासंबन्धिवस्तूनि सन्ति।[1]

मन्दिरनिर्माणकलाकार्ये राजस्थानस्य स्थानम् अग्रे वर्तते। समयस्य परिस्थितेः कारणात् राजस्थानीकलायाः स्वरूपेषु परिवर्तनं दृश्यते। प्रासादः आमेरदुर्गे स्थितः वर्तते। राजभवनेषु देवालयानां निर्माणविषये विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे लिखितमस्ति यत् विजयप्राप्त्यर्थं सन्तानप्राप्त्यर्थं च राजप्रासादेषु विशेषरूपेण वायव्यकोणे ईशान्यकोणे च कुलदेवतामन्दिरस्य निर्माणं कर्तव्यम्।[2] शिलादेवीमन्दिरे वयमेतस्य अभावं पश्यामः।

एते देवालयाः प्राचीरसहिताः निर्मातव्याः तथा च पूर्वाभिमुखाः पश्चिमाभिमुखाः च निर्मातव्या इति विधानम्। एतत्समीपे शालानिर्माणं कर्तव्यं तथा च गोपुरनिर्माणमपि।[3] देव्याः एतन्मन्दिरं प्राचीरयुतमस्ति। प्रवेशद्वारस्य दक्षिणभागे शालाः निर्मिताः, याः वर्तमानकाले कार्यालयाय अथवा पुरोहितावासाय प्रयुज्यन्ते। प्रासादे देवतालक्षणानुसारमेव छत्र-खड्गादिचिह्नानि निर्मितानि स्युः।[4]

---

1. चतुर्वेदी, श्रीनारायण – नागर शेली के नए हिन्दू मन्दिर, पृ. २१-२२
2. भूपहर्म्यस्य वायव्यामैशान्यां वा विशेषतः। कुलदेवाय स्थाप्यो जनसन्तानसिद्धये॥
3. प्राकारसंयुतः प्रायः पूर्व-पश्चिमवक्त्रकः। पार्श्वशालासमायुक्तो गोपुरेव च भासुरः॥ वि. वा. अ. ३५-३६, श्लो.३.
4. खड्गवेदी पुरः स्थाप्या यदि कालीवेशनम्। तत्पुरः सा प्रकर्तव्या शान्तिकुम्भसमन्विता॥ वि.वा. अ. ३५-३६, श्लो.६

एवं कथ्यते यत् पूर्वमेषा प्रतिमा पूर्वाभिमुखी प्रतिष्ठिता आसीत्। यदा महाराजेन सवाई जयसिंहेन जयपुरनगरस्य स्थापनायाः परं निर्माणकार्ये व्यवधानं जातं यतोहि एतद्भागे शिलामातुः वक्रा दृष्टिः अपतत्, तदा जयपुरस्य तन्त्रशास्त्रज्ञैः सवाईजयसिंहं परामर्शः दत्तः यत् शिलामातुः उत्तराभिमुखं प्रतिष्ठाकरणेनैव जयपुरनगरस्य निर्माणं सम्भवति। तदा सवाईजयसिंहद्वारा प्रतिमा वर्तमानगर्भगृहे उत्तराभिमुखं प्रतिष्ठापिता।[1] महाकाल्याः देवालयस्य पुरोभागे खड्गवेदी स्थापनीया तथा कालीदेवी शान्तिकुम्भसहिता निर्मातव्या।[2] देवीमन्दिरे स्वर्णनिर्मिते द्वे द्वारे भवेतां तथा तयोर्मध्ये उदुम्बर (देहली) तलस्य रचना भवेत्। एवमेव देवीसम्मुखं होमकुण्डरचना अर्थात् साक्षीवेदीनिर्माणं कर्तव्यं, यत्र राज्ञेन धर्मस्य रक्षणाय मङ्गलकामना भवेत्।[3] गर्भगृहसमक्षे यः कक्षः निर्मितः, सः साक्षिवेदीयुतः भवति। अत्र नृपादिभिः धर्मस्य मङ्गलकामनायै यज्ञादिकं क्रियते। वर्तमानकाले अस्य प्रयोगः यजने नवरात्रेषु कलशस्थापनार्थं क्रियते।

विश्वकर्मप्रकाशे शिखररचनाविधानं कृतम्,[4] परन्तु अत्र शिखरतुल्या आकृतिः न दर्शिता भवति तथा च गर्भगृहे तलद्वयं निर्मितम्। देवी यस्यां वेदिकायां स्थापिता अस्ति, तच्चतुस्तम्भमण्डपं वर्तते, यत् शिखरवद् भवति। प्रासादे देवतालक्षणानुसारमेव छत्रखड्गादिचिह्नानां निर्माणं भवितव्यम्।[5] उपर्युक्तवेदिकामध्यात् रजतछत्रं देव्याः उपरि अवलम्बितं वर्तते, यत्तत्सौन्दर्यस्यवृद्धिं करोति।

क्षत्रियाणां राज्ञां वा गृहेषु पृथग्रूपेण कालीदेव्याः निवेशनं सम्भवति, यत्र राजपरिवारः प्रतिदिनं पूजां कर्तुम् अर्हति। यस्य पुरतः वेदीयुक्तं परिष्कृतं क्षत्रपट्टं स्यात्। एवं रचना कर्त्रे विजय-आरोग्य-सन्तान-ऐश्वर्याणां कारणीभूता कथिता।[6]

**निष्कर्षः –**

मया सर्वेक्षणात्मकशैल्याम् आमेरस्थितशिलादेवीमन्दिरस्य वास्तुशास्त्रीयाध्ययनं कृतमस्ति, अनेन प्राप्तं यदस्मिन् नागरशैल्यां निर्मितप्रासादे विभिन्नाङ्गानि स्थापत्यकलायाः सिद्धान्तानुरूपाणि निर्मितानि सन्ति।

1. रजतनिर्मितद्वारम् अत्यन्तम् आकर्षकं वर्तते, यस्मिन् समस्तदेवीदेवतानां मनोहरदर्शनेन सह श्रीगणेशस्यापि दर्शनं प्राप्यते। शास्त्रेषु एतत्स्वर्णनिर्मितमिति कथितम् (सन्दर्भसंख्या ३४)
2. प्रवेशद्वारस्य शिरदलस्थं भव्यं तक्षणं दर्शकान् आकर्षयति ।
3. मन्दिरस्य मण्डोवर-महामण्डप-अर्द्धमण्डप-प्रवेशमण्डपानां भित्तिषु नानाऽलङ्करणानि, देवीदेवतानां चित्राणि, तक्षकार्याणि सर्वजनचित्ताकर्षकाणि सन्ति।

---

1. http://web.archive.org/web/2017//15212620/http://www.missionkuldevi.in/2014
2. तत्रैव
3. सौवर्णद्वारयुगलं तन्मध्ये देहलीतलम्। साक्षिवेदकल्पनं तु तत्रत्यं क्षात्रमङ्गलम्॥ वि. वा. अ. ३५-३६, श्लो. ६
4. विमानशिखरोपेत.....। वि.वा. अ. ३५-३६, श्लो. ४
5. ...छत्रखड्गादिचिह्नितः॥ वि.वा. अ. ३५-३६, श्लो. ४
6. क्षत्रियाणां गृहे कार्यं पृथक्कालीनिवेशनम्।
   सपूर्ववेदिकं क्षत्रपट्टेनापि परिष्कृतम्।
   जयारोग्यसुतैश्वर्यकारणं परिकल्प्यत्॥ - वि.व. अ.३५-३६, २०१४

4. महिषासुरमर्दिन्यै समर्पितस्यास्य मन्दिरस्य गर्भगृहं साधारणमपि भव्यं वर्तते। गर्वगृहं देव्याः रजतच्छत्रं अधिकं शोभायमानं करोति। एतेन सह देव्याः शिलोत्कीर्णा सुन्दरप्रतिमा आकर्षणं अधिकं।
5. गर्भगृहस्य द्वारसज्जा भिन्ना वर्तते, या कदलीवृक्षैः भूषिता अस्ति।
6. देवी या शक्तेः प्रतीकं वर्तते, तस्याः आभूषण-आयुध-आसनवस्तूनां निर्माणं शास्त्रानुसारं कृतम्। देव्याः त्रिनेत्रप्रतिमा वर्तते।
7. एतस्य मुख्याकर्षणं वर्तते यदत्र भित्तिषु स्तम्भेषु अद्भुतानि तक्षकार्याणि वर्तन्ते, यन्मुगलकालीनशैल्याः उदाहरणम् अस्ति।
8. मन्दिरे विशालशिखरस्य अभावः वर्तते, परन्तु चारुप्रस्तरस्य चतुस्स्तम्भमण्डपे शिखरं निर्मितम् अस्ति।
9. शिलादेवी स्वप्रारम्भिककाले पूर्वाभिमुखी स्थापिता आसीत्, परन्तु पश्चात्काले सा उत्तराभिमुखी प्रतिष्ठिता। (सन्दर्भसंख्या ३२)
10. मन्दिरनिर्माणकलाम् अवलोकयामश्चेत् बहिर्भागः गर्भगृहाद् भिन्नः प्रतीयते। सम्भवतः प्रासादनिर्माणम् एककाले न जातम् अपितु भिन्न-भिन्नकाले नानाराजभिः कृतम्, मूलनिर्माणं तैः न स्पृष्टम्।

❖ ❖ ❖

# द्वार-मर्मस्थानयोः सम्बद्धाः वास्तुदोषाः तेषां निवारणोपायाश्च

**– अनिलकुमारदेसायिः**
**– डॉ. कृष्णकुमारभार्गवः**

गृहनिर्माणं कथं करणीयम् इति वास्तुशास्त्रं बोधयति। वास्तुशास्त्रे नैके सिद्धान्ताः सन्ति। वास्तुशास्त्रीयेषु सिद्धान्तेषु द्वारनिर्णयः तथा मर्मस्थानविषयकः सिद्धान्तश्च प्रधानं भवति। गृहस्य द्वाराणि कुत्र कुत्र भवेयुः ? कुत्र कुत्र न भवेयुः ? इति वास्तुशास्त्रे निर्दिष्टमस्ति। केषुचित् स्थानेषु निर्मितानि द्वाराणि शुभानि भवन्ति। पुनश्च केषुचित् स्थानेषु निर्मितानि द्वाराणि अशुभदानि भवन्ति। अशुभस्थानेषु निर्मितानि द्वाराणि वास्तुदोषं जनयन्ति। अतः अशुभस्थानेषु द्वाराणि निर्मितानि चेत् तदुद्भवदोषस्य परिहाराय वास्तुशान्त्यादिकं करणीयं भवति। एवञ्च मर्मस्थानानामपि पीडा न करणीया। यदि मर्मस्थानानां पीडा कृता तर्हि वास्तुदोषः सम्भवति। तदानीं वास्तुशान्तिः करणीया भवति। अस्मिन् शोधपत्रे स्थूलतया द्वार-मर्मस्थानयोः सम्बद्धाः वास्तुदोषाः तेषां निवारणोपायाश्च प्रतिपादिताः।

**कूटशब्दाः** – द्वारम्, द्वारवेधः, वंशसूत्रम्, सम्पातः, मर्मस्थानम्

**द्वारनिर्णयः –**

बृहत्संहितायां वास्तुविद्याध्याये गृहं परितः ३२ स्थानेषु (बाह्यकोष्ठस्थानां ३२ देवतानां स्थानेषु संस्थितानां द्वाराणां स्थानेषु) यस्मिन् यस्मिन् स्थाने द्वारं निर्मितं चेत् किं किं फलं भवतीति कथितमस्ति। तद्यथा- अनिलभयं स्त्रीजननं प्रभूतधनता नरेन्द्रवाल्लभ्यम्।

**क्रोधपरतानृतत्वं क्रौर्यं चौर्यं च पूर्वेण ॥**[1] इति।

**पूर्वस्यां दिशि** – शिखी, पर्जन्यः, जयन्तः, इन्द्रः, सूर्यः, सत्यः, भृशः, अन्तरिक्षम् - एतेषां देवानां स्थानेषु कृतानां द्वाराणां यथाक्रमम् अनिलभयं, स्त्रीजननं, प्रभूतधनता, नरेन्द्रवाल्लभ्यं, क्रोधपरता, अनृतत्वं, क्रौर्यं, चौर्यं चेति फलानि सम्भवन्ति। दक्षिणस्यां दिशि – अनिलः, पूषा, वितथः, बृहत्क्षतः, यमः, गन्धर्वः, भृङ्गराजः, मृगः - एतेषां देवानां स्थानेषु कृतानां द्वाराणां क्रमेण अल्पसुतत्वं, प्रेष्यं, नीचत्वं, भक्ष्यपानसुतवृद्धिः, रौद्रं, कृतघ्नता, अधनं, सुतवीर्ययोः नाशः – एतानि फलानि सम्भवन्ति। पश्चिमायां दिशि – पिता, दौवारिकः, सुग्रीवः, कुसुमदन्तः, वरुणः, असुरः, शोषः, पापयक्ष्मा – एतेषां देवानां स्थानेषु कृतानां द्वाराणां क्रमेण सुतधनयोः अप्राप्तिः, सुतार्थफलसम्पत्, धनसम्पत्, नृपतिभयं, धनक्षयः, रोगः – एतानि फलानि सम्भवन्ति। उत्तरस्यां दिशि – रोगः, सर्पः, मुख्यः, भल्लाटः, सोमः, भुजगः, अदितिः, दितिः – एतेषां देवानां स्थानेषु कृतानां द्वाराणां क्रमेण वधबन्धः, रिपुवृद्धिः, सुतधनलाभः समस्तगुणसम्पत्, पुत्रधनाप्तिः, सुतेन साकं वैरं, स्त्रिया दोषाः, नैः स्वम् – एतानि फलानि सम्भवन्ति।

अत्र येषु येषु स्थानेषु शुभफलानि कथितानि तेषु एव स्थानेषु द्वाराणि कार्याणि। येषु येषु स्थानेषु

1. बृहत्संहिता - वास्तुविद्याध्यायः - ७० तः ७३ श्लोकाः

अशुभफलानि कथितानि तेषु स्थानेषु द्वाराणि न करणीयानि। अशुभस्थानेषु द्वाराणि कृतानि चेत् वास्तुदोषः सम्भवति। एतादृक्स्थितौ वास्तुशान्तिः करणीया भवति।

**द्वारवेधदोषः -**

बृहत्संहितायाम् आचार्यवराहमिहिरेण द्वारवेधदोषः कथितः। तद्यथा -

**मार्गतरुकोणकूपस्तम्भभ्रमविद्धमशुभदं द्वारम् ।**
**उच्छ्रायाद् द्विगुणमितां त्यक्त्वा भूमिं न दोषाय ॥**[1] इति।

मार्ग-तरु-कोण-कूप-स्तम्भ-भ्रमैः विद्धं द्वारम् अशुभदं भवति। किन्तु द्वारस्य उच्छ्रायात् द्विगुणमितां भूमिं त्यक्त्वा मार्ग-तरु-कूप-स्तम्भ-भ्रमाः भवन्ति चेत् दोषाय नैव भवति। द्वारस्य उच्छ्रायात् द्विगुणमितात् भूमितः न्यूनदूरे मार्ग-तरु-कूप-स्तम्भ-भ्रमाः भवन्ति चेदपि अनिवार्यतया तत्र द्वारं करणीयं चेत् वास्तुशान्तिः करणीया भवति।

वराहमिहिराचार्यः द्वारवेधे विशेषफलं कथयति -

**रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा ।**
**पङ्कद्वारे शोको व्ययोऽम्बुनिः स्राविणि प्रोक्तः ॥**
**कूपेनापस्मारो भवति विनाशश्च देवताविद्धे।**
**स्तम्भेन स्त्रीदोषाः कुलनाशो ब्राह्मणाभिमुखे ॥**[2] इति।

रथ्या अर्थात् मार्गेण यदि द्वारं विध्यते तर्हि गृहस्वामिनः नाशाय भवति। तरुणा विद्धं द्वारं बालकानां दोषदं भवति। पङ्केन विद्धं द्वारं शोकं जनयति। द्वारे जलनिर्गमनमार्गे विद्धे सति धनव्ययः सम्भवति। द्वारे कूपेन विद्धे सति अपस्मारः सम्भवति। द्वारे सुरप्रतिमाभिः विद्धे सति गृहस्वामिनः विनाशः सम्भवति। द्वारे स्तम्भेन विद्धे सति स्त्रीदोषाः सम्भवन्ति। द्वारे ब्राह्मणाभिमुखे सति कुलस्य नाशो भवति। द्वारवेधदोषः कुत्र न भवति ? कुत्र च भवति?

**पृष्ठतः पार्श्वयोर्वापि न वेधं चिन्तयेद्बुधः। प्रासादे वा गृहे वापि वेधमग्रे विनिर्दिशेत् ॥**[3]

प्रासादस्य गृहस्य वा पार्श्वतः पृष्ठतश्च पूर्वोक्तः द्वारवेधदोषो न भवति। केवलं प्रासादस्य गृहस्य वा अग्रतः एव द्वारस्य वेधदोषो भवति।

वेधदोषसूचकवस्तूनि (पूर्वं द्वारवेधप्रकरणे "रथ्याविद्धं द्वारं नाशाय ...." इत्यादिना यानि यानि वस्तूनि कथितानि तानि) प्रासादस्य गृहस्य वा अग्रतः भवन्ति चेदेव दोषः इति वक्तव्यः। किन्तु पार्श्वयोः पृष्ठतश्च दोषः न भवति।

**द्वारसम्बद्धानि अशुभफलानि -**

द्वारसम्बद्धानि कतिचन अशुभफलानि वराहमिहिराचार्येण कथितम्। तद्यथा -

**उन्मादः स्वयमुद्घाटितेऽथ पिहिते स्वयं कुलविनाशः।**

---

1. बृहत्संहिता - वास्तुविद्याध्यायः - श्लोकः ७४
2. बृहत्संहिता – वास्तुविद्याध्यायः - ७५, ७६ श्लोकौ
3. बृहद्दैवज्ञरञ्जनम् - 86/391

**मानाधिके नृपभयं दस्युभयं व्यसनमेव नीचे च ॥**
**द्वारं द्वारस्योपरि यत्तन्न शिवाय सङ्कटं यच्च ।**
**आव्यात्तं क्षुद्भयदं कुब्जं कुलनाशनं भवति ॥**
**पीडाकरमतिपीडितमन्तर्विनतं भवेदभावाय ।**
**बाह्याविनते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा ॥**[1] इति।

गृहस्य द्वारे स्वयमेव उद्घाटिते सति उन्मादः जायते। द्वारे स्वयमेव पिहिते सति कुलस्य नाशः सम्भवति। वास्तुशिल्पशास्त्रेषु उक्तप्रमाणात् अधिकप्रमाणेन द्वारे कृते सति नृपभयं सम्भवति। वास्तुशिल्पशास्त्रेषूक्तप्रमाणात् अल्पप्रमाणेन द्वारे कृते सति दस्युभयं व्यसनं च सम्भवति। द्वारस्योपरि यद्द्वारं कृतं तत् श्रेयसे नैव भवति। यच्च द्वारं उक्तपृथुत्वेनाल्पं तदपि शिवाय नैव भवति। अतिविपुलं द्वारं दुर्भिक्षं जनयति। कुब्जं द्वारं कुलस्य नाशं करोति। उदुम्बरेण अतिपीडितं द्वारं गृहस्वामिनः पीडाकरं भवति। अन्तर्गृहाभ्यन्तरे विनतं द्वारं गृहस्वामिनः मरणाय भवति। बाह्यविनतं द्वारम् अन्यदेशवासं जनयति। द्वारे दिग्भ्रान्ते सति दस्युभिः पीडा जायते।

गृहस्य मूलद्वारम् अर्थात् प्रधानद्वारम् अन्यद्वारैः रूपसमृद्ध्या समानं न अभिसन्दधीत। अर्थात् मूलद्वारस्य यादृशी रचना कृता तादृशी रचना अन्यद्वारेषु न कार्या; मूलद्वारात् किञ्चित् न्यूनम् अलङ्कारादिकं वैभवं, विस्तारदैर्घ्यपृथुत्वाणां प्रमाणं च कार्यमित्यर्थः। तथा मूलद्वारं मङ्गलैः घटैः (कलशैः), श्रीफलादिभिः फलैः, पत्रैः, लतादिभिः, प्रमथगणादिभिः, सिंहव्यालहंसजीवजीवकैश्च उपचितं कुर्यात्। यथोक्तं बृहत्संहितायाम् –

**मूलद्वारं नान्यैर्द्वारैरभिसन्दधीत रूपर्ध्या ।**
**घटफलपत्रप्रमथादिभिश्च तन्मङ्गलैश्चिनुयात् ॥**[2] इति।

यदि मूलद्वारस्य अपेक्षया अन्यद्वाराणि अधिकानि वैभवयुक्तानि कृतानि तर्हि वास्तुदोषाः सम्भवन्ति। तदानीं वास्तुशान्तिः करणीया भवति।

**कोणेषु कृतस्य द्वारस्य फलम् -**

**द्वारमायामतः कार्यं पुत्रपौत्रधनप्रदम् ।**
**विस्तारकोणं द्वारं यद् दुःखशोकभयप्रदम् ॥**[3]

इत्युक्तरीत्या दैर्घ्ये अथवा विस्तारे एव द्वारनिर्माणं कार्यम्। कोणेषु द्वारस्थापनं न कार्यम्। यतो हि विस्तारे दैर्घ्ये वा निर्मितं द्वारं पुत्रपौत्रधनप्रदं भवति। किन्तु कोणे निर्मितं द्वारं दुःखशोकभयप्रदं भवति। प्रमादवशात् कोणे द्वारं कृतं चेत् तस्य द्वारस्य भञ्जनं कृत्वा शुभस्थाने द्वारं करणीयं भवति।

**भित्तिमध्ये कृतस्य द्वारस्य फलम् –**

1. बृहत्संहिता – वास्तुविद्याध्यायः - ७७ तः ७९ श्लोकाः
2. बृहत्संहिता - वास्तुविद्याध्यायः - श्लोकः ८०
3. बृहद्दैवज्ञरञ्जनम् - 86/370

**भित्तिमध्ये कृतं द्वारं द्रव्यधान्यविनाशनम् ।**
**आवहेत्कलहं शोकं नारीर्वा सम्प्रदूषयेत् ॥**[1]

इत्युक्तरीत्या भित्तिमध्ये द्वारनिर्माणं क्रियते चेत् गृहस्वामिनः द्रव्यस्य धान्यस्य च विनाशो भवति। तथा कलहः, शोकः, नारीणां दूषणम् इत्यादिकानि अनिष्टफलानि सम्भवन्ति। अतः भित्तिमध्ये द्वारनिर्माणं नैव कार्यम्। यदि प्रमादवशात् भित्तिमध्ये द्वारं कृतं तर्हि तस्य द्वारस्य भञ्जनं कृत्वा शुभस्थाने द्वारं करणीयं भवति।

**द्वारस्योपरि कृतस्य द्वारस्य फलम्**

**द्वारस्योपरि यद्वारं द्वारं द्वारस्य सम्मुखम् ।**
**न कार्यं व्ययदं यच्च सङ्कटं तद्दरिद्रकृत् ॥**[2]

इत्युक्तरीत्या द्वारस्योपरि अन्यद्द्वारं न कार्यम्। द्वारस्य सम्मुखमपि अन्यद्द्वारं न कार्यम्। यतो हि तथा क्रियते चेत् सङ्कटं दारिद्र्यञ्च सम्भवति। यदि तथा कृतं तर्हि शाश्वतरूपेण एकस्य द्वारस्य पिधानं करणीयं भवति।

**द्वारवेधदोषाणां परिहारः -**

द्वारवेधदोषेनापि वास्तुदोषाः उत्पद्यन्ते। द्वारस्य कृते यस्य कस्यापि प्रकारकस्य बाधा द्वारवेधः इत्यभिधीयते। अतः यदि द्वारवेधदोषो वर्तते तर्हि द्वारं न निर्मातव्यम्। यदि तथा सम्भवं न भवति तर्हि द्वारे ताम्रस्य एकं स्वस्तिकं योजनीयं भवति। गृहस्य मध्यभागे किमपि द्वारं न निर्मातव्यम्। द्वारस्य उभयोरपि उद्घाटकयोः (तरफ) हस्तिनः आकृतिम् अथवा अन्याः माङ्गलिकाः आकृतीः (मङ्गलकलशः, रिद्धि-सिद्धी, हस्तमुद्रा ( हाथ के छाप), ॐ, श्रीः, गणेशस्य आकृतिः इत्यादिकानि) निर्मीयते चेत् द्वारवेधदोषाणां वारणं भवति।

**मर्मस्थानम् –**

**सम्पाता वंशानां मध्यानि समानि यानि च पदानाम्।**
**मर्माणि तानि विन्द्यान्न तानि परिपीडयेत् प्राज्ञः ॥**[3]

इति बृहत्संहितोक्तरीत्या वंशानां ये सम्पाताः पदानां यानि च समानि मध्यानि तानि सर्वाणि 'मर्माणि' विन्द्यात्। तानि वास्तुपुरुषस्य मर्मस्थानानि भवन्ति प्राज्ञः तानि न परिपीडयेत्। यदि तानि मर्मस्थानानि पीडयेत् तर्हि दोषः सञ्जायते। ते वंशसम्पाताः (मर्मस्थानानि) के इति वराहमिहिराचार्यः वक्ष्यति

**रोगाद्वायुं पितृतो हुताशनं शोषसूत्रमपि वितथात्।**
**मुख्याद् भृशं जयन्ताच्च भृङ्गमदितेश्च सुग्रीवम् ॥**
**तत्सम्पाता नव ये तान्यतिमर्माणि सम्प्रदिष्टानि।**

---

1. उद्धृतम् - वास्तुरत्नाकार - 7/57
2. तत्रैव - 7/58
3. बृहत्संहिता – वास्तुविद्याध्यायः - श्लोकः ५७

**यश्च पदस्याष्टांशस्तत्प्रोक्तं मर्मपरिमाणम् ॥**[1] इति।

रोगादारभ्य वायुं यावत् तिर्यक् सूत्रं नयेत्। एवं पितृतः हुताशनं यावत् अन्यत् तिर्यक् सूत्रं नयेत्। वितथात् शोषं यावत् तिर्यक् सूत्रं सन्दद्यात्। मुख्यात् भृशं यावत् तिर्यक् सूत्रं नयेत्। जयन्तात् भृङ्गं यावत् तिर्यक् सूत्रं नयेत्। तथा अदितेः सुग्रीवं यावत् तिर्यक्सूत्रं नयेत्। तानि सर्वाणि सूत्राणि मर्मसूत्राणि इत्युच्यन्ते। एतेषां मर्मसूत्राणां परस्परं नव सम्पाताः भवन्ति। तानि नव सम्पातस्थानान्येव अतिमर्माणि इति सम्प्रदिष्टानि भवन्ति। पदप्रमाणस्य कोष्ठप्रमाणस्य यः अष्टमो भागः सैव मर्मस्य परिमाणमिति प्रोक्तम्।

**तान्यशुचिभाण्डकीलस्तम्भाद्यैः पीडितानि शल्यैश्च।**
**गृहभर्तुस्तत्तुल्ये पीडामङ्गे प्रयच्छन्ति ॥**[2]

इत्युक्तरीत्या तानि मर्मस्थानानि यदि अशुचिभाण्डककीलस्तम्भाद्यैः शल्यैश्च पीडितानि भवन्ति तर्हि गृहभर्तुः तत्तुल्ये अङ्गे पीडां प्रयच्छन्ति। अतः मर्मस्थानवेधः भवति चेत् वास्तुदोषः सम्भवति। वास्तुशान्त्या सर्वत्र वास्तुदोषाणां परिहारः भवति।

वास्तुपुरुषस्य मर्मस्थाने किमपि निर्माणं न कार्यम्। मर्मस्थाने यदि किमपि निर्मीयते तर्हि वास्तुदोषः सम्भवति। अत एव अस्य वास्तुदोषस्य वारणार्थमेव प्राचीनकालिकभवनेषु मर्मस्थानं रिक्तमेव भवन्ति स्म। किन्तु आधुनिककाले गृहनिर्माणार्थं चयितस्य भूखण्डस्य प्रत्येकमपि भागस्य उपयोगः करणीयः इति मनस्थित्या जनाः भूखण्डस्य मध्यभागं (ब्रह्मस्थानं) सामान्यतः रिक्तं न त्यजन्ति। तत्र शौचालयस्य अथवा, स्तम्भस्य वा, अन्यत्किमपि वा निर्माणं क्रियते तदा वास्तुदोषः सम्भवति। अतः ब्रह्मस्थाने यावच्छक्ति किमपि निर्माणमकृत्वा रिक्तमेव त्यक्तुं प्रयत्नं कुर्यात्। येन वास्तुदोषः न सम्भवति। तत्र ब्रह्मस्थाने तुलसीकुण्डं स्थापयितुं शक्यते। यदि गृहार्थं चयितं स्थलमेव अल्पं भवति, ब्रह्मस्थानं रिक्तं त्यक्तं चेत् गृहे स्थलावकाशः न्यूनो भवति चेत् ब्रह्मस्थाने Hall इत्यादिकं स्थापयितुं शक्यते। अनेन वास्तुदोषस्य प्रमाणं न्यूनं भवति। किन्तु तत्र भित्तिः, शौचालयः, स्तम्भः इत्यादिकानां निर्माणं न कार्यम्। यतो हि तत्र भित्त्यादीनां निर्माणेन वास्तुदोषस्य आधिक्यं भवति। केवलं hall निर्मीयते चेत् तत्र भूमेः खननरूपपीडा आधिक्येन न भवति। किन्तु भित्तिः, शौचालयः, स्तम्भः इत्यादीनां निर्माणेन भूमेः खननरूपा पीडा जायते। अतः यदि तादृक्स्थलाभावो भवति तर्हि केवलं ब्रह्मस्थाने सामान्यं hall एव निर्मातव्यम्। अन्यत्किमपि न निर्मातव्यमिति अभिप्रायः।

**निष्कर्षः -** बहुविधवास्तुदोषाः सन्ति। तेषु वास्तुदोषेषु द्वार - मर्मसम्बद्धवास्तुदोषाः। वास्तुशान्त्या एतेषां दोषाणां परिहारः भवतीति।

❖ ❖ ❖

1. बृहत्संहिता - वास्तुविद्याध्यायः - ६१, ६२ श्लोकौ
2. बृहत्संहिता – वास्तुविद्याध्यायः - श्लोकः ५८

# राहुमुखविचार का दार्शनिक एवं वैज्ञानिक विमर्श

– प्रो. वासुदेव शर्मा

ॐ ह्रीं नमो भगवन् वास्तुपुरुष महाबलपराक्रम सर्वदेवाश्रितशरीर ब्रह्मपुत्र सकलब्रह्माण्डधारिन् भूम्यर्पितमस्तक-पुरपत्तनप्रासादगृहवापीरूपादि-सन्निवेश-सांनिध्यकर-विश्वम्भर-परमपुरुषस्वरूप-शङ्ख-चक्रशार्ङ्गधनुः कर-वरदाभयहस्तवास्तो नमस्ते नमस्ते।[1]

वास्तुशास्त्र अपनी तीन शक्तियों की प्रधानता के कारण विश्व में सर्वाधिक प्रतिष्ठा प्राप्त करने वाला शास्त्र है। इसकी तीन शक्तियों में अध्यात्म बल काल का चिन्तन आत्मा और मन के समन्वय के एक वैज्ञानिक आधार पर प्रयोग करने के कारण दार्शनिक स्वरूप को परिभाषित करता है। आत्मा और मन भारतीय दर्शनशास्त्र का प्रधान प्रतिपाद्य विषय रहा है। विभिन्न शक्तियों के साथ आत्मबल का अधिष्ठाता सूर्य तथा इन्द्रियों के राजा के रूप में मन का अधिष्ठाता चन्द्रमा कालबल के प्रयोग का मुख्य आधार है। **"सूर्य आत्मा जगतः"**[2] तथा **"चन्द्रमा मनसो जातः"**[3] इत्यादि मन्त्र इस ही चिन्तन का साक्ष्य हैं।

आत्मानुसंधित्सु दार्शनिक वैज्ञानिकों (ऋषिप्रवरों) की दीर्घकालीन सुनिश्चित चिन्तनधारा ज्योतिषशास्त्र के कालतत्त्वचिन्तन के साथ मिलकर वास्तुशास्त्र के लिये उपयोगी कालबल का निर्धारण ही वास्तुशास्त्र का दार्शनिक (आध्यात्मिक विज्ञान) स्वरूप है। इस विज्ञान का चिन्तन देवयोनि और असुरयोनि दोनों प्रकार के विचारकों ने किया। इसके कारण ही विश्वकर्मा ओर मय की परम्परा वास्तुविद्या को पोषित करती रही।

यद्यपि जीवन की सर्वांगीणता को निर्मित करने वाले आत्मा, मन, बल, बुद्धि, अहंकार आदि जो अतिसूक्ष्म विचारतन्तु या पञ्चतत्त्व[4] हैं उन्हीं का प्राकृतिक अध्ययन कर देवी और आसुरी सम्पत्[5] के विचारार्थ वैज्ञानिक विचार ही दर्शनशास्त्र है। प्रयोगात्मक अध्ययन (मानव के लिये उपयोगी आवास व्यवस्था के लिये) करना ही वास्तुशास्त्र के आध्यात्मिक विज्ञानमय स्वरूप का मूल है।

---

1. पृ.65, वास्तुप्रतिष्ठा संग्रह, खेमराज श्रीकृष्णदास मुंबई प्रकाशन, संस्करण 1993 ई.
2. ऋग्वेद, मण्डल 1, सूक्त 115, मन्त्र 1
3. पुरुषसूक्त मन्त्र 12 (ऋग्वेद मण्डल 10, सूक्त 90, मन्त्र 13)
4. भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
   अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत्॥ (श्री मद्भगवत् गीता, अध्याय 7, श्लोक 4-5)
5. अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥
   तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत॥
   दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥
   दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता। (श्री मद्भगवत् गीता, अध्याय 16, श्लोक 2-3-4-5)

ज्योतिषशास्त्र ही भगवान् वास्तु का नेत्र हैं[1] जो कि भूत भविष्य वर्तमान त्रिकालाबाधित दृष्टि का प्रतीक है। भगवन् वास्तु का शङ्ख-चक्र-शार्ङ्गधनुःकर स्वरूप भगवान नारायण का ही स्वरूप है। भगवान् नारायण ही साक्षात् विग्रहवान धर्म हैं। "नारायण पराः वेदाः" इत्यादि वाक्य नारायण को ही वेद का अनिर्वचनीय[2] स्वरूप मानते हैं अतः श्रीमद् भागवत का वेदस्तुति परक पथ इसका ही मुक्तकण्ठ से समर्थन करता है। भगवान नारायण की ही सूक्ष्मकला सर्वत्र देवालय, आराम (वाटिका), गेहविधि, जलाशय आदि के निर्माण में प्रयुक्त होने वाली काल की कलनात्मक विधि **"कालः कलयतामहम्"** के अनुसार नारायणमय वास्तु का सूक्ष्म स्वरूप है। **"नक्षत्राणामहम् शशि"** इत्यादि वाक्य भी चन्द्रमा को नक्षत्रों की विशिष्ट अधिपतित्वता का द्योतक हैं।

वास्तुशास्त्र के लिये आध्यात्मिक विज्ञानमय पथ का विचार करने पर गृहनिर्माणार्थ खात के प्रसंग में दिक् निर्णय का विचार राहुमुख ज्ञान से किया जाया है। यह राहुमुख एक प्रतीकात्मक शब्द है। ज्योतिषशास्त्रानुसार– **"तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः"** इत्यादि वाक्य राहु को तम, स्वर्भानुः सिंहिका पुत्र तथा विधुन्तुद के रूप में परिभाषित करते हैं। यद्यपि ज्योतिष शास्त्रीय राहु वक्रगति, क्रूरग्रह, चन्द्रमा को पीडा देने वाला एक असुर परिभाषित किया गया है। सिद्धान्त ज्योतिष का वैज्ञानिक पथ **"विमण्डले भवृत्तस्य सम्पातः पात उच्यते"** इत्यादि निर्णयानुसार विमण्डल (चन्द्रभ्रमण मार्ग) में भवृत्त क्रान्तिवृत सूर्य के भ्रमण मार्ग का सम्पात ही पात अर्थात् राहु का स्थानमय क्षेत्र है। यहां सूर्य का भ्रमणमार्ग आत्मतत्त्व के अधिष्ठाता का विमण्डल चन्द्रमण्डल के भ्रमणमार्ग मनस्तत्व के सञ्चालन के स्थान का सम्पात ही अन्धकार मय राहु का स्थान है। ज्योतिषशास्त्रीय व्याख्या ही वास्तुशास्त्रीय चिन्तन के दिक्, देश और काल त्रिविध तत्त्वों का मूलाधार है। यहाँ राहुमुख ज्योतिषशास्त्रानुसार एक राशी पर मध्यम मानानुसार 11/2 वर्ष संचरण करता है। ज्योतिषशास्त्र का राहु पौर्णमासी पर चन्द्रमा को तथा अमावस्या पर सूर्य को अन्धकार (तम) से आवृत करने की क्षमता रखने वाली अमृत पान से अमरता को प्राप्त हुई आसुरी शक्ति (अन्धकार) का प्रतीक है। वहीं यह केवल मुख की आकृति कला राहुमुख गृहनिर्माणोपयोगी भूमि पर आत्मा और मन की संलग्नता से भूखण्ड को अपना मान लेते ही प्रभावी होकर क्रमशः देवालय, गेहविधि और जलाशय निर्माण का संकल्प लेते ही वक्रगति से प्रभावी हो जाता है। तथा देवालय निर्माण में जीवात्मा और परमात्मा के विशिष्ट सम्बन्धवशात् मीन राशि से गेहविधि में आत्मतत्त्व के अधिष्ठाता सूर्य का अपना गृह सिंह के वश तथा जलाशय निर्माण में दुःख के अधिष्ठाता शनि ग्रह की राशि जलतत्व की विशिष्टता की द्योतक मकर राशि वश तीन तीन राशियों के क्रमवशात् गृहनिर्माणोपयोगी भूमि में शम्भु दिशा ईशानकोण से आरम्भ कर वक्रगति द्वारा अपनी स्थिति को प्रगट करता है।[3] दर्शनशास्त्र जहां आत्मतत्त्व, मनस्तत्व के विशिष्ट चिन्तनवश मानव जीवन के पुरुषार्थ चतुष्टय धर्म, अर्थ,काम,मोक्ष की विशिष्ट चिन्तन धारा में धर्मशास्त्र के विधि निषेधों द्वारा मानव जीवन के कल्याण का मार्ग प्रशस्त करता है वहीं वास्तुशास्त्र गेहनिर्माणोपयोगी भूमि जो कि पञ्चमहाभूतों में गुरुत्वशक्ति, चुम्बकीय

---

1. वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।
   संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः॥ (सिद्धान्त शिरोमणि, मध्यमाधिकार, श्लोक 11)
2. वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ (श्री मद्भगवत् गीता, अध्याय 15, श्लोक 15)
3. देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमतः।
   मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात् पृष्टविदिक् शुभा भवेत्॥ (मुहूर्त चिन्तामणि, वास्तु प्रकरण, श्लोक 19)

शक्ति का साक्षात् प्रत्यक्षस्वरूप है उसके चार कोण जिसमें शिवतत्त्व कल्याणमय पक्ष की विशिष्ट दिशा (विदिशा) शम्भु दिशा ईशान कोण के दिक् तत्त्व, कालतत्त्व के अधिष्ठाता भगवान भास्कर की विभिन्न नक्षत्राधिष्ठातृत्व (स्थिति) वश उत्पन्न राशिप्रदेश में सञ्चारवशात् प्रकाशक पदार्थ की विलोमदिशा में चलने वाली अन्धकार (छाया) की गणना राहुमुख के रूप में कर उसके पृष्ठविदिक् में खात करने का निर्देश करता है। यहां राहुमुख ज्ञान के दो पक्ष अतिमहत्त्वपूर्ण हैं। **"राहोर्मुखं शम्भुदिशो विलोमतः"** तथा **"खाते पृष्ठविदिक् शुभा भवेत्"**। वस्तुतः खातारम्भ गृहारम्भ का अतिमहत्वपूर्ण पक्ष है जिसमे अधोगति और ऊर्ध्वगति दो क्रियाओं का सम्बन्ध हैं। मानवजीवन की अधोगति किसी भी रूप में किसी को भी स्वीकार्य नहीं है अतः अधोगति में मुख्य चिन्तन तमोगुणी प्रवृत्ति या प्रकृति के निराकरणार्थ किया जाने वाला शिव चिन्तन ही प्रधान है। शिवतत्त्व को प्रभावित करने वाला तमस्तत्त्व ही जीवन के कल्याण का बाधक है।

वास्तुशास्त्र देवालय, गेहविधि और जलाशय निर्माण के प्रारम्भ में ही खातारम्भ के लिये विदिक् निर्धारणार्थ प्रकाश के तेजोभूत पुञ्ज भगवान भास्कर के राशि संचरण के आधार पर तीन तीन माह के लिये ईशानदिशा से प्रारम्भ कर भूखण्ड के चतुर्दिक में वक्री गति भ्रमण करने वाले राहुमुख का प्रतिपादन कर पृष्ठविदिक् में ही खातारम्भ (अधोमुख क्रिया) का निर्देश कर शुभत्व का चिन्तन करता है। यहाँ हम प्रत्येक क्रिया देवालय निर्माण, गृहनिर्माण (आवासीय गृह), जलाशय निर्माण के प्रसंगों का वैज्ञानिक एवं दार्शनिक चिन्तन प्रस्तुत करने का प्रयास इस लेख के माध्यम से कर रहे हैं। जिसमें ज्योतिष शास्त्र, वास्तुशास्त्र, स्वरशास्त्र तथा अन्यान्य शास्त्रों का सहयोग चिन्तन की शोधपरक पृष्ठभूमि के लिये आवश्यक है। यहाँ सर्वप्रथम देवालय निर्माणार्थ **"देवालये मीनार्कतस्त्रिभे"** मीनराशी के सूर्य से वर्षान्त पर्यन्त सूर्य का संचरण क्रमशः **"पूर्वाभाद्रपदा पादमेकम् उत्तराभाद्रपदा रेवन्यन्तं मीनः" "अश्विनी भरणी कृतिका पादमेकं मेषः" "कृतिकायास्त्रयः पादाः रोहिणी मृगशिरोऽर्धं वृषभः"** उक्त नक्षत्रों के एकसूत्रगत भूकेन्द्राभिप्रायिक साक्ष्य के अनुसार भूमण्डल पर पड़ने वाली सूर्य किरणों के अन्तर्गत अभीष्ट भूखण्डाभिप्रायिक कोणजन्य विशिष्ट स्थिति द्रष्टा ऋषि महर्षियों वास्तुविद्या प्रणेता कालद्रष्टा चिन्तकों के अनुसार तीन मास के लिये राहुमुख का प्रभाव ईशान कोणस्थ शिवतत्त्व को प्रभावित कर उस कोण में खातक्रिया को निषिद्ध कर उससे अग्रिम कोण (वामावर्त) में भी खातारम्भ का निषेध करता है। केवल पृष्ठविदिक् अग्निकोण को ही तदर्थ शुभ मानता है। **"वर्णा विप्रमुखाः झषादिह"** के अनुसार मीन राशि ब्राह्मण वर्ण ब्रह्मज्ञान परायण **"ब्राह्मणस्य निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च"** से प्रारम्भ कर देवालय निर्माण के प्रमुख अधिकारीगण विप्रवर्ण के निर्धारणार्थ राश्यधिष्ठातृदेव देवगुरु बृहस्पति की मीन राशि को मुख्य **"मत्स्यो घटी नृमिथुनं सगदं सवीणम्"** के अनुसार उभयोदय मुखपुच्छ संलग्न भगवान् विष्णु के प्रथमावतार मत्स्यावतार की राशि से प्रारम्भ कर तीन सौर मास की अवधि का निर्धारण **"त्रिभिर्मासैः अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते"** के अनुसार मध्यम मार्ग निर्धारण कर राहु की मध्या गति को स्वीकार कर युगकाल (बृहत्काल निर्धारणार्थ) अवधि को भी **"षष्ठांशः सन्ध्ययोः स्वकः"** के नियम अनुसार दो दिशाओं की सन्धि को राहु की मध्यम कालावधि (राशि संचरण अवधि) को अष्टादश मास स्वीकार कर संधि हेतु षष्ठांश का नियम सूर्य प्रणीत नियम व सिद्धान्तानुसार पुराणानुमोदन के उपरान्त तीन मास हेतु सन्धि में राहुमुख का वास उचित ही प्रतीत होता है।

आत्मतत्त्व एवं तमस्तत्त्व तथा दिक् तत्त्व की सन्धि विदिक् क्रम के साक्षी साक्षात् ईशान ही **"ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्"** सदाशिव तत्व असुरसत्ता सैंहिकेय की मुख स्थिति विष्णुभगवान् के सुदर्शन चक्र (ऋषि महर्षियों के तपो शक्ति के साक्षात् स्वरुप) से उत्पन्न अमृतयुक्त राहुमुख के प्रथमाधार हो सकते हैं। दक्ष प्रजापति (ब्रह्मा के लोकसृष्टा पुत्र) की 12 कन्याओं[1] में परिगणित सिंहिका का पुत्र सैंहिकेय **(सिंहिकायाः अपत्यं पुमान्)** राहु ही अमृतास्वाद वशात् राहुमुख के रूप में प्रगट हुआ। यही राहु ग्रह[2] रूप में सैंहिकेय कहलाया। राहु को छाया ग्रह मानने के सिद्धान्त तथा **"तामस कीलक संज्ञया राहुसुताः केतवस्त्रयस्त्रिंशत्"** संहिता ग्रन्थों का राहु की समष्टिगत प्रभाव सत्ता के फलों के प्रतिपादन में **"त्रयस्त्रिंशत् कोटि देवाः"** के देवों की 33 कोटियों के समान असुरों में अमृतपान से अमर सैंहिकेय (ग्रह) की भी 33 कोटियो के 33 पुत्रों का विचार संहिता शास्त्र के मर्मज्ञ ऋषि मुनियों का एक विहंगम अवलोकन प्रतीत होता है। पृष्ठभूमि वास्तुशास्त्र की हो या स्वरशास्त्रानुसार भूबल विचार की सर्वत्र प्राज्ञ ऋषियों का तमस् तत्त्व के निग्रहार्थ उपाय व चिन्तन ही दृष्टि गोचर होता है। "तत्र गन्धवती पृथ्वी" या "शब्दगुणकम् आकाशम्" इत्यादि दार्शनिक चिन्तन भी पृथ्वी तत्त्व में तमस्तत्त्व का गन्ध अनुसार भी चिन्तन कर वास्तुशास्त्र में भू खातार्थ प्रयोग को प्राथमिकता देता है।

स्वरशास्त्र जीवनक्षेत्र में विजयार्थ **राहु कालानल भूमि**[3] में विचारणीय सूर्य चन्द्र के तेज उष्णशीत तेज का विचार तम निग्रहार्थ ही प्रयत्न है जो कि भूबल से जयप्रद है। इसके अतिरिक्त स्वरशास्त्र का ऋक्ष राहु, मास राहु, पक्ष राहु, दिन राहु, खण्ड राहु, अर्धयाम राहु, गूढार्ध राहु, मुहूर्त राहु, कुलिक राहु के अन्तर्गत खण्ड राहु का विचार दिशा व तिथि कृष्ण शुक्ल पक्ष सापेक्ष्य ही किया जाता हैं।

**ऐन्द्रयां कृष्णे तृतीयायां सप्तम्यां शूलिनो दिशि ।**
**दशम्यां धनदाशायां वायव्यां भूतवासरे ॥**
**शुक्लपक्षे तु वारुण्यां चतुर्थ्यां समुदेत्यसौ ।**
**नैऋत्ये च तथाष्टम्यां एकादश्यां यमे दिशि ॥**
**आग्नेये पञ्चदश्यां च मासराहूदये सति ।**
**खण्डगत्या भ्रमत्येवं खण्डराहुस्तथोच्यते ॥**[4]

---

1. अदितिर्दितिर्दनुः काला दनायुः सिंहिका मुनिः । प्रबोधा सुरसा क्रोधा विनता कद्रुरेव च ॥
   दक्षस्यैता दुहितरः कन्या द्वादश भारत । नक्षत्राणि च भद्रं ते सप्तविंशतिरूर्जिताः ॥ (हरिवंश पुराण, भविष्यपर्व, अध्याय 14, श्लोक 30-31)
2. दनायुषायास्तनया व्याधयश्चाधयस्तथा । सिंहिका ग्रहमाता च गन्धर्वजननी मुनिः॥ (तत्रैव श्लोक 61)
3. राहुकालानले चक्रे कृत्वा चन्द्रदिवाकरौ, वदनाद्यङ्गभेदेन कथयिष्यामि भूबलम्।
   राहोर्मुखस्थितश्चन्द्रः पृष्ठभागे जयप्रदः, ग्रह्यसम्पुटगो युद्धे वामाग्रे च जयावहः।
   कपालपुच्छयोश्चन्द्रो सव्यमार्गे जयप्रदः, भानुः सर्वत्र सर्वाङ्गे जयदः पृष्ठदक्षिणे॥
   (नरपतिजयचर्या, भूबलाध्याय, श्लोक 151-152-153)
4. तत्रैव श्लोक 164-165-166, करणराहु

इस प्रकार वास्तुशास्त्रवत् "पृष्ठविदिक् शुभा भवेत्" की परम्परा या विचार सरणि स्वरशास्त्र के अष्टविध राहु[1] में सम्मुख व वामस्थ राहु पराजय के लिये तथा दक्षिणपृष्ठस्थ विजय के लिये स्वीकार किया गया है।

राहु मुख विचार समग्र अधोमुखी क्रियाएं जिनका सम्बन्ध वास्तुशास्त्र से है यथा वापी, कूप आदि हेतु खात देवतागार खनन, निधि खनन, खनी बिलप्रवेश आदि में आवश्यक है तथापि मुहूर्तशास्त्र का वचन है– **"मूलाहिमिश्रमधोमुखं भवेत्"** मूल, अहि (आश्लेषा), मिश्र (कृतिका, विशाखा), उग्र (पूर्वात्रय, मघा, भरणी) ये नक्षत्र अधोमुख संज्ञक हैं। गरुडपुराण का भी वचन है –

**भरणी कृतिका श्लेषा मघा मूल विशाखकाः ।**
**तिस्रः पूर्वास्तथा चैव अधोवक्त्राः प्रकीर्तिताः ॥**
**एषु वापी कूप तडागादि खननं च तृणादिकम् ।**
**देवतागारखननं निधानखननं तथा ।**
**गणितं ज्योतिषा रम्भं खनी बिलप्रवेशनम् ।**
**कुर्याऽधोगतान्मेव कार्याणि वृषभध्वजः ॥**

वास्तुपुरुष स्वयम् अधोमुख हैं तथा खात क्रिया, स्तम्भ स्थापन, भित्ति आदि का मर्मस्थलों से सम्बन्ध का विज्ञान भी महत्वपूर्ण है। देवालय के लिये मीनार्क से किया जाने वाला यह राहुमुख विचार तमस्तत्व के अन्धकासुर पर सूर्य तेज द्वारा **"धिक्बलं क्षत्रियबलं ब्रह्मतेजो बलाबलम्"** आदि विश्वामित्र वशिष्ठ आदि के उपाख्यान से सिद्ध ब्रह्मतेज द्वारा ही ब्रह्मपुत्र वास्तु पुरुष के दार्शनिक स्वरूप को एक दिव्यदृष्टि द्वारा सिद्ध करता है।

❖ ❖ ❖

1. सम्मुखी वामसंस्था वा यस्येयं राहुमण्डली, पराजयो भवेत्तस्य वादे द्यूते रणादिषु ।
यस्य दक्षिणपृष्ठस्था ह्येषा राहुपरम्परा, सहस्त्रं च शतेनापि परसैन्यं निकृन्तति ॥ (तत्रैव, अष्टविधराहु फल श्लोक 174-175)

# वास्तु और पर्यावरण

**– प्रो. अमित कुमार शुक्ल**

आज के इस भौतिकतावादी युग में सुख की लालसा में प्रत्येक मनुष्य परेशान है। मानव जीवन में अनेक प्रकार के संघर्षो के परिणामस्वरूप प्रत्येक व्यक्ति शान्ति की तलाश में लगा हुआ है । वास्तुशास्त्र ज्योतिषशास्त्र की वह शाखा है जो मानव की सुख प्राप्ति की कामना को मार्ग प्रदान करती है। देवों का आशीर्वाद तथा ऋषि मुनियों के दीर्घकालिक अनुसन्धान से प्राप्त इस विद्या का उद्देश्य मानव कल्याण रहा है-

**"वास्तुशास्त्र प्रवक्ष्यामि लोकानां हितकाम्यया "**[1]

विश्वकर्मा प्रकाश ग्रन्थ के अनुसार भगवान शंकर ने सर्वप्रथम इसका ज्ञान प्रदान किया था। उसके पश्चात् गर्ग, पराशर, बृहद्रथ आदि ने इसको प्रसारित किया ।[2]

मत्स्यपुराण में भृगु, अत्रि, वसिष्ठ, विश्वकर्मा, यम, नारद, मय, शौनक गर्ग बृहस्पति, वासुदेव आदि अट्ठारह (१८) आचार्यों को वास्तुशास्त्र का प्रवर्तक कहा गया है। वैदिक वाङ्मय में वास्तु शब्द का अर्थ है निवास करने योग्य भूमि । 'वसति वासे' नामक धातु से उत्पन्न वास्तु शब्द का अर्थ है "जिसमें मनुष्य रहते है ।" सामान्यरूप से वास्तु निर्माण के सिद्धान्तों का प्रतिपादन करने वाला शास्त्र वास्तुशास्त्र है । यथा-

**देवतानां नराणाञ्च गजगोवाजिनामपि ।**
**निवास भूमिशिल्पज्ञैर्वास्तुसंज्ञमितीर्यते ।**[3]

पर्यावरण शब्द 'परि' उपसर्ग तथा 'आवरण' शब्द से मिलकर बना है जिसका अर्थ ऐसी वस्तुओं का समुच्चय से है, जो किसी व्यक्ति या जीवधारी को चारों ओर से आवृत्त किया हो। पर्यावरण उन सभी भौतिक रासायनिक और जैविक कारकों की समष्टिगत इकाई है, जो किसी जीवधारी या परितन्त्रीय जनसंख्या को प्रभावित करते हैं । हमारे जीवन के सभी क्रिया कलाप इसी पर्यावरण के अन्तर्गत होते हैं । "यथा पिण्डे तथा ब्रह्माण्डे" इस सिद्धान्त के अनुसार पंचमहाभूतों से निमित प्रकृति में साहचर्य सम्बन्ध है। इस सम्पूर्ण चराचर जगत में जीवन का आधार ऊर्जा है । सम्पूर्ण जड़ चेतन पर तीन प्रकार की ऊर्जायें अपना सकारात्मक अथवा नकारात्मक प्रभाव डालती है । ये तीन प्रकार की ऊर्जायें निम्नप्रकार से हैं-

1. ब्रह्माण्डीय ऊर्जा 2. वायुमण्डलीय ऊर्जा 3. भूगर्भीय ऊर्जा

ये सभी ऊर्जायें अदृश्य रूप से प्राकृतिक नियमों के अधीन अनवरत अपना अनुकूल या प्रतिकूल प्रभाव

---

1. विश्वकर्मप्रकाश 1/5
2. विश्वकर्मप्रकाश 1/ 3
3. विश्वकर्मवास्तुशास्त्रम् 7/1

प्रत्येक जीव जन्तु पर डालती रहती हैं। वास्तुशास्त्र में इन ऊर्जाओं का मानव की ऊर्जा के स्तर से तालमेल बैठाने का उपक्रम है। पंचमहाभूतों (पृथ्वी, जल, अग्नि, वायु तथा आकाश) में से पृथ्वी अर्थात् भूमि, जल, और वायु का वास्तुशास्त्र में विशेष विचार किया गया है। वास्तुशास्त्र में इन पंचतत्त्वों के क्षेत्र निर्धारित है। इन दिशा क्षेत्रों के माध्यम से यह निर्धारित किया गया है कि किस तत्त्व को भवन में कितना स्थान दिया जाये जिससे मानव का कल्याण हो। इन तत्त्वों का पर्यावरण में संतुलित स्तर पर पाया जाना अत्यन्त आवश्यक है। चूंकि पर्यावरण का सीधा सम्बन्ध मानव तन्त्र से है अतः इन तत्त्वों का पर्यावरण में अत्यन्त कम या ज्यादा होना प्रत्यक्षतः मानव तन्त्र को प्रभावित करता है।'

